**Pratyaksha-Shārīram : a textbook of human anatomy in Sanskrit with an English and a Sanskrit introduction, containing a short history of Ayurvedic literature / by Gananath Sen.**

**Contributors**

Sena, Gaṇanātha, 1877-1945.

**Publication/Creation**

Calcutta : [K.R.S. Kavyatirtha], 1913.

**Persistent URL**

https://wellcomecollection.org/works/v43dtu7k

**License and attribution**

Conditions of use: it is possible this item is protected by copyright and/or related rights. You are free to use this item in any way that is permitted by the copyright and related rights legislation that applies to your use. For other uses you need to obtain permission from the rights-holder(s).

wellcome collection

Wellcome Collection
183 Euston Road
London NW1 2BE UK
T +44 (0)20 7611 8722
E library@wellcomecollection.org
https://wellcomecollection.org

# प्रत्यक्षशारीरम्

[ ...मो भागः ]

TRO.
Crawf.
Coll.
/SEN

श्रीगणनाथकृतम्।

22101479486

Crawford Coll.

SEN, G

Digitized by the Internet Archive
in 2017 with funding from
Wellcome Library

https://archive.org/details/b28986003

The Hon'ble Sir R. Havelock Charles Kt., M.D., M.Ch. F.R.C.S., I.M.S. &c with the most respectful regards of his pupil the author

# PRATYAKSHA-SHÁRÍRAM

A TEXT-BOOK OF

HUMAN ANATOMY IN SANSKRIT

WITH

**AN ENGLISH**

AND

A Sanskrit introduction

CONTAINING

A SHORT HISTORY OF AYURVEDIC LITERATURE

## PART I.

BY


**GANANATH SEN, M.A., L.M.S.**

'VAIDYÁVATAMSA', VIDYÁNIDHI, KAVIBHUSHAN,
PRESIDENT, AYURVEDA-VIDYÁ-PÍTHA
( ALL-INDIA BOARD OF AYURVEDIC EDUCATION),
EX-PRESIDENT, ALL-INDIA AYURVEDIC CONFERENCE
AND AYURVEDA MAHAMANDAL
EXAMINER IN AYURVEDIC MEDICINE
TO THE MADRAS AYURVEDIC COLLEGE,
EASTERN BENGAL SARASWAT SAMAJ,
DELHI AYURVEDA VIDYALAYA
&c. &c.



PROPERTY OF THE ROYAL SOCIETY OF TROPICAL MEDICINE AND HYGIENE, MANSON HOUSE, 26, PORTLAND PLACE, LONDON, W.1.



CALCUTTA

1913



Copyright & Right of Translation Reserved.

WELLCOME LIBRARY INSTITUTE
323840
Crawford Collection
WELLCOME INSTITUTE LIBRARY
Coll. welTROmec
Call No. Crawf. Cou. /SEN

# INTRODUCTION.

Only a few words of apology are required to write a work on Descriptive Anatomy in Sanskrit. No such work is known to exist at the present day and the desideratum is keenly felt by students and practitioners of Ayurvedic Medicine all over India.

The apology.

A word of explanation as to why I have written this work in Sanskrit—a dead language as some would put it. In the first instance, I have to point out that Sanskrit is yet the only common language intelligible to all students of Ayurveda in whatever part of India their lot may be cast. Besides, it has always been held compulsary that the *bona fide* student of Hindu Medicine should have a good preliminary grounding in Sanskrit ; for this is the only language in which all standard works on the subject have been written and explained.

Reasons for writing the work in Sanskrit.

That I am not wrong in this view of the situation has been just proved by a singular fact, which I may be pardoned for mentioning here. In obedience to the wishes of prospective subscribers, I had to allow the first part of my work to be published three months before my English or Sanskrit Introduction was ready. Since then, orders for the book have been coming from far and near,—from Chittagong, Nepal, Kashmir, Sind, Rajputana, the Punjab and the Bombay and Madras Presidencies, and even from such unexpected quarters as Trivandram ( near Cape Comorin) and Ceylon. Several gentlemen have also honoured my work by asking my permission to translate it into

The demand and promise of acceptability all over India.

Bengali, Hindi, Marhatti and Tamil. This result has surpassed my most sanguine expectations and could have hardly been achieved, had I written my work in one of the vernaculars.

Anatomy not only a preliminary course of study in Medicine and Surgery but also a part of general Education in Ancient India.

That the subject of Anatomy formed part of a preliminary course of study in Medicine and Surgery in ancient India admits of little doubt. Nay, a short course of Anatomy was once held a necessary adjunct in the intellectual outfit of even a general student, so that writers of the Puranas and Dharma Shastras found it expedient to include short discourses on the subject in many of their works[1]. Anatomical discourses are also found in the hoary Vedas[2] and in the aged Nirukta of Yaska[3], as also in old Buddhistic literature[4]. In the ancient medical works of Sushruta and Bagbhata, both major and minor surgical operations, such as Laparotomy (opening the abdomen), Amputation of limbs, Embryotomy, Operations on the Intestines, Lithotomy and various plastic operations have been described with such precision[5] that the anatomical knowledge which this presupposes could not have been of a mean order. Numerous quotations of Descriptive Anatomy from an ancient work of Surgery called *Bhoja-Samhita* occur in commentaries

**Evidences to support the above.**

(1). Vide *Agnipurana*, *Ch. 370*, which deals exclusively with Anatomy and *Garudapuran Ch. 4*, Part. II. Also *Yajnyavalka Smriti* ( यतिधर्म्म प्रकरण ) and *Vishnu Smriti* quoted in the Sanskrit Introduction. pp. 58, 59.

(2) e. g. the *Satapatha Brahman*. Quoted in Sanskrit Introd. p. 59.

(3) Also quoted in the Sanskrit Introd. Ibid.

(4) Vide *Khuddak Patha* (Tripitaka)—passage beginning अत्थि इमस्मिं काये &c.

(5) The references for these operations have been quoted in the Sanskrit Introd. Most of the Surgical Instruments described in *Sushruta* ch. vii. are not only closely similar but often identical with modern instruments as I have shown, with demonstrations, in a paper read before the well-known literary society Sahitya Sabha, of Calcutta, Aug. 16, 1913.

nearly a thousand years old. Clear references to the circulation of blood occur in the works of Charaka and Bagbhata and the fact that the blood derived its coloring matter from the spleen is distinctly mentioned by Sushruta. Dissection of the human body has been enthusiastically recommended by Sushruta and Bagbhata and there can be no doubt that the practice was in vogue in the palmy days of India's intellectual sun-shine(6). As Dr. Hoernle has very aptly remarked—"Probably it will come as a surprise to many, as it did to myself, to discover the amount of anatomical knowledge which is disclosed in the works of the earliest medical writers of India. Its extent and accuracy are surprising, when we allow for their early age—probably the sixth century before Christ and their peculiar methods of definition".(7)

**Recent discovery of ancient Anatomical works.**

Even recently a work on Anatomy called *Sharira Padmini*, written about 1000 A. D. has been unearthed by Dr. P. Cordier(8) and quoted from extensively by Dr. Hoernle in his valuable work—"Medicine of Ancient India". Other works on Anatomy called *Sharira Shastra* & *Sharira Vaidyak* are also mentioned in Aufrecht's Catalogue.

**Fragments of Medical Jurisprudence. (4th century B. C.)**

Fragments of Medical Jurisprudence, with instructions for the post mortem examination of bodies in case of suspected death may also be found in a recently discovered work called *Koutiliya Artha-Shastra*(9) or the Polity of Chanakya, the famous

(6) The quotations will be found in the text, ch. I. and my Sans. Introd, last section.

(7) *Medicine of Ancient India.* Part I., Preface.

(8) Vide Dr. Cordier's Recentes Decouvertes, p. 30.

(9) The work has been, of late, published by the Government of Mysore (S. India). The subject referred to will be found in Sec. IV. (कण्टकशोधनम् ) ।

minister of Chandragupta, who ruled India in the 4th Century B. C.

Yet all original texts are now lost through impracticability—not neglect—of dissection.

Nevertheless, the ravages of time and the increasing impracticability of dissection have landed us on an age when all anatomical texts in their original form are lost to us. I say impracticabilty—not neglect—advisedly. Nearly 2200 years ago, the great Emperor Asoka whose dominion extended over the whole of India and beyond, prohibited the practice of human dissection by a Royal Edict(10). During the hard times that followed, dating from the Greek invasion, human dissections were hardly possible in a Buddhist-ridden country. Dr. Puschman(11) clearly tells us that even in Europe, "Dissection of the human subject was in the first centuries of the middle ages opposed by religious and political ordinances and also by social prejudices." And the learned historian goes on—"Many doctors provided themselves with bodies, when they could not get them in a legitimate way, by theft." We have it from the same source that "At Bologna, dissections on the human subject were probably carried out as early (!!) as the 13th century." * * * "The Senate of Venice in 1368, issued an order that dissection should be performed once a year." Again—Practical teaching in Anatomy was developed in the universities of other countries at a later period and to a much smaller extent than in the acadamies of Italy." In India, however, Sushruta writing over two thousand years ago, enjoined in no faltering terms(12)—"Therefore, whoever wishes to practice

Difficulty of dissection in Europe during the past ages.

Sushruta's enjoinder for dissection.

(10) Vide Journal of Asiatic Society, Vol VII. p. 261.

(11) Vide Dr. Puschmann's *Histry of Medical Education*, p. 243 et. seq.

(12) Vide *Sushruta*, *Sharirasthana*. ch. V.

Surgery, must prepare a corpse in the proper way and see by careful dissection every part of the body, in order that he may have definite and doubtless knowledge."

The true history of ancient India—yet to be written.

Modern histories of India begin where the true history of Ancient India ends. The birth of Buddha or the reign of Asoka the Great marks not the beginning but the end of India's past glory. A true history of the great achievements of the sons of India before that epoch is yet to be written(13). It was during that period extending over hundreds of years that the Medical Science, as well as many other branches of science and literature made great progress and shed their lustre on distant climes like Egypt, Greece, Rome and Arabia(14). Historians of antiquity have shown by no slender evidence that the coloniza-

India's influence on Egypt, Greece, Rome and Arabia.

tion of Egypt by Indians took place during these pre-historic times(15). The name "*Misra desha*" (*a mixture*) applied to Egypt and the custume and customs of the old Egyptians lead one to the same conclusion. Mr. Pocock(16) has shown by irresistible internal evidences that Greece owes her original

(13) Such a history must depend on internal evidences, threshed out by a thorough examination of the Ancient Sanskrit Literature. We are glad to note, that a valuable work of this nature entitled "Prithibir Itihasa" (the World's History) in Bengali is being written by Babu Durgadas Lahiri of Howrah. The work is a store-house of valuable informations, three volumes of which dealing with India are already out.

(14) Vide Prof. Heeren's *Historical Researches* Vol. II.—"India is the source from which not only the rest of Asia but the whole western world derived their knowledge and their religion." Also Max Dunker's *History of Antiquity*, Vol. IV.

(15) *Menas* the first king of Egypt, son of the Sun—appears to be on other than our *Manu*. Cf. "सावर्णिः सूर्य्यतनयो यो मनुः कथ्यतेऽष्टमः" &c. in मार्कण्डेयपुराण। Also vide मानवेर आदि जन्मभूमि by Pandit Umesha Vidyaratna.

(16) Pocock's *India in Greece*.

civilzation to India,—her very mythology and old names are from Sanskrit literature. The civilization of Rome was a product of later age and both Greece and Rome owed a great deal to the Buddhist preachers, sent out by Asoka and other Buddhist princes. The dress and manners of ancient Rome closely resembled those of ancient India. Arabian civilization came much later and Arab historians(17) acknowledge in plain terms the great intellectual debt they owed to India. But while Egypt survives only in her mummies and pyramids, the ancient glories of Greece and Rome have been nearly effaced under the Huna invasions. If the other half of Europe, now the great nation-builders and educators of the world, had not come to their rescue, old Greece and Rome would have been now nearly forgotten. But a part of the ancient glory of India still survives—notwithstanding greater crushing influences in the past—in the modest hamlets of the simple pandits. Hindu Medicine at least still holds its own to no mean extent against all foreign rivals. Intrinsic merit based on solid clinical foundations can not be denied by thoughtful men to such an exponent of ancient glory,—whatever its shortcomings at the present day.

India's ancient glory yet survives in part.

Ever since the invasions of the Greeks (327 B.C.), India had so many vicissitudes of fortune that one who arrays the facts of history(18) before the mind's eye can hardly wonder how so much of the past glory was lost. The real wonder is —how so much has yet survived. After the great invasions of

A bird's-eye-view of the last two thousand years.

(17) Vide Dr. P. C. Roy's *History of Hindu Chemistry*; Vol. I. Ch. VI, in which the subject has been elaborately discussed.

(18) Almost all Histories of India are unanimous on these facts.

Alexander, came the devastating hordes of Scythians and after them the locust armies of the Hunas—all of whom continued bloody warfare and pillage for hundreds of years. History bristles with the accounts of the horrors perpetuated by these barbarians. No doubt, much of the treasures of Indian literature was lost during these dark ages. Even during the great renaissance which began with the reign of Joshodharmadeva Vikramaditya—surnamed Shakari or the mighty destroyer of the Scythians and Hunas ( 5th century A. D.), only a part of the lost glory could be recouped by the intllectual luminaries of the period. But the worst came when since the advent of India's arch-enemy Mahmud of Ghazni ( 11th century A. D. ), the upper half of India was over-run and cruelly sacked, times without number, by the savage Saracenes. Towns and villages were burnt and looted and kingdoms crumbled to pieces. Eventually, even the Deccan and Bengal did not escape their depradations. Very few of the limited number of written manuscripts, already thinned in bulk by the invaders' incendiarism, could have survived such tremendous shocks. A feeble revival came again during the comparatively peaceful reigns of Akbar, Jahangir and Shajahan, all of whom were lovers of literature. But with Aurungzeb followed another reign of terror and Hindu-hatred and after him a long period of rapine and anarchy which made the cultivation of science practically impossible. Yet, if the destroyers of India came from close quarters, the rescuers of India came from far away. The Greatest Renaissance has come at last—now that under the benign peaceful rule and kind encouragement of a highly enlightened Government, great researches in

How the ancient glory was lost.

The Rescuers of India—the Greatest Renaissance

Indian literature, mark the mighty awakening of India from her long slumber.

The heavy loss sustained by Ayurvedic literature during the dark ages.

Great and permanent was the loss suffered by Ayurveda, as in fact every other branch of science and literature, during the evil times that befell India. Very few of the original works of the master minds are available at the present day. Of the School of Physicians headed by the Sage *Atreya,* all the six great works (the *Samhitas*) written by his six pupils—*Agnivesha, Bhela, Jatookarna, Parashara, Harita* and *Ksharapani*—as also many others by *Viswamittra, Kharanada* etc., have been lost altogether. Only one of them, the *Agnivesha Samhita,* as revised and recast by *Charaka* and again revised and supplemented by *Dridhabala* survives in skeleton and is now known as the famous *Charaka Samhita.*

Not one of the great Samhitas now survives in original.

*Bhela Samhita* has been recently traced in the Tanjore State Library but the copy of the manuscript which I had the good fortune to examine, through the courtsey of Pandit Jadavaji Tricumji Acharya of Bombay, shows the work as a meagre collection of fragments which appear to be of little importance. A spurious work called *Harita Samhita* passes for the original work of the name. Of the School of Surgeons, headed by the Royal Master *Dhanwantari,* all the original works by his pupils—*Sushruta, Aupadhenava, Aourabhra, Poushkalavata, Gopurarakshita, Bhoja* &c., have passed into oblivion. Only one of them, the *Sushruta Samhita,* as a revised and recompiled summary of the great original called *Vriddha Sushruta* survives to tell the tale of mutilation. The recompiler of Sushruta drew largely from a great work by *Videha* on the dieases of the Eye, Ear, Nose and Throat, but this as well as the large Samhitas on the same subject by *Nimi, Kankayana,*

*Gargya*, *Galava*, etc. are lost to us. In Diseases of Children, none of the works of *Jivaka*, *Parvataka*, *Hiranyaksha* &c. are available. In Toxicology, *Kashyapa Samhita*, a large work by *Kashyapa*, has been just traced in the Tanjore State Library(19). Numerous other works(20) on Toxicology and other branches of the Medical Science have been lost irrecoverably. Some works on Veterinary Medicine and Surgery yet survive and one of them—the *Palakapya Samhita*—a voluminous original work on the treatment of elephants has been recently published at Poona and may be taken as the type of the original Samhitas of old.

**A short History of Ayurveda to be found in the Sanskrit Introduction.**

In my Sanskrit Introduction, I have collected numerous quotations from these and many other ancient works, *over two scores number*, all of which appear to have been lost. These have been cited by authortative commentators like *Dallana*, *Chakrapani*, *Vijaya Rakshita*, *Sreekantha* etc., and their authenticity can not be doubted. Probably many of these works existed when these commentaries were written 700 to 1000 years ago,—although many more had been lost long before that period. A short history of Ayurvedic literature, together with the dates of most well-known authorities, has also been attempted in my Sanskrit Introduction, to which the inquisitive reader is referred for more detailed information.

It may not be out of place here to observe, in

(19) By Pandit Jadavaji Tricamji Acharya of Bombay, whose labours as Editor of the Ayurvediya Granthamala Series are highly praiseworthy in the cause of Ayurvedic renaissance.

(20) Passages from all these lost works have been quoted in the Sanskrit Introduction from existing authoritative commentaries.

Buddhism *Vs.* Ayurvedic literature.

passing, that the decline of Buddhism practically synchronised with the decline of Hindu Medicine, even though the Buddhists were no great friends to Anatomy. The chronicles of Buddhism clearly show that in the monasteries of *Nalnada* and *Taksha-shilla* (*Taxilla*), two branches of literature were studied particularly—*viz.* *Hetu Shastra* or Logic and *Chikitsa Shastra* or Medicine. Benevolence being the watchword of Buddhism, there was no lack of hospitals and medical charities both for men and animals during the reigns of *Asoka, Bimbisara* and other Buddhist princes. We hear the name of the famous physician *Jivaka*(21)—(surnamed "*Komarabhachcha*" or *Kaumarbhritya*, the accoucheur ?) in connection with the court of the king *Bimbisara.* Both he and his great teacher *Bhikshu Atreya* are said to have attended the great Buddha himself and his followers. Again the famous Buddhist patriarch *Nagarjuna* is believed by many to have been the reviser and recompiler of the present day *Sushruta Samhita. Bagbhata,* the well-known Ayurvedic author of reputation next only to that of *Charaka* and *Sushruta,* was also a Buddhist of Sind who lived probably in the 5th or 6th century A. D. He has left us two valuable works, the *Ashtanga Samgraha* and the *Ashtanga Hridaya,*—which may he called a large and a small camprehensive epitome of Ayurvedic literature(22). It appears from a close study of these works, however, that the decline of *Ayurveda* had already begun in *Bagbhata's* time, when finding

(21) For references to Jivaka, see Sanskrit Introduction, p. (च), text and footnote.

(22) The view that the author of the first book was different from the author of the second, recently originated, has been refuted in the Sanskrit Introduction, p. 25.

the old literature perishing fast, he worked hard to summarise all the medical information—good, bad or indifferent—that he could then lay his hands upon. Many authors of the famous *Rasa-tantras* or works on Medical Chemistry too, appear to have flourished during the Buddhistic period.

The Bower Manuscript and its great lesson.

The famous Bower Manuscript, recently discovered in Chinese Turkestan by Leiut. Bower and so ably deciphered by the indefatiguable Dr. Hoernle, is another evidence of that vast mass of Ayurvedic and general literature which was lost[23] during the fall aud decay of Buddhism in Asia.

The loss in Anatomy.

In Anatomy, the loss has been very heavy. All original works having been lost, Hindu Anatomy now survives only in a few meagre and desultory dissertations in the so-called "Anatomical Sections" ( *Sharirasthana* ) of the larger Ayurvedic works now extant. The Tantric Literature, which elaborately describes the Brain, the Spinal Cord, the Sympathetic chains of Ganglia and the different Plexuses of nerves (*Nadi*), is now shrouded in so much mystery that few people suspect that there is such a world of anatomical facts concealed in it. All these, together with numerous anatomical terms and references accidentally occurring in various portions of the existing texts, now constitute the scattered relics of what once was an elaborate System of Anatomy. The quotations frnm *Bhoja Samhita*, occurring in the ancient commentaries of *Dallana* and *Chakrapani*, are indeed so varied and numerous that, if put together, they would make a good-sized volume of Anatomy and Surgery. The re-

The so-called "anatomical sections" in extant works.

(23) For the date of the Bower manuscript, vide, Journal of Asiatic Society, LX, Part I., p. 79.

The original works on Anatomy lost,

"fanciful anatomy" took its place.

cently discovered work "*Sharira Padmini*", already referred to before, is of little practical value to the learner of Anatomy as it was written in an age when no verification by dissections was in vogue or practicable. Thus, the so-called Anatomy of all extant Ayurvedic texts including the summaries called *Charaka* and *Sushruta Samhitas*, bristles, as a matter of fact, with omissions, interpolations and inaccuracies of ages and is neither systematic nor descriptive. Later writers from *Bagbhata* down to *Bhavamisra*, in their ignorance of the true meaning of ancient texts, have only burdened the literature with what may be called a "Fanciful Anatomy" of their own invention. Undoubtedly, this has done more harm than good to Ayurvedic literature. No wonder then that the progress of Ayurvedic Medicine should have been so much retarded during the last few centuries. That Hindu Medicine has still survived is due to the fact that it is yet supported by its splendid Therapeutics and Principles of Treatment—together with many wonderful recipes laid down by the master minds of old.

Instances of inaccuracies in extant Anatom ical literature.

As one out of the many anatomical inaccuracies which have crept into the extant Ayurvedic literature, I may here cite the promiscuous use of the terms *Sira* and *Dhamani* to imply veins, arteries, nerves, ducts etc. found in the extant texts. The proof that the ancients knew the fact of the Circulation of Blood, and consequently the difference between arteries and veins, is unquestionable, as I have shown in my Sanskrit Introduction. Indeed, the term *Sira* has yet survived in the original sense of veins exclusively in a chater of *Sushruta* deal-

ing with venesection or blood-letting. Ample evidence of the ancients minutely knowing not only the Central but also the Sympathatic Nervous System exists in the *Tantras.* Again, whilst no description of the urinary organs is to be found in the "Anatomical Section" of *Sushruta*, the anatomical names for the Ureters and Seminal ducts occur accidentally in connection with the Operation of Lithotomy described in another portion of the work. The reader is referred to my Sanskrit Introduction for elaborate information on these points.

Author's debt to Western Anatomy.

I should be wanting in duty if I failed to express my deep indebtedness to the Western Medical Science for the materials which I have in this work culled from its vast literature on Anatomy. The subject has been very minutely worked out by Western writers whilst their Eastern colleagues have remained content with their ruined legacy.

Author's task not one of translation and transliteration.

I may add, however, that my task has not been one of translation and transliteration. Those who have with commendable energy brought out vernacular editions of Anatomy in India, have generally contented themselves with copying English and Latin names *verbatim* or rendering them occasionally by inaccurate Sanskrit equivalents. Though useful in their own way to a certain class of students belonging to vernacular medical schools, these works, with their hybrid nomenclature, have been found to be of little value to the Ayurvedic (and general) students of Anatomy. Not knowing English as a rule, they are scared away by the transliterated English and Latin names and the long dry descriptions clothed in a language which appears to them neither English nor Vernacular. My first duty there-

The difficulty of building up a nomenclature.

fore, as I took up my self-imposed task, was to build up a suitable nomenclature. All old anatomical names occurring in extant ancient literature were to be interpreted and incorporated so far as possible and numerous new names were to be coined, so worded as to fit-in properly with the old classical stock. The difficulty at first seemed insuperable. But with the patient labour of years, I have made the most of the situation, as far as my scant abilities permitted, in the following way :

Author's methods of work.

(1) Identification of certain old names in extant Ayurvedic literature.

(1) I have identified several old anatomical names by verifying them in all extant Ayurvedic literature—e. g. the word *Kala*[24] (meaning membrane) and *Snayu* (meaning fibrous tissues generally and ligaments particularly). It is to be regretted that the latter word has been wrongly applied to imply nerves in vernacular editions of Anatomy.

(2) Restriction of meaning in the case of certain words used promiscuously in later literature.

(2) I have restricted the meanings of certain words—e. g. of *Sira*, to imply veins, and of *Dhamani*, to imply arteries,—these being the original[25] senses of the words so wellsuited to the purposes of Descriptive Anatomy.

(3) Hunting-up and defining certain terms from the Tantras.

(3) I have utilised for my purpose certain words like *Ida*, *Pingala* and *Sushumna* from Tantric literature,—the first two meaning the two Sympathetic chains of ganglia and the last meaning the Spinal Cord. From the same source, I have adopted the word *Nadi* to imply nerves exclusively. Probably the Greek word *Neuron* ( a nerve ) is a derivative of this Sanskrit word and has given to the

(24) For the reasons for ascertaining the meanings of old terms, vide Text, Ch. II., also Sanskrit Appendix and Glossary.

(25) For evidences on this point, vide Sanskrit Introduction pp. 74-75.

English tongue such words as Neurology, Neuralgia etc.

In every case, I have defined the words in the beginning to avoid mis-construction. (Vide Text, Ch II., Part I.)

(4) In the discovery and identification of certain words like *Kloma* etc., I have received some help from Vedic literature, particularly those portions of it which deal with the sacrificial rites. It is remarkable that several anatomical names like *Gavinyau* for the Ureters, and *Banishthu* for the Prostate gland, occur only in the Vedas[26], with sufficient clues for identification preserved to this day.

(4) Identification of certain names in Vedic literature.

(5) As for the new names, I have coined them where necessary always with an eye to their meaning and usefulness and have endeavoured to clothe them in a classical garb to respect the susceptibilities of the Indian Sanskrit scholar. In every case, corresponding English or Latin names of current anatomical literature have been added in the footnotes, to facilitate reference and teaching by medical men, trained in the Western System. A glossary of terms will also be appended at the end of the book when it is completed.

(5) The coining of numerous new names in classical style.

A large number of specially-prepared illustrations, some of them bicolor and tri-color, have also been added at considerable expense to make the text easily intelligible.

The Illustrations.

So threading my way with a new or newly replenished old nomenclature and engrossed with the tedius and minute details of preparing suitable illustrations, I have at every step considered the require-

(26) Quoted and explained in the Sanskrit Introduction and Appendix.

The descriptions made terse yet lucid, to suit the requirements of Ayurvedic students.

ments of the Indian students and have moulded my descriptions, as best as I could, to such requirements. I have accordingly endeavoured to make the descriptions terse yet lucid,—neither following the elaborate style of Gray or Morris, nor adopting the cut-and-dried form of Potter. To all these works however, I am indebted in general for anatomical data and the outlines of some of the illustrations

How far success has attended my efforts is not for me to judge, — though I have the satisfation of knowing that my pupils, whom I have taught my work, have found it easy and clear to comprehend

Expression of gratitude.

In this connection, I have the pleasant duty of expressing my gratitude to Dr. A. F Rudolf Hoernle, M. A., Ph. D, C. I. E., of Oxford, the well-known author of a valuable work of anatomical research entitled "Studies in the Medicine of Ancient India," who, when I presented him with an advance copy of my work, encouraged me in the following terms :

"*I have been greatly pleased with your work and congratulate you on what to me seems a very creditable performance.*

Dr. Hoernle's valuable opinion.

*The inherent difficulty in an attempt like yours to introduce students and practitioners of Hindu Medicine, who as a rule do not know English, to a knowledge of modern Anatomy is the necessity of making use of the old Ayurvedic nomenclature which, in not a few respects, covers facts and ideas very different from those accepted at the present day. With this difficulty you seem to me to have grappled with considerable skill and success. There is much that is valuable in the old Ayurvedic System of Medicine ; but there is much more that modern Hindu practitioners may, with profit to themselves and to their patients, learn from the great advances made by modern Medical Science. To them, your work with its re-interpreta-*

*tions of the old names, amplified where necessary with newly-coined names, may be heartily recommended. Moreover, what is sure to prepare for it a hearty welcome among them is the fine classical Sanskrit in which you have succeeded to clothe your descriptions."*

I have much pleasure also to express my grateful thanks to the large number of Ayurvedic physicians, hailing from all parts of India, who, ever since they met me at the 3rd All-India Ayurvedic Conference held at Allahabad (1911)—in which I had the honour to preside,—have not only encouraged me by letters and occasional interviews to write this work but have practically spurred me on whenever I was found flagging in my difficult work.

I am also indebted to my much-respected erudite friend Pandit Rai Rajendra Chandra Shastri Bahadur, M. A., P. R. S., for certain valuable historical informations and suggestions; as also to my esteemed friend Kaviraj Viraja Charan Kavyatirtha Kavibhushana, author of "*Vanaushadhi Darpana,*" for occasionally going through the proof-sheets of my work and helping me with some useful suggestions.

In conclusion, I crave the indulgence of the critical reader for the typographical and other errors which may have been overlooked. Engaged in the arduous duties of my profession and working single-handed, I have often been unable to go through the minute details of the work with full justice to the subject. Nobody however is more aware of the shortcomings of my work than I myself and should I live to see it through a second edition, I hope to make certain improvements which, even now, I very much desire. Meanwhile, I shall be thankful to the reader who communicates to me any errors or inconsistencies that he may come across in the book.

*Calcutta,*
December, 1913 } G. N. S.

वैद्यकपुरावृत्त-

समन्वितः

# प्रत्यक्ष-शारीरस्य

## उपोद्घात भागः।

'वैद्यावतंस'-

विद्यानिधि-कविभूषण-

कविराज श्रीगणनाथ सेन, एम्-ए, एल्-एम्-एस्

—इत्यनेन विरचितः।

कलिकातामहानगर्य्यां

तच्छिष्येण

पं० श्रीनाथूराम शर्म्मणा

प्रकाशितश्च।

# उपोद्‌घातोक्त-विषयाणां विवरणम् ।

प्रथम: पाद:—( क-पृष्ठतो ङ-पृष्ठान्त: ) आयुर्वेदागम:, अष्टाङ्गविभागा-दुन्नतिविशेष:, लभ्यमानवैद्यकम्, चरक-सुश्रुतसंहितयो: प्रतिसंस्कार: प्रति-संस्कर्त्तृनिर्णयश्च, "आयुर्वेदवटतरु: पुन: सञ्जीवनीय:"—इत्यादि ।

द्वितीय: पाद:—( ङ-पृष्ठतो ल्ल-पृष्ठान्त: ) आयुर्वेदस्य कालविभाग:—(१) तत्र आयुर्वेद प्रभातम्—"दैवकाल:"—तत्रत्या वैद्यकग्रन्था: ; (२) "मध्य-न्दिनम्"—आर्षकाल: तत्रत्यानि प्राचीनतन्त्राणि—तेषु ४५संख्यकसंहितानां पाठोद्धारपूर्वं परिचया: । तस्मिन्नेव काले आयुर्वेदस्य निखिलभूमण्डले प्रचार:, तत्प्रमाणानि च ।

तृतीय: पाद:—( ल्ल-पृष्ठत: ५६ पृष्ठान्त: ) तत्र (३) आयुर्वेदस्य अपराह्ण-काल:—शास्त्रध्वंसवृत्तान्तकथने ऐतिहासिकवार्त्तासंक्षेप:—ग्रीसादियवनानां शकहूणादीनां महम्मदीयानाञ्च वर्षसहस्रद्वयाधिकव्यापिन उत्पाता: । तत्रापि संग्रहकृतामाविर्भाव: । दृढ़बल-वाग्भट-माधव-वृन्द-डल्लन-चक्रपाणि-विजय-रक्षित-श्रीकण्ठदत्ता-ऽरुणदत्त-शार्ङ्गधर-शिवदास-भावमिश्रादीनां कालनिर्णय: । "विलुप्तेष्वायुर्वेदाङ्गेषु शारीरमादौ समुद्धर्त्तव्यम्"—इत्यादि ।

चतुर्थ: पाद:—( ५६ पृष्ठत: ७८ पृष्ठान्त: ) शारीरस्य वैद्यके प्रधानपूर्वा-ङ्गता, प्रत्यक्षपरत्वात् प्रामाण्यञ्च । शारीरे प्राचामादर:—वेद-पुराणतन्त्राद्युक्त-शारीरस्य परिचय: । प्राचीनार्वाचीन-शारीरनिबन्धा: । अतीत वर्षसहस्रद्वये शवच्छेदस्याऽशक्यत्वात् शारीरस्य दशाविपर्यय: । प्रतिसंस्कर्त्तृप्रभृतीनां प्रमादा:—संज्ञानां व्याकुलीभाव:, आशयादि-परिचय-विरह:, काल्पनिक-शारीर-सृष्टि:, लिपिकरप्रमादबाहुल्यञ्च । शारीरप्रतिसंस्कारस्य षड्‌विधो विधि:—स च एतद्‌ग्रन्थनिर्म्माणे यथाऽनुसृत:—इत्यादि ।

# उपोद्घातः ।

इह खल्वायुर्वेदोनाम निखिलसुरनरतिर्य्यगायुरारोग्यप्रदं शास्त्रं शाश्वतिकं यद्ब्रह्माऽऽदौ भगवानादिबुधो बुबुधे, बुद्ध्वा च स्वयं लक्षश्लोकमय्या संहितया विशदयाम्बभूव। तं ब्रह्मणः प्रजापतिर्दक्षो[1]ऽधिजगे, प्रजापतेरश्विनावश्विभ्याञ्चेन्द्रः।

आयुर्व्वेदागमः

अथेन्द्रो मनीषी मानुष्यकरोगार्त्तिहरणकामः शारीर-वनौषधि-विद्यादिनानापूर्व्वाङ्गसमन्वितं शल्यशालाक्यकायचिकित्साद्यष्टाङ्गप्रविभक्तमनन्तपारमायुर्व्वेदमेकेनातिदुरधिगमं मन्वानो द्वेधा किल मनुजचिकित्सायाः सम्प्रदायं प्रवर्त्तयाञ्चकार शल्याङ्गप्रधानमायुर्व्वेदं धन्वन्तरिपरम्परया, कायचिकित्साङ्गप्रधानञ्च भरद्वाजपरम्परयेति, अनयोरेवाङ्गयोः प्रधानभूतयोरितराङ्गाणामनुप्रवेशात्।

तत्र स राजर्षिर्धन्वन्तरिर्दिवोदासो निखिलविद्यापीठभूतायां वाराणस्यामूषिवान्[2] सुश्रुतौपधेनवौरभ्रपौष्कलावतकरवीर्य्यगोपुररक्षितप्रभृतीन् शिष्यवरान् स्वयं क्षत्रकुलप्रदीपः क्षत्रमुख्यान्[3] स्वभावानुकूलं शल्याङ्गमूलमायुर्व्वेदमध्यापयामास। ब्रह्मर्षिस्तु भरद्वाजः पुनर्व्वसुमात्रेयमात्रेयश्च भगवान् पञ्चाल[4]क्षेत्रे काम्पिल्यराजधान्यां कृताश्रमः स्वयं विप्रकुलमुख्यो विप्रवरानग्निवेशभेलजतूकर्णपराशरहारीतक्षारपाणिनाम्नः षडन्तेवासिनः स्वभावानुगुणं कायचिकित्साप्रधानं शास्त्रमुपदिदेश। सोऽयं द्विविधः सम्प्रदायस्तत्राद्यो

सम्प्रदायद्वयम्

---

१ तथाहि सुश्रुते,—"ब्रह्मा प्रोवाच ततः प्रजापतिरधिजगे तस्मादश्विनावश्विभ्यामिन्द्र इन्द्रादहं मया त्विह प्रदेयमर्थिभ्यः प्रजाहितहेतोः। (सु० सू० १ अ०)। चरके च,—"ब्रह्मणा हि यथाप्रोक्तमायुर्व्वेदं प्रजापतिः। जग्राह निखिलेनादावश्विनौ तु पुनस्ततः। अश्विभ्यां भगवान् शक्रः प्रतिपेदे ह केवलम्। ऋषिप्रोक्तो भरद्वाजस्तस्माच्छक्रमुपागमत्॥" इति (च० सू० १ अ०)। २ तदुक्तं "स्वयम्भुवा प्रोक्तमिदं सनातनम् पठेद्धि यः काशिपतिप्रकाशितम्।"—इत्यादि (सु० सू० १ अ०)। ३ सुश्रुतो हि विश्वामित्रसुतः परामर्षतः क्षत्रिय एवेति। ४ तथाहि चरके,—"जनपदमण्डले पञ्चालक्षेत्रे द्विजातिवराध्युषिते काम्पिल्यराजधान्यां भगवान् पुनर्व्वसुरात्रेयोऽन्तेवासिगणपरिवृतः—" इत्यादि (च० वि० ३य अ०)।

धन्वन्तरिसम्प्रदायः सुश्रुतसम्प्रदायो वेति प्रथते, द्वितीयस्तु भरद्वाजसम्प्रदाय आत्रेयसम्प्रदायो वेति।

अथैते द्विविधाः साम्प्रदायिकाः पृथक् तेनिरे तन्त्राणि। श्रूयते हि,—

"औपधेनवमौरभ्रं सौश्रुतं पौष्कलावतम्।
शेषाणां शल्यतन्त्राणां मूलान्येतानि निर्द्दिशेत्॥" इति
(सु० सू० ४ अ०)

"बुद्धेर्विशेषस्तत्रासीन्नोपदेशान्तरं मुनेः।
तन्त्रस्य कर्त्ता प्रथममग्निवेशो यतोऽभवत्॥
अथ भेलादयश्चक्रुः स्वं स्वं तन्त्रं कृतानि च।
श्रावयामासुरात्रेयं सर्षिसङ्घं सुमेधसः॥" इति च।
(च० सू० १ अ०)।

तत्र धन्वन्तरिसाम्प्रदायिकानि तन्त्राणि सुश्रुतोपधेनवौरभ्रपौष्कलावत वैतरणभोजादि[1]कृतानि शल्याङ्गमूलानि, आत्रेयसाम्प्रदायिकानि चाग्निवेश-भेलजतूकर्णपराशरहारीतक्षारपाणिकृतानि कायचिकित्साप्रधानानि साम्प्रतं विलुप्तप्रायाणि। तेषु कानिचित् चक्रपाणिविजयरचितश्रीकण्ठदत्तशिवदासादीनां व्याख्याकृतां समयेऽप्यासन् सुलभानीति बहुधा तदुद्धृतपाठै[2]रनुमीयते।

अथ पुरा क्रमादूर्ज्जितावस्थां प्राप्तेऽस्मिन् शास्त्रे, सम्यगुपचितेषु शल्य-शालाक्य-कायचिकित्सा-भूतविद्या-कौमारभृत्यागदतन्त्र-रसायन-वाजीकरणाख्ये-

आयुर्व्वेदस्य अष्टाङ्गविभागात् कार्य्यविभागः

ष्वष्टास्वप्यङ्गेषु द्वेधाविभक्तोऽसौ सम्प्रदायः कार्य्यविभागात् पुनरष्टधा प्रववृते, शल्यापहर्त्तारश्च शालाकिनश्च कायचिकित्सकाश्च भूतवैद्याश्च कौमारभृत्यकाश्च अगदतान्त्रिकाश्च रासायनिकाश्च वाजीकरणिकाश्चेति पृथग्विभक्तकार्य्यैर्वैद्यैः। तत्र सुश्रुतादिगुरुपरम्परागताः शल्यापहर्त्तारः। विदेहाधिपनिमिकाङ्कायनगार्ग्य-गालवाद[3]यः शालाकिनः। अग्निवेशभेलादिपरम्परागताश्चरकाद्याः कायचिकित्-

---

१ भोजादीनां शल्यतन्त्रकर्त्तृत्वं प्रसिद्धम् डल्लनेनोक्तञ्च निबन्धसंग्रहाख्ये सुश्रुतव्याख्याने। २ तत्र दिग्दर्शनार्थ-मिह किञ्चिदुदाह्रियते—भेल-हारीत-जतूकर्णपराशरादीनां पाठाः शिवदासेनोद्धृता दृश्यन्ते चक्रदत्त-टीकायां ज्वराधिकारादौ बहुशः। भेलतन्त्रपाठो विजयरचितेन विषमज्वरव्याख्याने उद्धृतः, यथा—"यः स्यादनियतात् कालात् शीतोष्णाभ्यां तथैव च। वेगतश्चापि विषमो ज्वरः स विषमः स्मृतः।" इति।
३ एषां नामानि डल्लनादिभिरुद्धृतानि—यथा निबन्धसंग्रहस्य उत्तरतन्त्रटीकारम्भे।

सकाः। अथर्व्वाद्याः[1] भूतवैद्याः। जीवकाद्याः[2] कौमारभृत्यकाः। काश्यपाद्या[3] अगदतान्त्रिकाः।

रासायनिकाः पुनराचार्य्याः आदिम-नित्यनाथ-चन्द्रसेन-सोमदेव-गोविन्द नागार्ज्जुनाद्याः[4] क्रमात् पारदमेव सकलदुःखपारदं विदित्वा तदितरेषाञ्च स्वर्णादिधातूनां चिकित्सोपकरणतां प्राधान्यतः प्रमाणीकृत्य पृथङ्निर्म्ममिरे तन्त्राणि रसतन्त्रसंज्ञया प्रसिद्धानि। सोऽयं रसवैद्यसम्प्रदायो नाम। रसवैद्या हि रसमात्रप्रयोगेण चतुर्व्वर्गसिद्धिमाचक्षाणास्तस्यैव परमपुरुषार्थतां प्रतिपादयन्तः स्तुवन्ति,—

रसतन्त्राणि रसवैद्यसम्प्रदायश्च

"आयतनं विद्यानां मूलं धर्म्मार्थकाममोक्षाणाम्।
श्रेयः परं किमन्यच्छरीरमजरामरं विहायैकम्।
एकोऽसौ रसराजः शरीरमजरामरं कुरुते॥" इत्यादि[5]।

रसेश्वरदर्शनाख्यस्य च दर्शनस्य प्रवर्त्तकाः एत एव योगिवराः रसवैद्या रसाचार्य्या वेति सर्व्वदर्शनसंग्रहे रसग्रन्थेषु च समुल्लेखः। तत्साम्प्रदायिकेषु च ग्रन्थेषु बहवः खल्वद्यापि समुपलभ्यन्ते समनुस्रियन्ते च साम्प्रतिकैर्वैद्यैः। आहुश्च ते—

"स्वल्पमात्रोपयोगित्वादरुचेरप्रसङ्गतः।
क्षिप्रमारोग्यदायित्वात् भेषजेभ्योऽधिको रसः।" इति[6]

प्राधान्यञ्च रसवैद्यसम्प्रदायस्य बौद्धयुगेष्वेव समभूदिति प्रसिद्धबौद्धेतिहासालोचनाद्बहुषु रसग्रन्थेषु मङ्गलाचरणादौ बुद्धनमस्कारदर्शनैश्चावगच्छामः[7]।

वाजीकरणिकाश्च तावदाचार्य्याः कामकलाकुशलैर्यवनैः स्वाधिकारसमये विशेषादाद्रियमाणा स्तेष्वेव स्वविद्यानैपुण्यं न्यासिषतेति यवनाधिकारकालिकेतिहासालोचनादनुमीयते। इत्यञ्चेदं वाजीकरणतन्त्रं क्रमादिहलोकसर्व्वस्वे-

१ श्रूयतेह्यथर्व्वा नाम ऋषिर्भूतविद्याचार्य्यो बलिमन्त्रादिप्रवर्त्तकः। २ जीवको हि कौमारभृत्याचार्य्यो बौद्धग्रन्थेषु श्रूयते बहुशः। स च राजगृहवास्तव्यो बिम्बिसाराख्यस्य नरपतेर्भगवतस्तथागतस्य च चिकित्सक आसीत् (Vide Rockhill's Life of Buddha pp. 65 et seq). ३ काश्यपविवरणं महाभारते परीक्षितस्तक्षकदंशनप्रकरणे द्रष्टव्यम्। (आदिपर्व्व ५ अ०)। ४ रसाचार्य्याणां नामानि रसरत्नसमुच्चयस्य प्रथमाध्याये द्रष्टव्यानि। गोविन्दश्चायं गोविन्दभगवत्पादाख्यो रसहृदयप्रणेता भगवतः शङ्कराचार्य्यस्य गुरुरिति प्रसिद्धः। ५ एष पाठो माधवाचार्य्येण सर्व्वदर्शनसंग्रहे रसेश्वरदर्शनप्रकरणे समुद्धृतः। ६ रसेन्द्रसारसंग्रहे गोपालकृष्णः। ७ यथा रसरत्नसमुच्चये,—"यस्यानन्दभवैने"त्यादि। यथाच नागार्ज्जुनकृत 'कक्षपुटतन्त्रा'रम्भे—"प्रणिपत्य सर्व्वबुद्धान्" इत्यादि।

र्यवनैरेव विशेषादनुशीलितं किञ्चित्कायचिकित्साद्यङ्गसंयोजितं कालेन 'तिब्बी'-चिकित्सातन्त्रमिति यावनतन्त्रमिति वा पृथक् प्रतिष्ठामयासीत्।
वाजीकरणतन्त्रम् यावनचिकित्सा च प्रभावश्चास्य भारतपश्चिमाञ्चलवास्तव्येषु वैद्येष्वद्यापि दरीदृश्यते,—इति हन्त परिणामोऽयमतीतयवनराज्याधिकारस्य। नत्वेतावताऽयुर्व्वेदापभ्रंशस्य 'तिब्बी' तन्त्रस्य परमार्थतः पृथक्तन्त्रत्वं प्राधान्यं वा लेशतोऽपि शङ्कनीयं शास्त्रज्ञैरित्यलं प्रासङ्गिकवस्तुविस्तरेण।

अथेदानीमतीतवर्षसाहस्रीव्यापिना राज्यविप्लवादिनाऽस्मन्मन्दभाग्यपरिणतिवशाच्च विलुप्तप्रायासु तत्तन्महर्षिप्रणीतमूलसंहितासु प्रनष्टकल्पेषु च प्रायः कायचिकित्सावर्ज्जमपरेष्वायुर्व्वेदाङ्गेषु लभ्यन्ते कतिचिदेव ग्रन्थाः
लभ्यमानवैद्यकग्रन्थाः प्राचीनमहिम्नः साक्षिभूताः—ये खल्वद्यापि नानानिबन्धृजनकृतप्रक्षेप-पाठव्यत्ययादिपरिस्पृष्टा अपि स्मारयन्त्येवायुर्व्वेदस्योदारानन्तविषयताम्। तेषु च लभ्यमानग्रन्थेषु द्वावेव प्रधानभूतौ चरकसुश्रुताख्यौ आर्षसंहितेति प्रथितौ; वाग्भट-शार्ङ्गधर-भावमिश्र-चक्रपाणि-वङ्गसेनादिकृताः पुनर्ग्रन्थास्तदुपजीविनः संग्रहमालाः। निघण्टु-निदानादिग्रन्थास्तु वनौषधि-रोगविज्ञानाद्येकदेशप्रतिपादकाः। रसरत्नाकर-रसेन्द्रचिन्तामणि-रसरत्नसमुच्चयादयः पुनः रसतन्त्रकृतां निबन्धा पूर्व्वं सुदुर्लभा अप्येतर्हि केषाञ्चिन्महनीयकीर्त्तीनामनुग्रहात् प्रतिदिनं सौलभ्यं भजन्ते। भेलसंहिता तु साम्प्रतं दक्षिणापथे ताञ्जोरनगरीस्थराजकीयग्रन्थागारे वर्त्तते, प्रतिलिपिश्चास्याः पाश्चात्यविदुषो हर्णलिसमाख्यस्य सकाशेऽस्तीति तदीयोक्त्या[२] ज्ञायते, नत्वियं दृष्टास्माभि र्न च सुलभापि। यः पुनर्ग्रन्थो हारीतसंहितेतिनामधरो दृश्यते साम्प्रतं मुद्रितः सोऽयमाधुनिकेन केनचिदल्पज्ञेन निर्म्मितश्चर्व्वितचर्व्वणात्मको नात्युपादेयो निबन्ध इति[३] न तमाद्रियन्ते धीमन्तः। सोऽयमेतावान् साम्प्रतं लभ्यमानानां वैद्यकग्रन्थानां संक्षेपादुद्देशः।

तत्र चरकसंहिता खल्वग्निवेशतन्त्रं चरकप्रतिसंस्कृतमिति प्रत्यध्यायशेषनिर्द्देशादाकलयामः। प्रतिसंस्कारश्चायं पुराणस्य नवीकरणरूपो जीर्णसंस्कारात्मको व्यापारः, इति सेयं चरकसंहिता साक्षादग्निवेशतन्त्र-
चरकसंहिता मेवेति न युज्यते वक्तुम्। अग्निवेशतन्त्रस्य हि जीर्णविशेष-

---

१ Vide Dr. P. C. Roy's History of Hindu Chemistry, Introd. ch. vi. ( Vol. I ).

२ Vide Dr. Hoernle's Medicine of Ancient India ( p. 37 ). ३ अप्रौढ़रचनालोचनाव्याकरणाशुद्धिच्छन्दोभङ्गादिदर्शनाद् वाग्भटादिनामनिर्द्देशाच्च सर्व्वथा अर्व्वाचीनेन केनविदल्पज्ञेन निर्म्मितोऽयं ग्रन्थः प्रतिभाति।

चक्रपाणिविजयरक्षितश्रीकण्ठशिवदासादिसमयेऽपि सुलभोऽभूदिति तदुद्धृतपाठोद्धारैरवगच्छामः, न च ते ते पाठा लभ्यन्ते लभ्यमानचरकसंहितायाम्। किञ्च, जीर्णसंस्कृतेऽप्यग्निवेशतन्त्रे,—

"अस्मिन् सप्तदशाध्यायाः कल्पाः सिद्धय एव च।
नासाद्यन्तेऽग्निवेशस्य तन्त्रे चरकसंस्कृते॥
तानेतान् कापिलबलिः शेषान् दृढ़बलोऽकरोत्।
तन्त्रास्यास्य महार्थस्य पूरणार्थं यथायथम्॥"

—इति स्पष्टो विलोपापूरणसूचक उल्लेखो दृढ़बलपण्डितकृतशरकसंहितायामेव। न च नाकारि दृढ़बलेन चरकप्रतिसंस्कृतांशेऽपि स्ववचोनिवेश इति शक्यं शपथेन विभावयितुम्। सप्ततृषिः स्वरचितांशेष्वपि[२] यतस्ततः स्वकपोलकल्पनया आत्रेयाग्निवेशसंवादमाचचाणः स्वकृतांशेऽपि प्रत्यध्यायशेषम् "अग्निवेशकृततन्त्रे चरकप्रतिसंस्कृते" इति प्रतिजानानश्च न खलु नियतभूतार्थवादीति समनुभूयते। तथाचेयं लभ्यमाना चरकसंहिता परमकारुणिकेण चरकर्षिणा चिकित्सास्थानार्द्धं यावत् कृतजीर्णोद्धारापूरणा, तदनन्तरं च दृढ़बलेन पूरितावशेषा प्रायः पुनःप्रतिसंस्कृता चेति न प्रमाणान्तरापेक्षं प्रेक्षावताम्।

सुश्रुतसंहिता पुनः केनचित् प्रतिसंस्कृतं सौश्रुततन्त्रमिति प्रसिद्धा किम्बदन्ती। न चास्याः प्राचीनसौश्रुततन्त्राद् वृद्धसुश्रुतापरपर्य्यायादभेदः कथमपि सम्भाव्यः। दृश्यन्ते हि वृद्धसुश्रुतोक्ताः पाठाः बहुधा वैद्यकटीकाकृद्भिरुद्धृताः, न च ते समुपलभ्यन्ते लभ्यमानसुश्रुतसंहितायाम्।

सुश्रुतसंहिता

"औपधेनवमौरभ्र"मित्यादिपद्ये च सुश्रुतसंहितादृष्टे "सौश्रुत"मिति पृथङ्निर्द्दिशतः शेषाणां शल्यतन्त्राणां मूलभूतेषु ग्रन्थेष्वन्यतमं प्राचीनसौश्रुततन्त्रं पृथगेवासीदिति शक्यमनुमातुम्। "भवतिचात्र"त्यादिनिर्द्दिशपुरःसरं श्लोकानामुद्धारदर्शनतश्च तथैवानुमीयते। सन्ति च सुश्रुतसंहितायामुत्तरतन्त्रारम्भे परमतसंग्रहस्वीकृतिसूचकानि पद्यानि;—

"शालाक्यशास्त्राभिहिता विदेहाधिपकीर्त्तिताः।
ये च विस्तरतो दृष्टाः कुमाराबाधहेतवः॥
षट्सु कायचिकित्सासु ये चोक्ताः परमर्षिभिः॥" इत्यादि

---

१ चिकित्सास्थाने ३०श अध्याये। २ यथा चरके सिद्धिस्थाने तृतीयाध्याये।

वाग्भटश्च लभ्यमानचरकसुश्रुतयोरनार्षवचोबहुलत्वं प्रतिपादयन्नाह—“ऋषिप्रणीते प्रीतिश्चेन्मुक्त्वा चरकसुश्रुतौ। भेलाद्याः किं न पठ्यन्ते तस्माद्ग्राह्यं सुभाषितम्॥” तदेतदरुणदत्तो व्याचक्षाण उपसंहरति—“अतश्चरकसुश्रुतवदनार्षमपीदं (अष्टाङ्गहृदयम्) गुणवत्त्वान्मतिमद्भिर्ग्राह्यमेव।” इति। प्रतिसंस्कृतत्वञ्च लभ्यमानसुश्रुतसंहितायाः डल्लनचक्रपाण्यादिभिरनुमन्यते सुस्पष्टया गिरेत्येवमिह सति नानाप्रमाणसंप्लवे कृतं सुप्रसिद्धमतविरोधेन, कृतञ्च वृथार्षभक्तिसंरम्भेण।

यथा चेदानीं लभ्यमानायां सुश्रुतसंहितायां बहुधा विपर्य्यासं याताः प्रत्यक्षविरुद्धत्वेनोपन्यस्ताश्च साम्प्रतं दृश्यन्ते केचन दर्शयिष्यमाणाः शरीरविषयास्तथाच प्रतीमः सौश्रुततन्त्रमिदं प्रतिसंस्कारादनन्तरमपि केषाञ्चिदज्ञातनाम्नां संशोधकानां प्रभावादिमामवस्थामगमदिति।

पाठव्यत्ययाश्च लेखकमुद्रकादिप्रमादकृताः लभ्यमानचरकसुश्रुतसंहितयोरसंख्यप्रायाः नित्यमुपलभ्यन्तेऽध्ययनाध्यापनादिविघ्नभूताः। तेनानयोः संहितयोरनाविलता न स्वप्नेऽपि साम्प्रतं सम्भाव्येत्याकलयतः कस्य न दूयते चेतः!

यतश्च खलु प्रतिसंस्कारगुणाः प्रतिसंस्कर्त्तृगुणापेक्षिणस्ततः कोऽसावग्निवेशतन्त्रप्रतिसंस्कर्त्ता चरको दृढ़बलश्च, को वाऽयं सौश्रुततन्त्रप्रतिसंस्कर्त्ताऽज्ञातनामेति संक्षेपतः प्रसङ्गादनुसन्धीयते।

तत्राहुरेके,—“कठचरकाल्लुक्”—इति पाणिनीयसूत्रे चरकनामदर्शनात् अयमग्निवेशतन्त्रप्रतिसंस्कर्त्ता चरकः पाणिनेरपि पूर्व्वतनः इति, तन्न। सूत्रे निर्द्दिष्टाभ्यां कठचरकपदाभ्यां यजुर्व्वेदस्य शाखाविशेषप्रवक्तुर्ऋषिद्वयस्याभिधानात्। तथाहि चरणव्यूहे भगवान् व्यासः—“यजुर्व्वेदस्य षड़शीतिर्भेदाः भवन्ति। तत्र चरका नाम द्वादशभेदाः,—चरका आह्वरकाः कठाः प्राच्यकठा * * * इत्यादि।” तस्मादन्य एवायं सूत्रनिर्द्दिष्टश्चरकर्षिर्मन्त्रप्रवक्तेति कोऽत्र संशयः? न चायमेव स्यादग्निवेशतन्त्रप्रतिसंस्कर्त्तेत्यत्र किञ्चिदस्ति प्रमाणम्। नवा युज्यते कथमपि तादृशी कल्पना, वेदप्रवक्तुश्चरकस्य बहुप्राचीनत्वात्।

कोऽसौ चरकः?

१ यथा निबन्धसंग्रहे डल्लनः—“यत्र यत्र परोक्षे लिट्प्रयोगस्तत्र तत्रैव प्रतिसंस्कर्त्तृसूत्रं ज्ञातव्यम्। प्रतिसंस्कर्त्ता हि सुश्रुतमुखेनेदमाह,—“यथोवाच भगवान् धन्वन्तरिः सुश्रुताय इति।” तथाच भानुमत्यां चक्रपाणिः—“चतुर्व्विधं हि शास्त्रे सूत्रं, ‘अहं हि धन्वन्तरि’त्यादि गुरुसूत्रम्। ‘वायोः प्रकृतिभूतस्य व्यापन्नस्य च कोपनैः’ इत्यादि शिष्यसूत्रं, ‘प्रतिरसं पाकः’ इत्याद्येकीयसूत्रम्, “सुश्रुतप्रभृतयः ऊचुः” इत्यादि प्रतिसंस्कर्त्तृसूत्रम्—इति।”:

कश्चित्[1] पुनराह,—चरकोऽयं वैद्यकप्रतिसंस्कर्त्ता कनिष्काख्यस्य राज्ञो भिषगासीदिति त्रिपिटकाख्ये चीनदेशीयबौद्धग्रन्थे दृश्यते, कनिष्कश्च राजतरङ्गिण्याख्ये काश्मीरेतिहासे[2] तुरुष्कान्वयजो नरपतिः सार्द्धसप्तदशशताब्दीपूर्व्वतन इति वर्ण्यते, तस्मात् सोऽयं चरकोऽग्निवेशतन्त्रप्रतिसंस्कर्त्तेति। तदपि न विचारसहम्। प्रमाणाभावात्। कनिष्कनरपतेर्वैद्योऽसौ चरकश्चेदायुर्व्वेदप्रतिसंस्कर्त्ताऽभविष्यत्, किमिति राजतरङ्गिण्यां कनिष्कवृत्तान्ते न्याख्यास्यत तादृशस्य नामापि! अथ प्राचीनतया स एव चेत् स्वीकार्य्यः प्रतिसंस्कर्त्ता, तर्हि यजुर्व्वेदशाखाप्रवक्ता चरकर्षिरेवास्तां सुपरिज्ञातस्तत्पदाभिषिक्त इत्यलममूलकमतोन्मूलनेन।

वयन्तु चरकोऽयं स्वयं भगवान् पतञ्जलिरेवेति चिरन्तनं प्राचीनमतमाद्रियामहे। तथाहि—चरकचतुराननश्चक्रपाणिदत्तश्चरकटीकारम्भे,—

"पातञ्जल-महाभाष्य-चरकप्रतिसंस्कृतैः।
मनोवाक्कायदोषाणां हर्त्त्रेऽहिपतये नमः॥ इति

तथाच योगवार्त्तिके विज्ञानभिक्षुः—

"योगेन चित्तस्य पदेन वाचाम्
मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत्तं वरदं मुनीनाम्
पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥" इति—

भोजश्चाह पातञ्जलसूत्रवृत्तिप्रारम्भे,—

"शब्दानामनुशासनं विदधता पातञ्जले कुर्व्वता।
वृत्तिं राजमृगाङ्कसंज्ञकमपि व्यातन्वता वैद्यके॥
वाक्चेतोवपुषां मलः फणिभृतां भर्त्रेव येनोद्धृतः।
तस्य श्रीचरणरङ्गमल्लनृपतेर्वाचोजयन्त्युज्ज्वलाः॥" इति—

नागेशभट्टोऽपि मञ्जूषायामाप्तलक्षणं चरकक्षतमुद्धृत्याह—"इति चरके पतञ्जलिरिति।" भावमिश्रोऽपि नूनमेनामेव प्रसिद्धिं मनसिकृत्य स्वग्रन्थादौ लिलेख,—

---

१ पाश्चात्य पण्डितस्य 'लेभि'संज्ञकस्य मतमेतत् (M. Sylvian Levi in Jour. Asiatique 1896, T. viii. P. 447 et seq). २ कनिष्कवृत्तान्तो राजतरङ्गिण्यां प्रथमतरङ्गे द्रष्टव्यः।

"यदा मत्स्यावतारेण हरिणा वेद उद्धृतः।
तदा शेषश्च तत्रैव वेदं साङ्गमवाप्तवान्।
अथर्व्वान्तर्गतं सम्यगायुर्व्वेदञ्च लब्धवान्।
एकदा स महीवृत्तं द्रष्टुञ्चर इवागतः।
तत्र लोकान् गदैर्ग्रस्तान् व्यथया परिपीड़ितान्।
स्थलेषु बहुषु व्यग्रान् म्रियमाणांश्च दृष्टवान्।
तान् दृष्ट्वातिदयायुक्तस्तेषां दुःखेन दुःखितः।
अनन्तश्चिन्तयामास रोगोपशमकारणम्।
सञ्चिन्त्य स स्वयं तत्र मुनेः पुत्त्रो वभूव ह।
प्रसिद्धस्य विशुद्धस्य वेदवेदाङ्गवेदिनः॥
यतश्चर इवायातो न ज्ञातः केनचिद् यतः।
तस्माच्चरकनाम्नासौ विख्यातः क्षितिमण्डले॥
स भाति चरकाचार्य्यो वेदाचार्य्यो यथा दिवि।
सहस्रवदनस्यांशो येन ध्वंसो रुजां कृतः॥
आत्रेयस्य मुनेः शिष्या अग्निवेशादयोऽभवन्।
मुनयो बहवस्तैश्च कृतं तन्त्रं स्वकं स्वकम्॥
तेषां तन्त्राणि संस्कृत्य समाहृत्य विपश्चिता।
चरकेनात्मनो नाम्ना ग्रन्थोऽयं चरकः कृतः॥"

इति (भावप्रकाश १ अ०)

अहिपतिर्हि भगवान् शेषः पतञ्जलिरूपेण वेदवेदाङ्गवेदिनो मुनेः पुत्रो वभूवेति एकस्यैव शेषावतारस्य प्रसिद्धेर्भोजचक्रपाण्यादिसंवादाच्चायं भावमिश्रवर्णितश्चरकर्षिः पतञ्जलिरेवेति मन्यामहे। समीक्षामहे च पातञ्जलसूत्रैश्चरकसंहितायाः सौभ्रात्रम्। तथाहि "कतिधापुरुषीये" चरकः "चतुर्विंशतिरित्येष राशिः पुरुषसंज्ञकः" इति सांख्यमतमुपक्रम्य योगमेव मोक्षद्वारं प्रधानं प्रतिपादयति स्म—

"योगे मोक्षे च सर्व्वासां वेदनानामवर्त्तनम्।
मोक्षे निवृत्तिर्निःशेषा योगो मोक्षप्रवर्त्तकः॥
आत्मेन्द्रियमनोऽर्थानां सन्निकर्षात् प्रवर्त्तते।
सुखदुःखमनारम्भादात्मस्थे मनसि स्थिरे॥

निवर्त्तते तदुभयं वशित्वञ्चोपजायते ।
आविशश्चेतसो ज्ञानमर्थानां छन्दत: क्रिया ।
दृष्टि: श्रोत्रं स्मृति: कान्तिरिष्टतश्चाप्यदर्शनम् ॥
इत्यष्टविधमाख्यातं योगिनां बलमैश्वरम् ।
शुद्धसत्त्वसमाधानात्तत् सर्वमुपजायते ॥"

( च० शा० १ अ० )

—इत्यादिना बहुधा। पातञ्जलदर्शनोक्तैश्च "योगश्चित्तवृत्तिनिरोध:," "तदा द्रष्टु: स्वरूपेऽवस्थानम्[1]", "स्वविषयासम्प्रयोगे चित्तस्वरूपानुकार इन्द्रियाणां प्रत्याहार:", "तत: परमा वश्यतेन्द्रियाणाम्[2]" "बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेश:[3]," "परिणामत्रयसंयोगादतीतानागतज्ञानम्[4]," "श्रोत्राकाशयो: सम्बन्ध संयमाद्दिव्यं श्रोत्रम्[5]," "ततोऽणिमादिप्रादुर्भाव: कायसम्पत्तद्धर्म्मानभिघातश्च[6]", "कायरूपसंयमात् तद्ग्राह्यशक्तिस्तम्भे चक्षु:प्रकाशासंयोगेऽन्तर्धानम्[7]"—इत्यादिसूत्रै: चरकपाठसादृश्यं, सुग्रहं पातञ्जलप्रविष्टैरित्यलमतिप्रसङ्गेन ।

किञ्च रामभद्रदीक्षितप्रणीते पतञ्जलिचरितेऽपि श्रूयते पतञ्जलेर्वैद्यकसंहिताकारत्वम् । तदुक्तम्—

"सूत्राणि योगशास्त्रे वैद्यकशास्त्रे च[8] संहितामतुलाम् ।
कृत्वा पतञ्जलिमुनि: प्रचरयामास जगदिदं त्रातुम् ॥" इति

( पतञ्जलिचरितस्य ५म सर्गे )

न चासौ पतञ्जलि: केवलं चरकसंहिताकार एव, रसशास्त्रेऽपि तन्नामश्रवणात् । तथाहि चक्रदत्तटीकायां लौहपाकविधिव्याख्याने शिवदास:—

"पातञ्जले तु स्पर्शादिनाऽपि पाकज्ञानमुक्तम्—
तावल्लौहं पचेद्वैद्यो यावद्वस्त्रेण पीड़ितम् ।
समुद्रं जायते व्यक्तं न नि:सरति सन्धिभि: ॥" इत्यादि ।

---

१, समाधिपादे २।३ सूत्रद्वयम् । २, साधनपादे ५४।५५ सूत्रद्वयम् । ३, विभूतिपादे ३८ सूत्रम् । ४, तत्रैव १६ सूत्रम् । ५, तत्रैव ४२ सूत्रम् । ६, तत्रैव ४६ सूत्रम् । ७, तत्रैव २१ सूत्रम् । ८ "यानि कानि तत:"—इत्यपि क्वचित् पाठ: ।

लौहादिव्यवहारश्च चरकेऽपि दृश्यते। तदुक्तम्—

"एष एव च लौहानां प्रयोगः सम्यकीर्त्तितः।
अनेनैव विधानेन हेम्नश्च रजतस्य च।
आयुःप्रकर्षकृत् सिद्धः प्रयोगः सर्व्वरोगनुत्॥" इति
( चरक० चिकि० १अ० )।

चरके पारदव्यवहारोऽपि क्वाचित्को दृश्यत एव, यथा
"सर्व्वव्याधिनिवर्हणमद्यात् कुष्ठी रसञ्च निगृहीतम्" इति
( च० चिकि० ७ अ० )

केचित्त्वाहुः—भगवान् पतञ्जलिश्चरकस्य भाष्यं निर्म्ममे न पुनः स एव स्वयं प्रतिसंस्कर्त्तेति। तत्तुच्छम्, प्रमाणाभावात्। यदि हि नाम चरकस्य पातञ्जलभाष्यं कदाचिदपि प्रसिद्धमभविष्यत् तर्हि सहस्राधिकवर्षपुराणेषु चक्रपाणिदत्तादिव्याख्यानेषु किमिति तद्वार्त्तापि नाश्रोष्यत? न च वाच्यं, रसग्रन्थकारत्वेनैव पतञ्जलेर्वैद्यककारत्वसिद्धेरलमस्य संहिताप्रतिसंस्कर्त्तृत्वकल्पनयेति। चक्रपाण्यादिभिः स्पष्टं प्रतिसंस्कर्त्तृत्वाभिधानात्।

*पतञ्जलेः प्रादुर्भावकालः*

तदेवं भगवतः पतञ्जलेरग्निवेशसंहिताप्रतिसंस्कर्त्तृत्वे सिद्धे साम्प्रतं तत्कालनिर्णयाय ब्रूमः। पतञ्जलेः खल्वाविर्भूतस्य वर्षसहस्रद्वयं ( किञ्चिदधिकं वा ) समतीतमिति सम्प्रतिपद्यन्ते प्रायः सर्व्व एवेति वृत्तविदः प्राच्याः प्रतीच्याश्च। तत्प्रतिपादकानि प्रमाणानि तु तत्तदाकरेषु[1] मृग्यानि—नेह विस्तरभिया विचारयामः।

चरकसंहितापूरकः पुनर्दृढ़बलाचार्य्यः पञ्चनदपुरवास्तव्यः कश्चन भिषगतिप्राचीनः इति तदुक्त्या[2] प्रतिपाद्यते। कालः पुनरस्य पतञ्जलेर्व्वाम् वाग्भटादिसंग्रहकारेभ्यश्च प्रागिति शक्यमसंशयं वक्तुम्। यतः, पतञ्जलिप्रतिसंस्कृतायाश्चरकसंहितायाः चिकित्सास्थानशेषार्द्धं सह सिद्धिकल्पस्थानाभ्यां विलुप्तेऽसौ प्रादुरासीत्

*दृढ़बलस्य प्रादुर्भाव कालः ( प्रसङ्गतो वाग्भटकालश्च )*

तदापूरकः; संग्रहकारेषु पुराणतमो वाग्भटश्च दृढ़बलरचितान् चरकपाठान् क्वचित्किञ्चित्परिवर्त्तितान् समुद्धरति स्म बहुधा। वाग्भटश्च इत्सिङ्गाख्यबौद्धपरिव्राजकेन चीनदेशागतेन तदीयं-

---

१ Vide Goldstucker's Panini, pp. 233-34; also Prof. Bhandarkar's Indian Antiquary (1872), pp. 298-302. २ तदुक्तिश्च—"अखण्डार्थ दृढ़बलो जातः पञ्चनदे पुरे"—इत्यादिश्चरकचरमाध्याये द्रष्टव्या। ३ It sing's Buddhistic Practices in India (Translated by Prof. Takakusu) P. 128.

ग्रन्थे अष्टांगायुर्व्वेदसंग्राहको नवीनाचार्य्य इतीङ्गितेन निर्द्दिष्ट:, इत्सिंगश्च खीस्तीय-सप्तमशतके भारतं परिचक्रामेति सुपरिज्ञातं तद्वचसा। तदेवं प्रायस्तत्कालादर्द्ध-द्विशतीप्राक्तन: ( खीस्तीयपञ्चमशतकारम्भे वा ) वाग्भटकाल: स्यादिति प्रतीति-रितिहासविदाम्। दृढ़बलश्च वाग्भटानुसृतस्ततोऽपि वर्षशतद्वयं प्राक् सम्बभू-वेति कल्पनया तस्य प्रादुर्भूतस्य प्राय: सप्तदशशती वर्षाणां समतीतेत्याम-नन्ति मतिमन्त:।

सुश्रुतसंहिता पुनरियं लभ्यमाना कदा केन प्रतिसंस्कृतेति दु:शको निर्णय:। तत्राह सुश्रुतटीकायां डल्लन:,—"प्रतिसंस्कर्त्तापीह नागार्ज्जुन एवेति"। सुगमच्छेद-मनया निर्द्देशभङ्ग्या यत् स्वपूर्व्वतनै: कैश्चिद्व्याख्यातृभिरनुमतानामन्येषां प्रतिसंस्कर्त्तृत्वं प्रसक्तं निरस्यति डल्लन एवकारेणेति। चक्र-पाणिश्च स्वकृतायां भानुमत्याख्यसुश्रुतटीकायां सुश्रुतस्य प्रति-संस्कृतत्वमुरीकुर्व्वाणोऽपि नागार्ज्जुन एव तत्प्रतिसंस्कर्त्तेति नाशंसत्। तथाच शङ्कामहे, नागार्ज्जुनादय: केचिदासन्नेकाधिका: सुश्रुतप्रति-संस्कर्त्तृतया पूर्व्वं प्रसिद्धा:, न चात्र किम्वदन्तीमात्रमूलं निष्प्रमाणं डल्लनवचो विनिगमकमिति।

सुश्रुतप्रतिसंस्कर्त्ता नागार्ज्जुनो न वा ?

अथ चेन्नागार्ज्जुन एव सुश्रुतप्रतिसंस्कर्त्ता,—तथापि कोऽसाविति दु:शकं निर्णेतुम्। श्रूयन्ते ह्यनेके नागार्ज्जुना: प्राचीनेतिहासप्रसिद्धा:। तत्रैको नागार्ज्जुनो लोहशास्त्रप्रवक्ता[1] रसतन्त्राचार्य्य:, अपरस्तदाख्यो बौद्धनरपति: काश्मीरे[2]तिहासप्रसिद्ध:, अन्यश्च माध्यामिकमतप्रवर्त्तको महा-यानाख्यसम्प्रदायप्रतिष्ठापको बौद्धाचार्य्यो बौद्धेतिहासेषु[3] सुप्र-थितनामा। तत्राद्य: सिद्धनागार्ज्जुनो नाम कक्षपुटतन्त्र-रसरत्नाकरादि[4]कार:। स च नेपालप्रत्यान्तष्वासीत् कृताश्रम: इति तद्देशीया जनश्रुति:। न चासौ सुश्रुतप्रतिसंस्कर्त्तेति सम्भाव्यते, यत: तादृशेन रसतन्त्राचार्य्येण सकलरोगहरस्य रसेन्द्रस्याभ्यन्तरप्रयोग: समग्रसुश्रुतसंहितायां क्वचिदपि किमिति न निरदेशीति

कोऽसौ नागार्ज्जुन: ?

---

१ यथा चक्रसंग्रहे—"नागार्ज्जुनो मुनीन्द्र: शशास यल्लोहशास्त्रमतिगहनम्"—इति रसायनाधिकारे।
२ यथा राजतरङ्गिण्यां प्रथमतरङ्गे—"तदा भगवत: शाक्यसिंहस्य परनिर्वृते:। अस्मिन् महीलोकधातौ सार्द्धं वर्षशतं ह्यगात्। बोधिसत्वश्च देशेऽस्मिन्नेको भूमीश्वरोऽभवत्। स च नागार्ज्जुन: श्रीमान्—"इत्यादि।
३ For a full description of the subject, Vide Dr. P. C. Roy's History of Hindu Chemistry Vol. II, Introduction ४ अन्योऽपि रसरत्नाकरोऽस्ति नित्यनाथकृत: प्रसिद्धतर:।

दुरुत्तरः संशयः। तथाहि सुश्रुते द्रव्यसंग्रहणीयाध्याये,—"त्रपु-सीस-ताम्र-रजत-कृष्ण-लोह-सुवर्णानि लोहमलञ्चेति"—धातवश्चिकित्सोपयोगिनः संगृहीतास्तद्गुणाश्च अन्नपानविध्यध्याये वर्णिताः, न तु तत्र श्रूयते वार्त्तापि जराव्याधिविध्वंसिनोरसेन्द्रस्य[1]। न च नागार्ज्जुनाख्यो बौद्धनरपतिः प्रसिद्धबौद्धाचार्य्यो वा सुश्रुतप्रतिसंस्कर्त्तेति सुवचम्, प्रमाणाभावात्। अस्ति हि नागार्ज्जुनो नाम माध्यमिकसूत्रादिकारो बौद्धधर्म्माचार्य्यः सुप्रसिद्धो नत्वसौ वैद्यो वैद्यकप्रतिसंस्कर्त्ता वेति क्वचिद्दृश्यत उल्लेखो बौद्धग्रन्थेषु[2]। तस्माद्दुरुपपादमेवैतन्मतं—बौद्धनागार्ज्जुन एव सुश्रुतप्रतिसंस्कृर्त्तेति। नत्वेतावता प्रतिसंस्कृतत्वेऽपि सन्देहः सूक्ष्मदृशां, पूर्व्वोक्तप्रमाणबाहुल्यात्, शारीरस्थाने प्रत्यक्षविरुद्धप्रमादं[3]शतदर्शनाच्च।

*नागार्ज्जुनकालः*

यदि पुनरुरीक्रियते बौद्धनागार्ज्जुन एव सुश्रुतप्रतिसंस्कर्त्तेति तथापि सुश्रुतप्रतिसंस्कारस्य सम्प्रति वर्षसहस्रद्वयाधिकः कालो व्यतीत इति निर्व्विवादः सिद्धान्तः। नागार्ज्जुनो हि बौद्धाचार्य्यो द्विसहस्रवर्षतः पूर्व्वं समजनीति मतस्य सर्व्ववादिसम्मतत्वात्।

एवञ्च द्विसहस्रवर्षतः पूर्व्वमप्यायुर्व्वेदस्य प्रतिसंस्काराऽर्हता समभूदिति नात्र सन्देहावसरः कोऽपि। परतश्च प्रतिसंस्कारात् प्रादुर्बभूवुरनेके वाग्भट-माधव-वृन्द-चक्रपाणि-विजयरक्षित-श्रीकण्ठ-शार्ङ्गधर-भावमिश्रादयो वैद्यकसंग्रहकाराः व्याख्यातारश्चेत्यपि सुविदितं विदुषाम्। इदानीं पुनरेतेषामेव निबन्धान्

*आवर्षसहस्रद्वयम् आयुर्व्वेदस्य दशाविपर्य्यासः*

प्राचीनमतपिष्टपेषणव्रतान् सर्व्वायुर्व्वेदसारं मन्वानाः स्तुवन्ति च स्तुवन्ति च केचन धन्यम्मन्या भिषज इति हन्त नो दशाविपर्य्यासः। आर्षी तु बत सा प्रतिभा नियतनवीनतत्त्वान्वेषणपरायणा साम्प्रतं विलीनेव, नूनमथवा भूमण्डलस्य पूर्व्वार्द्धादस्तमिता पुनः पश्चिमार्द्धे समुदितेति चिन्तयतः कस्य नु प्रेक्षावतो भारतीयस्य न विषीदति हृदयम्?

किञ्च यदा निर्वर्णयामः, पूर्व्वोक्तानामनार्षनिबन्धकाराणां समयेऽपि

---

१ यत्तु सुश्रुते—"रक्तं श्वेतं चन्दनं पारदञ्च काकोल्यादिःक्षीरपिष्टश्च वर्गः" (सु० चि० २५ अ०) इत्यादि, तत्र पारदस्य बाह्यप्रयोग एवोपदिष्टो नाभ्यन्तरप्रयोगः। २ यत्तु तिब्बतीयबौद्धभिक्षुतारानाथकृते नागार्ज्जुनोपाख्याने (Life and Legends of Nagarjuna) नागार्ज्जुनस्य लोकातीतशक्तिसम्पन्नत्वमभिहितं क्वचिद् दैवविद्यानैपुणञ्च तेनापि सुश्रुतप्रतिसंस्कर्त्तृत्वकस्य नोच्यते। न च सर्व्वथा स्मृतिमात्रपरायणं द्विशतवर्षमात्रपूर्व्वजस्य तारानाथस्य वचः प्रमाणमितिहासविदाम्।

लभ्यन्ते स्म नानाविधाः प्राचीनार्षसंहिताः ( सांगा विकलांगा वा ), विलुप्त-प्रायाश्च ताः सर्व्वथैव साम्प्रतम्,—तदा समतीतवर्षसहस्रीयं वैद्यकध्वंसवृत्त-माकलयन्तः प्रणामो भारतभाग्यविधातारं विधातारमेव। यथा चासीदमीषां संहितानां सौलभ्यं सहस्रवर्षान्तस्तथाच सप्रमाणमनुपदं दर्शयिष्यामः।

तदेवमित्थं गते नानानार्षजनप्रतिसंस्कृतजीर्णाविशेषे वर्षसहस्रयुगीयलिपि-करप्रमाद-प्रक्षेपादिपरामृष्टे च प्रधानार्षसंहितादितये, सत्सु च तदुपजीविषु केषुचिदष्टाङ्गहृदय-भावप्रकाश-शार्ङ्गधर-चक्रदत्त-वङ्गसेनादिषु संग्रहग्रन्थमात्रेषु, सन्तमसाच्छन्नेषु च शारीर-वनौषधिविद्यादिष्वायुर्व्वेदपूर्व्वाङ्गेषु, प्रलीनप्रायेषु च कायचिकित्सावर्ज्जमपरेष्वायुर्व्वेदप्रधानाङ्गेषु सर्व्वथा प्रतिसंस्कारापूरणाभ्यां पुनः सञ्जीवनीयोऽयं निगूढ़शक्तिर्महाप्रभावः समग्रजगदेकाश्रयो वैद्यकवटतरुरिति कस्तावदत्र चक्षुष्मानुदासीत? एष हि हन्तायुर्व्वेदो विपन्नदीधितिरप्येतर्हि कायचिकित्साङ्गमात्रेण कथं कथमपि ध्रियमाणो निखिलभारतीयप्रजाप्राणत्राणाय प्रभविष्णुर्वहुधा परकीय-चिकित्साशास्त्रचन्द्रमसमद्यापि निष्प्रभीकरोति रविरिव पश्चिमाचलस्थः। न विद्मो, नवेन तेजसा समुदितः किं किमेष न विदधीत दशदिशः समुज्ज्वलयन्।

आयुर्व्वेदवटतरुः पुनः सञ्जीवनीयः

[ २ ]

अथैवमतिसंक्षेपादायुर्व्वेदस्य पुरावृत्तं किञ्चिदालोच्य सम्प्रति विलुप्तप्राचीन-गौरवं परिचाययितुं यतामहे। दर्शयिष्यामश्चाग्रे सकलचिकित्सा-शास्त्र मूलतामायुर्व्वेदस्यैव।

तत्र यदा पूर्व्वदर्शितदिशा ब्रह्मप्रजापत्यश्विवासवपरम्परयाऽभूदवतरणमायु-र्व्वेदस्य धन्वन्तरिभरद्वाजादिषु परमर्षिषु, सोऽयमस्य स्निग्धकान्तः प्रभातकालः, तमिह दैवकालमाचक्ष्महे। यत्र पुनः धन्वन्तरि-सुश्रुतादिसम्प्रदायत आत्रेयाग्नि-वेशादिसम्प्रदायतश्च द्विविधा प्रवृत्तिः, क्रमशः कार्य्यविभागादष्टांगवैद्यकतन्त्रकाराणां प्रादुर्भावश्च, तदेतखिलभूमण्डलोद्भासि मध्यन्दिनमायुर्व्वेदस्य—सोऽयमार्षकालः संहिताकालो वा। यस्तु पुनः प्राचीनविज्ञानारुणरागसंग्रहणः संग्रहकर्त्तां कालः सेयमपराह्णवेला हीयमानज्योतिषो वैद्यकस्य,—तं संग्रहकालमभिदध्मः। साम्प्रतं पुनरेष सम्प्राप्तः करालः सन्ध्यासमयो यत्र समुपचीयमाने गाढ़ान्धकारे न दृश्यते दर्शनीयं, न

आयुर्व्वेदस्य काल-चतुष्टयविभागः

क्रियते करणीयं, न च सम्यग् ज्ञायते पन्था गन्तव्यः। तथाप्याशास्महे—चक्रनेमिपरिवृत्तिन्यायेन पुनरपि समुदेष्यति नः पौर्णमासी रजनी, यत्र दिव्यालोकेन ज्ञास्यते शोभनो मार्गो महर्षिजनानुसृतः, सम्पत्स्यते च भूयोऽपि सैव सम्पदायुर्व्वेदस्येति।

तत्राद्यो देवकालः प्रभातकालो वा तत्रत्या वैद्यकग्रन्थाः

अथेदानीमायुर्व्वेदप्रभातसमये विरचितानां केषाञ्चिन्नाममात्रशेषाणां ग्रन्थानां परिचयमाख्यापयामः। तेषु चाद्या **ब्रह्मकृता** लक्षश्लोकमयी **संहिता**—इति श्रूयते। अन्यास्तानन्तरं बभूवुः क्रमात् संहिताः—**प्रजापतिसंहिता, अश्विसंहिता, वलभित्संहिता** चेति प्रतियन्ति वैद्यकविदः।

ब्रह्मवैवर्त्तपुराणे तु आयुर्वेदावतरणक्रमः किञ्चिद्भिन्न एवाख्यायते प्राचीनग्रन्थपरिचयश्चाश्रुतपूर्व्व एव। यथा—

ब्रह्मवैवर्त्त पुराणोक्त आयुर्व्वेदावतरणस्य क्रमभेदः तत्कालीन ग्रन्थपरिचयश्च।

"ऋग्यजुःसामाथर्व्वाख्यान् दृष्ट्वा वेदान् प्रजापतिः।
विचिन्त्य तेषामर्थञ्चैवायुर्व्वेदं चकार सः।
कृत्वा तु पञ्चमं वेदं भास्कराय ददौ विभुः।
स्वतन्त्रसंहितां तस्माद्भास्करश्च चकार सः।
**भास्करश्च** स्वशिष्येभ्य आयुर्वेदं स्व **संहिताम्** ॥
प्रददौ पाठयामास ते चक्रुः संहितास्ततः।
तेषां नामानि विदुषां तन्त्राणि तत्कृतानि च।
व्याधिप्रणाशबीजानि साध्वि मत्तो निशामय ॥
धन्वन्तरिर्दिवोदासः काशिराजोऽश्विनीसुतौ।
नकुलः सहदेवोऽर्किश्च्यवनो जनको बुधः।
जावालो जाजलिः पैलः करथोऽगस्त्य एव च।
एते वेदांगवेदज्ञाः षोडश व्याधिनाशकाः।
**चिकित्सातत्त्वविज्ञानं** नाम तन्त्रं मनोहरम्।
धन्वन्तरिश्च भगवान् चकार प्रथमे सति ॥
**चिकित्सादर्शनं** नाम दिवोदासश्चकार सः।
**चिकित्साकौमुदीं** दिव्यां काशिराजं[1]श्चकार च ॥

१ अत्र धन्वन्तरि-दिवोदास-काशिराजादीनां पृथक्त्वमङ्गीकृतमिति चित्रमेतत्।

चिकित्सासारतन्त्रञ्च भ्रमघ्नञ्चाश्विनोसुतौ ।
तन्त्रं वैद्यकसर्व्वस्वं नकुलश्च चकार सः ॥
चकार सहदेवश्च व्याधिसिन्धुविमर्द्दनम् ।
ज्ञानार्णवं महातन्त्रं यमराजश्चकार ह ॥
च्यवनो जीवदानञ्च चकार भगवानृषिः ॥
चकार जनको योगी वैद्यसन्देहभञ्जनम् ।
सर्व्वसारं चन्द्रसुतो जावालः तन्त्रसारकम् ॥
वेदाङ्गसारं तन्त्रञ्च चकार जाजलिर्मुनिः ।
पैलो निदानं करथस्तन्त्रं सर्व्वधरं परम् ।
द्वैधनिर्णयतन्त्रञ्च चकार कुम्भसम्भवः ॥
चिकित्साशास्त्रवीजानि तान्येतानि हि षोड़श ।
व्याधिप्रणाशवीजानि वलाधानकराणि च ॥
मथित्वा ज्ञानमन्थेनैवायुर्वेदपयोनिधिम् ।
ततस्तस्मादुदाजह्रुर्नवनीतानि कोविदाः ॥"

( इति ब्रह्मवैवर्त्तपुराणस्य ब्रह्मखण्डे १६ अ० )

दृश्यते चान्योऽपि सुप्रसिद्धमतविलक्षणो वैद्यकावतरणक्रमश्चरकचिकित्सास्थानारम्भेऽपि । तद्यथा—

"अथात आयुर्वेदसमुत्थानीयं रसायनपादं व्याख्यास्याम इति ह स्माह भगवानात्रेयः ॥ ऋषयः खलु कदाचिच्छालीना यायावराश्च ग्राम्यौषध्याहाराः सन्तः साम्पन्निका मन्दचेष्टा नातिकल्याणाश्च प्रायेण बभूवुः । ते सर्वासामितिकर्त्तव्यतानामसमर्थाः सन्तो ग्राम्यवासकृतं दोषं ज्ञात्वा पूर्वनिवासमपगतग्राम्यदोषं मत्वा शिवं पुण्यमुदारं मेध्यमगम्यमसुकृतिभिर्गङ्गाप्रभवममरगन्धर्व्वयक्षकिन्नरानुचरितमनेकरत्ननिचयमचिन्त्याद्भुतप्रभावं ब्रह्मर्षिसिद्धचारणानुचरितं दिव्यतीर्थौषधिप्रभवमतिशरण्यं हिमवन्तममराधिपतिगुप्तं जग्मुर्भृग्वङ्गिरोऽत्रिवशिष्ठकश्यपागस्त्यपुलस्त्यवामदेवासितगौतमप्रभृतयो महर्षयः ॥

"तानिन्द्रः सहस्रदृगमरवरोऽब्रवीत्—स्वागतं ब्रह्मविदां ज्ञानतपोधनानां ब्रह्मर्षीणामस्ति ननु वो ग्लानिरप्रभावत्वं वैस्वर्य्यं वैवर्ण्यञ्च ग्राम्यवासकृतमसुखानुबन्धञ्च । ग्राम्यो हि वासो मूलमशस्तानाम् । तत् कृतः पुण्यकृद्भिरनुग्रहः प्रजानां स्वशरीरमवेक्षिभिः । कालश्चायमायुर्वेदोपदेशस्य ब्रह्मर्षीणामात्मनः प्रजानाञ्चानु-

ग्रहार्थम्। आयुर्वेदमश्विनौ मह्यं प्रायच्छतां, प्रजापतिरश्विभ्यां, प्रजापतये ब्रह्मा, प्रजानामल्पमायुर्ज्जराव्याधिबहुलमसुखमसुखानुबन्धम् अल्पत्वादल्पतपोदमनियमदानाध्ययनसञ्चयं मत्वा। तं पुण्यतममायुःप्रकर्षकरं जराव्याधिप्रशमनमूर्ज्जस्करममृतं शिवं शरण्यमुदारं भवन्तो मत्तः श्रोतुमर्हन्त्युपधारयितुं प्रकाशयितुञ्च प्रजानुग्रहार्थमिति। तच्छ्रुत्वा विबुधपतिवचनमृषयः सर्वं एवामरवरमृग्भिस्तुष्टुवुः प्रहृष्टास्तद्वचनमभिननन्दुश्चेति ॥

"अथेन्द्रस्तदायुर्वेदामृतमृषिभ्यः संक्रम्योवाचैतत् सर्व्वमनुष्ठेयम् ॥ इत्यादि"

( चरक चिकित्सास्थान० १ अ० )

तदेतत् सुप्रसिद्धमतविलक्षणं कल्पद्वयमायुर्वेदावतरणस्य, पौराणिकवृत्तानां कल्पभेदकल्पनया वा ब्रह्मेन्द्रादिगुरूणामनेकशिष्योपदेशसम्भावनया वा समाधानीयमिति दिक्। अथवा सुप्रसिद्धेऽपि वैद्यकस्य वेदांगत्वे, चरकसुश्रुतयोर्दृश्यते अथर्व्ववेदस्यैवायुर्व्वेदप्रभवता वर्णिता, चरणव्यूहे तु ऋग्वेदस्यैव, इति मतभेदः सर्वत्रैव सोढव्यः। तथाहि—

"भिषजा पृष्टेनैवं चतुर्णां वेदानामात्मनोऽथर्ववेदे भक्तिरादेश्या—"इति चरकः (सूत्रस्थाने ३० अ०)। "आयुर्व्वेदो नाम यदुपाङ्गमथर्व्ववेदस्ये"ति सुश्रुतः ( सूत्रस्थाने १ अ० ) "ऋग्वेदस्यायुर्व्वेद उपवेदः"—इति चरणव्यूहे कात्यायनः। समाधानञ्चात्र ऋगवेदस्याद्यवेदत्वेन आयुर्व्वेदमूलता, वैद्यकविस्तरस्य पुनरथर्व्ववेदे विशेषेण दर्शनात् तदुपांगतायुर्व्वेदस्येति केचित्। पौर्व्वापर्य्यञ्च वेदेष्वप्यस्तीति मतं तु सुप्रसिद्धवेदाचार्य्येण स्वर्गतेन तत्रभवता सत्यव्रतसामश्रमिणा प्रतिपादितं तदीयत्रयीचतुष्टयाख्ये ग्रन्थे इत्यलमस्मादृशामल्पधियामपारकालसागरसन्तरणप्रयासेन।

अथास्य वैद्यकप्रभातकालस्य इयत्कालतया इयत्कालपूर्व्वतनतया वा निर्णयः सर्व्वथा अशक्य एवास्माकम्। साहसिकाः पुनः केचन पाश्चात्याः षट्सहस्रवर्षमात्रपरिच्छिन्नां विधातुः सृष्टिं मन्वानाश्चतुःसहस्रवर्षतः प्राक्तनमेनं कालं मन्यन्ते। वयन्तु स्मरणातीतोऽयमतिपुराणो दैवयुगाख्यः काल इत्येतावता विरमामः।

अथैवमायुर्व्वेदावतरणादर्वागधिगतविद्या महर्षयो विरचयाम्बभूवुरनेकानि तन्त्राणि, तैश्च गजाश्वायुर्व्वेदादिनानोपाङ्गं मानुषचिकित्साशास्त्रं लोके परां प्रतिष्ठामयासीत्। कालश्चायमायुर्व्वेदस्य मध्यन्दिनभूतः संहिताकाल आर्षयुगं वेत्यवोचाम। स च

आयुर्व्वेदस्य मध्यन्दिनम्— आर्षकालः

सार्द्धवर्षसहस्रद्वयात् प्राक्तन एकाधिकसहस्रवर्षव्यापो चेति निश्चयोऽस्माकम्। यतो ह्रीयमाने वैदिकाचारगौरवे प्रलीनप्राये च महर्षिगणतीव्रप्रभावे सम्बभूव नवीनधर्म्मप्रवर्त्तको भगवान् शाक्यसिंहः, स च सार्द्धवर्षसहस्रद्वयेन पुराणः। दर्शितपूर्वञ्चेदं यथा द्विसहस्रवर्षतः किञ्चित् पूर्व्वं चरकादीनां वैद्यकप्रतिसंस्कर्त्तॄणां प्रादुर्भावात् प्रतिसंस्कारार्हता वैद्यकस्य तदैव समभूदिति, अतीतवर्षसहस्रद्वयान्तश्च प्रादुर्भूता दृढ़बलवाग्भटाद्याः वैद्यकाचार्य्याः इति च। एवञ्च ततोऽपि वर्षसहस्रार्द्धात् पूर्व्वमार्षयुगावसानं सम्भाव्यते।

एष चार्षयुगीयानां संहिताग्रन्थानां परिचयः, स च दिष्ट्याऽद्यादि लभ्यत एव लभ्यमाननिबन्धेषु टीकासु चेति नास्ति तेषां सत्तायां सन्देहः।

## [ तत्र कायचिकित्सा-तन्त्राणि ]

१। अग्निवेशसंहिता।—तदेतदग्निवेशमहर्षिकृतमात्रेयसाम्प्रदायिकानां प्रधानं तन्त्रम्। तत्पाठांश्च बहुधा समुद्धरन्ति टीकाकृतः। तद्यथा—

चरकटीकायां चक्रपाणिः—

"यदुक्तमग्निवेशेन—कर्षार्द्धं वा कणाशुण्ठ्योरिति।" (च० सूत्र० २ अ०)

एष पाठश्चक्रसंग्रहेऽपि दृश्यते, व्याख्यातश्च शिवदासेन 'अग्निवेशोक्तेयं परिभाषेति'। षड़ङ्गपरिभाषाऽपि शिवदासेन तादृगेव निर्द्दिष्टा।

पुनः निदानटीकायां विजयरक्षितः—

"वातपित्तकफैः सप्त-दश-द्वादशवासरान्।
प्रायोऽनुयाति मर्य्यादा मोक्षाय च वधाय च॥—

इत्यग्निवेशमते प्रायोग्रहणेन द्वैगुण्यमिति"।

श्रीकण्ठोऽपि वृन्दकृतसिद्धयोगटीकायामाह—

"तथाचाग्निवेशः—

प्रवेपमाने ज्वरिते शीते हृष्टतनूरुहे।
कट्यूरुजङ्घापार्श्वास्थिशूलिनि स्वेदनं हितम्"—इत्यादि।

(ज्वराधिकारे)

यतश्चैते पाठा लभ्यमानचरकसंहितायां न दृश्यन्ते, तस्मादितः पृथगेवासीदग्निवेशतन्त्रमिति स्वीकार्य्यमेव।

सुश्रुतप्रतिसंस्कर्त्ताऽपि स्पष्टमग्निवेशादितन्त्राणां पूर्व्वसत्तामुरीचकार—

"षट्सु कायचिकित्सासु ये चोक्ताः परमर्षिभिः" इत्यादिना उत्तरतन्त्रादौ।

वाग्भटश्च—"तेभ्योऽतिविप्रकीर्णेभ्यः प्रायः सारतरोच्चय" इत्याद्यष्टाङ्गहृदय-प्रस्तावनायामग्निवेशादितन्त्राणि स्पष्टमुद्दिदेश।

अञ्जननिदानाख्यश्च ग्रन्थः अग्निवेशमहर्षिकृत एवेति केचित्। तत्र नो महान् सन्देहः, यतस्तत्र दृष्टेषु केषुचित् पाठेषु चरकसंहितायां वर्त्तमानेष्वपि तत्रत्याः केचन पाठाः वर्त्तमानसुश्रुतसंहितायामेव दृश्यन्ते न चरके। यथा—

"दूषयित्वा रसं दोषा विगुणा हृदयं गताः
हृदि बाधां प्रकुर्व्वन्ति हृद्रोगं तं प्रचक्षते॥" इति—

( सु० उत्तर० ४३ अ० )।

किञ्च,—

"गुदस्य द्व्यङ्गुले चैत्रे पार्श्वतः पिडकार्त्तिकृत्।
भिन्नो भगन्दरो ज्ञेयः स च पञ्चविधो मतः।"—

इति माधवधृतः पाठश्चरकसुश्रुतवाग्भटेषु न दृश्यते, दृश्यते चाञ्जननिदाने इति तत्कारस्य माधवपरभावित्वमाशङ्क्यते। ननु माधव एवाञ्जननिदानादेनं पाठमुद्धारेति चेत्, तथापि माधवस्य प्राथम्येन निदानकारत्वप्रसिद्धेः, चक्रपाणि-विजयरचित-श्रीकण्ठादिभिश्च क्वचिदपि अञ्जननिदानपाठस्यानुद्धारात्, क्वचित् चपलरचनादर्शनाच्च युज्यत एवात्र प्रेक्षावतां संशयः।

तदेतदञ्जननिदानमग्निवेशमहर्षिकृतं माभूत्, तथापि अतिसंक्षेपेणाऽप्यतिरमणीयतया वर्णितमत्र रोगाणां निदानमिति परमव्युत्पादकमिदमल्पधियां मन्यामहे।

२। भेलसंहिता।—सेयमात्रेयसाम्प्रदायिकानां द्वितीया संहिता साम्प्रतं ताञ्जोरनगरीश्वरराजकीयग्रन्थागारे[१] वर्तमानाऽपि न सर्व्वैः सुलभा। सति वा तत्सौलभ्ये नाधिकफलं सम्भाव्यते। कथमन्यथा वाग्भटः—

"ऋषिप्रणीते प्रीतिश्चेन्मुक्त्वा चरकसुश्रुतौ।
भेलाद्याः किं न पठ्यन्ते तस्माद् ग्राह्यं सुभाषितम्।" इति—

( अष्टाङ्ग-हृदय-समाप्तौ )

१ Vide Burneil's Catalogue; also Dr. Hoernle's Medicine of Ancient India p. 37.

भेलसंहिता चेयं भालुकितन्त्रादभिन्नेति केचित्। तन्न। डल्लनेन तदुभयोः पृथङ्निर्देशात्। तथाहि सुश्रुतटीकायां ज्वरप्रतिषेधव्याख्याने डल्लनः—

"इदानीं भेल-भालुकि-पुष्कलावतादीनामल्पतन्त्रविदां मतेन विषमज्वरोत्पत्तिमभिधाय"—इत्यादि। ( सुश्रुतटीका० उत्तरतन्त्र० ३८ अ० )

भालुकितन्त्रस्य शल्यतन्त्रत्वेन पृथगुपलम्भाच्च। दृश्यतामग्रे भालुकितन्त्रप्रसङ्गः।

भेलसंहितापाठाश्च बहुधा टीकाकृद्भिरुद्धृताः। तत्र दिङ्मात्रं यथा—

निदानटीकायां ज्वराधिकारे विजयरक्षितः—

"भेलेऽपि पैत्तिकः पठ्यते—

आमाशयस्थः पवनो ह्यस्थिमज्जगतोऽपि वा।

कुपितः कोपयत्याशु श्लेष्माणं पित्तमेव च। इति"

शिवदासश्च—

"नागरं देवकाष्ठञ्च धन्याकं बृहतीद्वयम्।

दद्यात् पाचनकं पूर्वं ज्वरिताय ज्वरापहम्॥"—

इति चक्रसंग्रहोक्तं पाठं भेलस्येति निर्दिशति।

"ताञ्जोरग्रन्थसूची"-कारो वार्णेलाख्यः पाश्चात्यबुधस्तु—वाग्भटस्योपजीव्यमभूत् प्राधान्येन भेलतन्त्रमेवेत्याह। तच्च वाग्भटस्य "भेलाद्याः किं न पठ्यन्ते"—इत्यधिक्षेपवचनेन कथमिव समञ्जसं स्यात्, डल्लनोक्तमल्पतन्त्रज्ञत्वञ्च वा भेलस्य कथं संगच्छेतेत्यपरीक्षितभेलतन्त्रा वयं नालं निर्णेतुम्।

३। **जतूकर्णसंहिता**—सेयमात्रेयसाम्प्रदायिकानामाद्दता संहिता साम्प्रतमतिदुर्लभा। तत्पाठाश्च बहुधा प्रायः सर्वैरपि टीकाकृद्भिरुद्धृताः। तद्यथा—चरकटीकायां चक्रपाणिः—

"तथाच जतूकर्णः—

पृश्नी-गोकण्टक-गुडैर्मूत्रार्त्तिवस्तिशूलनुत्।"

(च० सूत्र० २ अ०) इति।

पुनस्तत्रैव—"यदाह जतूकर्णः—

पक्वाऽथाम्बुशतप्रस्थे दशभागस्थितेन तु।

तैलप्रस्थं पचेत्तेन छागगोक्षीरेण संयुतम्॥" ( च० सूत्र० ५ अ० )

"यदुक्तं जतूकर्णे—दोषाणां धातूनामोजोमूत्रशकृदिन्द्रियमलायनानामष्टादश चयास्ते लक्ष्याः स्वगुणक्रियानाशात्।" इति च।

अथ निदानटीकायां विजयरक्षितः—

"जतूकर्णेनाप्युक्तं—जीर्णस्त्रयोदशदिवसः इति।"

(ज्वराधिकारे)

"यदाह जतूकर्णः—'आद्यास्तिस्रो दुःसाध्याः, यमिका मोहतृष्णावतः सद्यः प्राणहृत्।' इति" च (हिक्काश्वासाधिकारे)

श्रीकण्ठोऽपि निदानटीकायामेव—

"जतूकर्णेऽप्युक्तं—'कुपितेन वायुना दीपस्येवाग्नेर्निर्वापणं, पित्तेनोष्णजलवत् कफेनाम्बुवत्'—इति।" (क्षुद्ररोगाधिकारे)

एवं शिवदासोऽपि चक्रसंग्रहटीकायां बहुधा जतूकर्णपाठानुद्धरतीति दिक्।

इत्यञ्च जतूकर्णसंहिताख्योऽयं गद्यात्मकरचनाभूयिष्ठो महाग्रन्थः शिवदाससमयेऽपि सुलभोऽभूदिति सुप्रतिपादम्। शिवदासश्च समाहृतटीकाकारेष्वर्वाचीनतम इत्यग्रे दर्शयिष्यामः।

४।५। **पराशरसंहिता, क्षारपाणिसंहिता** च।—तदेतन्तन्त्रद्वयं न केवलं विजयरक्षितश्रीकण्ठाभ्यां बहुधा समुद्धृतपाठम्, अपितु शिवदाससमयेऽपि तत्सौलभ्यमासीदिति ज्ञायते चक्रसंग्रहटीकोद्धृतैः पाठैः। तद्यथा— ग्रहणीचिकित्साव्याख्याने शिवदासः—

"यदाह पराशरः—

निर्वाहयेत्[१] सफेनञ्च पुरीषं यो मुहुर्मुहुः।
प्रवाहिकेति साख्याता कैश्चिन्निश्चारकस्तु सः॥" इति

पुनः कासचिकित्सितव्याख्याने स एव—

"यदाह क्षारपाणिः—

पिप्पल्यामलकं द्राक्षा खर्ज्जूरं शर्करा मधु।
लेहोऽयं सघृतो लीढ़ः पित्तक्षयजकासजित्॥" इति।

६। **हारीतसंहिता**। सेयं चक्रपाणि-विजय-श्रीकण्ठ-शिवदासादि-समये सुलभाऽपि साम्प्रतं सुदुर्लभा संवृत्ता। न च मुद्रितप्रसिद्धा हारीतसंहिता

---

१ अत्र प्रवाहयेदिति युक्ततरः पाठः प्रतिभाति।

स्वप्नेऽपि प्राप्नोति सम्भाव्यं, पूर्व्वोक्तहेतुशतसद्भावात्। चक्रादिभिर्वदासान्ते-व्याख्याकारैरुद्धृतानां पाठानां तत्रादर्शनाच्च। दिङ्मात्रमुदाह्रियते।

तत्र चरकटीकायां चक्रपाणिः—

"उक्तञ्च हारीते—

नानापुष्पप्रकाराणां रससारात्मकं मधु।
तच्छैत्यात् सौकुमार्य्याच्च सर्व्वैरुष्णैर्विरुध्यते॥" इति

( च० सूत्र० २३ अ० व्याख्याने )

तथा निदानटीकायां विजयः—

"तथाच हारीतो व्याहरति—

चातुर्थको नाम गदो दारुणो विषमज्वरः।
शोषणः सर्वधातूनां बलवर्णाग्निनाशनः।
* * * * *"

—इत्यादि ( ज्वराधिकारे )

तत्रैव विद्रधिनिदानव्याख्याने च स एव—

"ऊर्द्ध्वं प्रभिन्नेषु मुखान्तराणां
प्रवर्त्ततेऽसृक्सहितोऽपि पूयः।" इत्यादि—

ते चैते पाठा मुद्रितहारीतसंहितायां क्वचिदपि न दृश्यन्ते इति परमार्थतो हारीतसंहिताया अपि तुल्यमेव दौर्लभ्यम्।

७। **खरनादसंहिता।** साऽपीयमात्रेयसाम्प्रदायिकानामेव संहिता। तत्प्रसङ्गाश्च यथा—

ज्वरनिदानटीकायां विजयः—

"इति षड़ात्रिकः प्रोक्तो नवज्वरहितो विधिः।
अतःपरं पाचनीयं शमनं वा ज्वरे हितम्॥—

इति खरनादवचनञ्च पूर्व्ववदष्टाहप्रतिपादकं द्रष्टव्यम्।" इति।

वाग्भटटीकायां हेमाद्रिश्च—

"यदाह खरनादः—

रसशेषे हितः स्वप्नो घर्म्माम्बु लघुभोजनम्"—इत्यादि।

( अष्टाङ्ग हृदय० सूत्र० ८ अ० टीकायाम्)

---

१ मुद्रणञ्च हारीतसंहिताख्यस्यास्य निबन्धस्य कलिकातायां कविराज कालीशचन्द्रे ण, मुम्बय्याञ्च तदनुसारिणा केनचित् कृतमिति प्रसिद्धम्।

हेमाद्रिणा खारणादिनाम्नाऽपि केचिदुद्धृताः पाठाः। ते खरनादस्यैव, अन्यस्य वा खरनादपुत्रस्येति न सम्यग् ज्ञायते। अरुणदत्तोऽपि खरनादपाठान् बहुधा समुद्धार।

८। **विश्वामित्रसंहिता**।—तदेतदतिप्राचीनं तन्त्रं चक्रपाणिना समुद्धृतपाठं चरकटीकायां सुश्रुतटीकायाञ्च। तत्र दिक्—

"यदुक्तं विश्वामित्रेण—

तड़ागजं दरीजञ्च तड़ागाद् यत् सरिज्जलम्।
वलारोग्यकरं तत् स्याद् दरीजं दोषलं स्मृतम्॥" इति—
( चरकटीकायां सूत्र० २७ अ० )

यदुक्तं विश्वामित्रेण—

सूक्ष्मकेशप्रतीकाशा वीजरक्तवहाः सिराः।
गर्भाशयं पूरयन्ति मासाद्वीजाय कल्पते॥" इति
( सुश्रुतटीकायां सूत्र० १४ अ० )

शिवदासोऽपि विश्वामित्रपाठमुद्धरति मुष्ककवर्णनावसरे। यथा—

"यदाह विश्वामित्रः—

श्वेतपुष्पः कृष्णपुष्पो रक्तपुष्पस्तथैव च।
पीतोऽन्योऽपि वरस्तेषु कृष्णपुष्पः प्रकीर्त्तितः॥" इति—
( चक्रटीकायामर्शोऽधिकारे )

८। **अत्रिसंहिता** (?)—सेयमतिप्राचीना संहितेति केचित्, अर्व्वाचीनेन केनचिन्निर्मितेत्यपरे। यतश्च प्राचीनटीकाकारैरस्याः संहितायाः पाठा न दृश्यन्ते प्रायः समुद्धृताः—(अस्माभिश्च क्वचिदपि तत्पाठा नासादिताः)—ततोऽस्याः प्राचीनत्वे संशयानाः स्मः। श्रुतं पुनरस्माभिरद्यापि पञ्चनदेषु क्वचिल्लभ्यत एव सुमहानत्रिसंहिताख्यो ग्रन्थः।

तान्येतानि कायचिकित्साप्रधानतन्त्राण्यार्षाणि अद्यावधि लब्धपरिचयान्यस्माभिः।

---

१ संहितेयं प्रायः कायचिकित्साप्रसङ्गेष्वेव समुद्धृतपाठा इत्यस्या इह कायचिकित्सातन्त्रेष्वन्तर्भावः सम्भावितः।

## [ अथ शल्यतन्त्राणि ]

१०।११ । **औपधेनवतन्त्रम् औरभ्रतन्त्रञ्च ।** तदेतत् तन्त्रद्वितयं सम्प्रति सर्व्वथा नाममात्रावशेषमेव यतस्तदुद्धृतप्रमाणान्यपि विरलानि। तत्सत्ता तु "उपधेनवमौरभ्र"मित्यादिसुश्रुतीयश्लोकेन समुन्नेयैव। डल्लनेन च "दोषोऽल्पोऽहितसम्भूत—"इत्यादिसौश्रुतपद्यव्याख्याने ( सु० उत्तर० ३८ अ० ) औपधेनवमतमिदमिति निरदेशि।

१२ । **सौश्रुततन्त्रं वृद्धसुश्रुत**ापरपर्य्यायम्। तच्च लभ्यमानसुश्रुत-संहिताया मूलभूतम्। ये तु केचिदाहुरनयोरभेदं, तन्मतनिरासाय किञ्चिदुक्त-पूर्व्वं सुश्रुतसंहिताप्रसङ्गे। दर्शितं च तत्र पर्य्याप्तं विदेहाधिपादीनां नामकीर्त्तनादि प्रमाणम् लभ्यमानसुश्रुतग्रन्थस्य अनाद्यत्वप्रतिपादनाय। अन्यच्च किञ्चिदस्मत्-सुहृदो राजवैद्यश्रीमद्विरजाचरणकविभूषणस्य कृतेर्वनौषधिदर्पणस्य उपोद्घात-प्रसङ्गादुद्धृत्य दर्शयामः।

माधवीयनिदानटीकायां आगन्तुज्वरव्याख्याने विजयः—

"पुष्पेभ्यो गन्धरजसो ओजस्विभ्यो यदानिलः—इत्यादिना वृद्धसुश्रुतेन पठितं तृणपुष्पाख्यं ज्वरमत्रैवान्तर्भावयन्ति।" इति। नैष पाठो लभ्यमानसुश्रुत-संहितायां दृश्यते।

सिद्धयोगटीकायामर्शोऽधिकारे "पिप्पल्यादितैल" व्याख्यानप्रसङ्गे श्रीकण्ठश्च—

"वृद्धसुश्रुते तु तैलेऽस्मिं श्चतुर्गुणं तोयं दर्शितं तद्यथा—'शटीकृष्णे'त्यादि। लभ्यमानसुश्रुते पिप्पल्यादितैलप्रसङ्ग एव नास्ति कुतोऽयं पाठः ?

एवं चक्रसंग्रहस्य वातव्याध्यधिकारे शाल्वणस्वेदव्याख्यानप्रसङ्गे शिवदासोऽपि—

"वृद्धसुश्रुते तु काकोल्यादिर्यथा"—इत्युपक्रम्य पद्यमयं काकोल्यादिगणमुद्-धार। लभ्यमानसुश्रुते तु काकोल्यादिगणो गद्यमयो दृश्यते, न पद्यमयः ( सु० सू० ३८ अ० )—इति दिक्।

एवञ्च सर्व्वाधस्तनकालीनस्य शिवदासस्य समयेऽपि वृद्धसुश्रुतस्य सौलभ्य-मासीदिति विज्ञायते। न विद्मः,—सम्यगन्वेषणेन जातु पुनर्लभ्येत वाऽद-स्तन्त्रमिति।

१३ । **पौष्कलावततन्त्रम् ।** तच्च "उपधेनवमौरभ्र" मित्यादि-प्रसिद्धसौश्रुतपद्ये निर्द्दिष्टमुद्धृतपाठञ्च टीकाकारैः। यथा भानुमत्यां चक्रपाणिः—

"पुष्कलावतेऽप्युक्तम्—आहारस्य यत् परं धाम तदग्निना रञ्जितं रक्तत्वं प्रतिपद्यते—तत् सौम्याग्नेयत्वादुष्णद्रवैशाभिवर्द्धते" इति (सु० सू० १४ अ० व्याख्याने)।

१४। **वैतरणतन्त्रम्**। एतदपि बहुधा समुद्धृतपाठम् प्राचीनैर्व्याख्यानकारैः। तथाहि सुश्रुतटीकायामस्नरीचिकित्सिते डल्लनः—

"तथाच वैतरणः—

भगस्याधः स्त्रिया वस्तिरूर्द्ध्वं गर्भाशयाश्रिता।
गर्भाशयश्च वस्तिश्च महास्रोतःसमाश्रितौ।
वस्तिभागं समुन्नम्य चावनम्याश्मरीं बुधः।
स्फिगग्रे वेधनं तासां हितमन्यत्र दोषकृत्॥" इत्यादि—

चक्रपाणिरपि सुश्रुतटीकायां वैतरणपाठमुद्दधार यथा—

"उक्तञ्च वैतरणे—

सर्व्वंशस्तु निशां प्राप्य प्रलेपन्तु निवर्त्तयेत्।"

* * * * * इत्यादि (सु० सू० १८ अ०)

यतश्च व्रणबन्धनादिलक्षणविशेषाः शस्त्रचिकित्सितविशेषाश्च सुश्रुतेऽनुक्ता बहुधा वैतरणतन्त्रादुद्धृत्य टीकाकारैर्दर्शितास्तत्र तत्र व्याख्याने, ततः सम्भावयामो लभ्यमानसुश्रुतसंहिताया बृहत्तरोऽसौ ग्रन्थोऽभूदिति।

१५। **भोजतन्त्रम् (भोजसंहिता** वा)—तदेतत् शल्यतान्त्रिकाणामतिबृहत् तन्त्रमिति शतशस्तदुद्धृतपाठैर्जानीमः। भोजश्च सुश्रुतादिसतीर्थ्यो महर्षिरिति डल्लनेन सुश्रुतटीकायां व्याख्यातम्। तथा च नासौ धारेश्वरो नृपतिरिति शङ्कनीयम्। सन्ति तु धारेश्वरभोजकृता अपि राजमार्त्तण्डादयो वैद्यकसंग्रहग्रन्थाः, ते भोजसंहितापेक्षया भृशमर्व्वाचीनाः। समापतन्ति च ते वैद्यकापराह्नकालीनेषु ग्रन्थेषु। भोजराजापेक्षया भोजमुनेर्बहुप्राचीनत्वाच्च क्वचिदस्य वृद्धभोजसंज्ञयापि व्यपदेशः।

भोजसंहितापाठांश्च नैकधा समुद्धरन्ति वैद्यकटीकाकृतः सर्व्वेऽपि। दिङ्मात्रमिहोदाहरामः।

तत्र डल्लनः। "तथाच भोजः—

शस्त्रं व्रीहिमुखं कार्य्यमङ्गुलानि षडायतम्।
द्व्यङ्गुलं तस्य वृन्तं स्यात् तत्फलं चतुरङ्गुलम्॥" इति—

(इति सु० सू० ८ अ०)

---

१ संहिता तन्त्रञ्चेति तुल्यार्थं पदद्वयं वैद्यके। अतएवाग्निवेशसंहिताया अग्निवेशतन्त्रमित्यपि प्रसिद्धिः।

पुन: शारीरस्थाने डल्लन:—

"तदुक्तं भोजे—

"हस्तपादाङ्गुलितले कूर्च्चेषु मणिबन्धयो:।
बाहुजङ्घाद्वये चापि जानीयान्नलकानि तु ॥" इति
( सु० शा० ५ अ० )।

चक्रपाणिश्च सुश्रुत शस्त्रावचारणीयाध्यायव्याख्याने भोजकृतान्येव लक्षणानि बहुश उदाजहार ( द्रष्टव्यतां सु० सू० ८ अ० व्याख्यानम् )।

अन्येऽपि चक्रपाणिसमुद्धृता: पाठा यथा -

"यदुक्तं भोजे—

संव्यूहिमस्तथा पाक्यो द्विविध: क्षार इष्यते।
पाक्यस्तु सप्रतीवापस्तीक्ष्णोऽन्यस्तु भवेत् पुन: ॥" इति
( सु० सू० ११ अ० व्याख्याने )।

"भोजेऽपि—

लोहिता मर्म्मगा: कृष्णा: कर्णपालिस्थिता: सिरा:।" इत्यादि
( सु० सूत्र० १६ अ० व्याख्याने )।

"तथा भोजेऽपि—

व्रणोदराध्मापनपीड़ितानां
प्रमेहिणां छर्द्यतिसारिणाञ्च।
द्रवं न दद्यादथवापि कोष्णं
स्वल्पं हितं भेषजसंस्कृतञ्च ॥"
इति च ( सु० सूत्र० १८ अ० व्याख्याने )।

एवं विजयरक्षितोऽपि माधवीयनिदानटीकायां बहुशो यथा—

"भोजादौ त्वियं विस्रंसीति नाम्ना पठ्यते" इति।

"तथाच भोज:—

कासो ज्वरो रक्तपित्तं त्रिरूपं राजयक्ष्मणि।"
इति ( तत्रैव कासाधिकारे )।

"यदाह भोज:—

स्तब्धाङ्गदृष्टिर्भवति गूढ़ोच्छ्वासस्तथैव च।
दर्शनादस्त्रजस्तज्जाद्गन्धाच्चैव प्रमुह्यति ॥"
इति ( मूर्च्छाधिकारे )।

श्रीकण्ठोऽपि तत्रैव स्वकृतव्याख्यानांशे बहुधा भोजतन्त्रतः पाठानुद्धृत्य तत्रात्मनो दृढ़भक्तिमाख्यापयति। तत्रोदाहरणार्थं किञ्चिद् यथा—

"तथाच भोजः—

यदा रक्तञ्च पित्तञ्च वातेनानुगतं त्वचि।
अग्निदग्धनिभान् स्फोटान् कुरुतः सर्व्वदेहगान्।
सज्वरान् सपरीदाहान् विद्याद्विस्फोटकांस्तु तान्॥"

इति (निदानटीकायां विस्फोटकाधिकारे)।

"भोजेऽप्युक्तं—

पित्तेन जातो वदने विकारः
पार्श्वे विशेषात् स तु येन शेते।
स्नायुप्रतानप्रभवो विशेषाद्
दाहप्रपाकप्रचुरो विदारी॥"

इति (तत्रैव मुखरोगाधिकारे)।

१६। **करवीर्य्यतन्त्रम्[1]।** इदञ्च टीकाकृत्समये नातिप्रसिद्धमपि क्वचित् समुद्धृतपाठमेव यथा—

"उक्तं हि करवीर्य्याचार्य्येण—

चन्द्रकैः शिखिपिच्छाभैर्नीलपीतादिराजिभिः।
आवृतं वेशवाराम्बुसज्जलौरयुतं त्यजेत्॥"

इति (निदानटीकायामतीसाराधिकारे)।

१७। **गोपुररक्षिततन्त्रम्।** गोपुररक्षित इति संज्ञा धन्वन्तरि-शिष्येषु दृश्यते। तत्कृतञ्च तन्त्रमस्तीति किम्वदन्ती। तत्पाठास्तु नाद्यापि क्वचिदस्माभिरभिलक्षिताः। केचित्तु "गोपुर-रक्षित" इति व्यक्तिद्वयस्य नामद्वय-मित्याहुः सम्भावयामासुश्च तत्कृतं तन्त्रद्वयम्।

१८। **भालुकितन्त्रम्।** तच्च भेलसंहितायाः पृथगेव ग्रन्थतन्त्र-मिति पूर्व्वमवोचाम। तत्प्रतिपादकं प्रमाणन्तु किञ्चिद् यथा—सुश्रुतटीकायां शस्त्रस्वरूपव्याख्याने चक्रपाणिः—

"तथाच भालुकिः—

यदग्रे मण्डलं वृत्तं क्षुरसंस्थानमेव च।
मण्डलाग्रं विजानीयात् प्रमाणन्तु षडङ्गुलम्॥"

इति (सु० सूत्र० ८ अ० व्याख्यायाम्)।

---

१ अत्र क्वचित् करवीराचार्य्य इति प्रामादिकः पाठः सुधीभिर्नादरणीयः।

पुनस्तत्रैवाग्र,

''तत्र भालुकिः—

मुद्रिकया त्रिवृद्धं स्याद्वृद्धिपत्रसलक्षणम् ।
द्व्यङ्गुलं मुद्रिकाशस्त्रं क्षुरसंस्थानमेव च ॥'' इति ।

एवं डल्हनेन सुश्रुतटीकायां विजय-श्रीकण्ठाभ्याञ्च निदानटीकायामपि समुद्धृता भालुकितन्त्रीयाः पाठाः। परं चक्रपाणिवचनप्रामाण्याद् यन्त्रशस्त्रादिलक्षणसमन्वितमिदं तन्त्रं शल्यतन्त्रमेवेति निश्चयोऽस्माकम् ।

तान्येतानि औपधेनवादीनि नव शल्यापहर्तॄणां तन्त्राण्यस्माभिर्लब्धपरिचयानि। अन्यच्च तन्त्रद्वयं कपिलगौतमयोर्नामधरं क्वचिदुद्धृतपाठं कायचिकित्साविषयकमेवेति सम्भाव्यते। अनिश्चयात्तु कायचिकित्सातन्त्रेषु शल्यतन्त्रेषु वा नान्तर्भावितमस्माभिः। तदेतत्—

| | |
|---|---|
| १९। **कपिलतन्त्रम्**<br>२०। **गौतमतन्त्रञ्च** | तत्प्रमाणद्वयं यथा— |

सुश्रुतटीकायां ऋतुचर्य्याव्याख्याने चक्रपाणिः—

"तदुक्तं कपिलवचने—

मधौ सहे नभस्ये च मासि दोषान् प्रवाहयेत् ।
सहस्यप्रथमे चैव वाहयेद्दोषसञ्चयम् ॥"

इति ( सु० सूत्र० ६ अ० व्याख्यायाम् )।

निदानटीकायामर्शोऽधिकारव्याख्याने विजयश्च—

''यदाह गौतमः—

श्लेष्मा च पञ्चधोरःस्थः श्लेषकादिस्वकर्म्मणा
कफधाम्नाञ्च सर्व्वेषां यत् करोत्यवलम्बनम्
अतोऽवलम्बकः, श्लेष्मा यस्त्वामाशयसंश्रितः
क्लेदकः सोऽन्नसंघातक्लेदनाद्, रसबोधनात्
बोधको रसनास्थस्तु, शिरःसंस्थोऽक्षितर्पणात्
तर्पकः, श्लेषकः सम्यक् श्लेषणात् सन्धिषु स्थितः ॥'' इति

## ( अथ शालाक्यतन्त्राणि )

२१। **विदेहतन्त्रम्** ।—तदेतत् प्रधानतन्त्रं शालाकिनां विदेहाधिपेन निर्म्मितम्। मूलभूतञ्चेदं लभ्यमानसुश्रुतोक्तशालाक्यतन्त्रांशस्य, तथाहि तत्र उत्तरतन्त्रारम्भे—

"शालाक्यशास्त्राभिहिता विदेहाधिपकीर्त्तिताः"

इति ( सु० उत्तर० १अ० )।

विदेहाधिपश्चाऽसौ जनको नाम राजर्षिः सुप्रसिद्ध इति केचित्। डल्लनश्च उत्तरतन्त्रटीकारम्भे प्राह—"अस्याग्रे केचित्, 'विदेहाधिपतिः श्रीमान् जनको नाम विश्रुतः'—इत्यादि पाठं पठन्ति व्याख्यानयन्ति च, तच्च बृहत्पञ्जिकाकारो न पठति, तस्मान्मयापि न पठितो व्याख्यातश्चेति।"

अन्ये तु निमिविदेहाधिपयोरभेदं मन्यन्ते। विदेहाधिपेष्वाद्यस्य राज्ञो निमेर्जनकपूर्व्वजत्वेन रामायणे[1] वर्णनात्। तदपि न विचारसहम्।

"इन्द्रियाणीति जनको वैदेहः"—( च० शा० ६ अ० )।

—इति चरकीयपाठदर्शनात्। एवञ्च वयं पुण्यश्लोकं भगवन्तं जनकमेव राजर्षिं शालाक्यतन्त्रकारं मन्यामहे, गणयामश्च निमिनामानमपरं पृथगेव, डल्लन-श्रीकण्ठादिभिः पृथङ्निर्द्देशदर्शनात्। तथाहि श्रीकण्ठो निदानटीकायां नेत्ररोगप्रसङ्गे "यदाह निमिः—काच इत्येष विज्ञेयो यः स्यात्त्रिपटलोत्थितः" इति प्रमाणमुद्धृत्य पुनः "तथाच विदेहः—एष याप्यः स्मृतः काचो स्थायी नाम शरीरिणामिति" प्रायस्तुल्येऽर्थे पृथक् प्रमाणमुपन्यस्यति स्म।

अथेदानीं डल्लनादिभिरुद्धृतेषु विदेहतन्त्रीयप्रमाणेष्विह कानिचिद् दर्श्यन्ते।

तत्र डल्लनः—"तथाच विदेहवाक्यम्,

समन्तादिस्तृतः श्यावो रक्तो वा मांससञ्चयः।
सन्निपातेन दोषाणां प्रस्ताय्यर्म्म तदुच्यते॥"

इति ( सु० उत्तर० ४ अ० व्याख्याने )।

पुनरन्यत्र स एव—

"तथाच विदेहः,

अन्तर्गतसिरायान्तु यदा तिष्ठति मारुतः।
स तदा नयनं प्राप्य शीघ्रं दृष्टिं निरस्यति॥"

इति ( सु० उत्तर० ६ अ० व्याख्यायाम् )।

विजयश्च निदानटीकायां यथा—

"यदाह विदेहः,

क्रोधशोकौ स्मृतौ वातपित्तरक्तप्रकोपणौ"—

इति ( ज्वराधिकारे )।

---

१ द्रष्टव्यं रामायणे हरधनुर्भङ्गप्रसङ्गे जनककृतं स्वकुलकीर्त्तनम्।

पुन: स एव—

"यदाह विदेह:,

पित्तेन तिक्तास्य-विदाहकृत् स्यात् ।

स्वाद्वास्य-हृल्लासकर: कफेन ॥"

इति ( अरोचकाधिकारे )।

श्रीकण्ठश्चानेकशो विदेहपाठानुद्दधार निदानटीकायाम् । तत्र दिक्—

"तथाच विदेह:—

सर्व्वलिङ्गं रुजायुक्तमर्व्वुदं विद्धि सर्व्वजम्"

इति ( नासारोगाधिकारे )।

"तदुक्तं विदेहे—

नक्तमन्धास्तु चत्वारो ये पुरस्तात् प्रकीर्त्तिता:"—

इत्यादि ( नेत्ररोगाधिकारे )।

एष च "नक्तमन्धा"स्त्वित्यादिपाठो डल्लनेनाप्युद्धृत: ।

एतच्च विदेहतन्त्रं शालाक्यप्रकरणप्रधानमपि सर्व्वाङ्गसम्पन्नं तन्त्रं सुश्रुतादिवदिति प्रत्येतव्यम्, यतो विजयेन ज्वरारोचकपाण्डवादिप्रकरणेऽपि तत्प्रमाणान्युपन्यस्तानि ।

२२ । **निमितन्त्रम्** ।—तदेतत् विदेहाधिप-तन्त्रात् पृथगेव शालाक्यतन्त्रमिति सप्रमाणमवोचाम । तत्प्रमाणानि च टीकाकारै: शालाक्यव्याख्यानावसर एव समुद्धृतानि । यथा श्रीकण्ठ:—

"तथाच निमि:,

श्लेष्मपित्तजलोन्मिश्रे कोष्ठे शोणितमांसजे ।

जायन्ते जन्तवस्तत्र कृष्णास्ताम्रा: सितारुणा: ॥"—

इत्यादि ( निदानटीकायां कर्णरोगाधिकारे )।

"तथाच निमि:—

पञ्चभूतात्मिका दृष्टिर्मसूरार्द्धदलोन्मिति: ।"

—इत्यादि ( नेत्ररोगे )।

२३ । **काङ्कायनतन्त्रम्** ।—काङ्कायनादीनां संज्ञा डल्लनेन सङ्कलिता:, चरकेऽपि यतस्तत: "काङ्कायनो वाह्लीकभिषगि"ति काङ्कायनस्य निर्द्देश: । तदीयतन्त्रोद्धृतानि प्रमाणानि तु नाद्याप्यस्माभिरासादितानि ।

२४।२५। गार्ग्यतन्त्रं, गालवतन्त्रञ्च।—गार्ग्यगालवयोस्तन्त्रकारत्वमपि डल्लनवचनैरेव सूच्यते। तत्प्रमाणानि पुनर्नास्माभिः क्वचिदाविष्कृतानि।

२६। सात्यकितन्त्रम्।—तदेतत् प्राचीनं शालाक्यतन्त्रं, डल्लनेन श्रीकण्ठेन च नेत्ररोगाधिकारे समुद्धृतप्रमाणम्।

तत्र डल्लनो यथा—

"तथाच रागकथनप्रस्तावे सात्यकिः,

पित्तरक्ताञ्जिताः पीताश्चित्रिताः सन्निपातजाः"।

इति ( सु० उत्तर० ७ अ० )।

श्रीकण्ठश्च—

"याप्यश्चायं, तथाहि सात्यकिः,

तृतीयं पटलं प्राप्ते तिमिरे रागि जायते।

अरागि तिमिरं साध्यमाद्यं पटलमाश्रितम्।

कृच्छ्रं द्वितीये रागि स्यात्तृतीये याप्यमुच्यते॥"

इति ( निदानटीकायां नेत्ररोगे )।

२७। शौनकतन्त्रम्।—शौनकस्य शालाक्यतन्त्रकारत्वं डल्लनेन सुश्रुतोत्तरतन्त्रव्याख्यारम्भे सूचितम्। तत्पाठाश्च डल्लनचक्रपाणिभ्यां समुद्धृताः। तत्र दिक्,—

यथा चरकटीकायां चक्रपाणिः—

"अत्र शौनकवचनन्तु,

द्रव्यादापोथितात्तोये प्रतप्ते निशिसंस्थितात्।

कषायो योऽभिनिर्याति स शीतः समुदाहृतः॥"

इति ( च० सूत्र० ४ अ० व्याख्याने )।

लभ्यमानचरकसुश्रुतयोश्च दृश्यते शौनकमतस्य विचारो गर्भावक्रान्तिप्रकरणे।

तत्र चरकः—

"पक्वगुदमिति शौनको मारुताधिष्ठानत्वात्"

इति ( च० शा० ६ अ० )।

सुश्रुते तु—

"गर्भस्य हि सम्भवतः पूर्व्वं शिरः सम्भवतीत्याह शौनकः"

इति ( सु० शा० ३ अ० )।

अनयोश्च मतयोरतिस्फुटविरोधदर्शनादनुमीयते चरकोक्तोऽयं शौनकः, सुश्रुतोक्तशौनकाद्भिन्न एव। एवञ्च चरकेऽत्रैव क्वचित्को "मद्रशौनकः"[1] इति पाठः साधीयान् प्रतिभाति, विरोधपरिहारसम्भवात्। तथास्थिते च **मद्रशौनकतन्त्रं** पृथगेवोन्नेयम्।

डल्लनेन तु भद्रशौनक इति संज्ञया किञ्चित्तन्त्रं निरदेशि। तत्र चेत् 'मद्रशौनक' इति युक्ततरः पाठः कल्प्यते, तर्हि चरकीयपाठेन सुवचा सङ्गतिः। डल्लनकृतपाठोद्धारस्तु यथा—

"तथाच भद्रशौनकः,

त्वङ्मांससंश्रितो वायुस्त्वग्दाहेनैव शाम्यति।
मांसे दग्धे हि शाम्यन्ति सिरास्नायुस्थिसन्धिजाः॥"

इति ( सु० सूत्र० १२ अ० )।

किञ्चैवं पूर्वोक्तेन डल्लनवचसा शालाक्यतन्त्रकारेषु गणनार्हेऽपि शौनके, शौनकतन्त्रं न केवलं शालाक्याङ्गपरं किन्त्वतिविस्तृतं शारीरभेषजकल्पनादिवर्णनपरायणञ्च प्रतिभाति, सुश्रुतप्रतिसंस्कर्त्रा चक्रपाणिना च समुद्धृतेभ्यः पाठेभ्यस्तथा प्रतीतेः। मद्रशौनकतन्त्रन्तु शल्यतन्त्रप्रधानमासीदिति उद्धृतपाठदर्शनात् सम्भाव्यते।

यत्तु केचित्—आथर्व्वणशौनकसंहिताकारः शौनक एवासौ शौनकतन्त्रकार इति, तत्र ब्रूमः। अतिपुराणः खल्वाथर्व्वणसंहिताकारः, नवीनश्च तदपेक्षयाऽयं तन्त्रकारः शौनकः इति—"कठचरकाल्लुक्"—इतिप्रासङ्गिकविचारसादृश्याद भेद एवानयोः सम्भाव्यते। बहवः किलेह पुरा प्रादुर्भूतास्तुल्यनामान आचार्य्या स्तन्त्रकाराश्च तत्र नामसात्रसादृश्याद् न युज्यते परस्पराभेदस्वीकारः परीक्षकाणामिति।

२८। **करालतन्त्रम्**।—करालश्चायं करालभट्टसंज्ञया डल्लनेन व्यपदिष्टः। स चासौ ऋषिर्वाऽनृषिर्वेति न शक्यं निश्चयेन वक्तुम्, यतो भट्टान्तपदस्याऽनृषिरेवासौ स्यादिति शंक्यते। तथापि भृशं प्राचीनोऽयं तन्त्रकार इति नात्र संशयः, डल्लनस्योक्तश्लोकादिनिर्देशात्[2]।

---

१ मद्रदेशीयः शौनको मद्रशौनकः। क्वचित्तु भद्रशौनक इत्यपि पाठः। २ डल्लननिर्देशस्तु उत्तरतन्त्रटीकायां द्रष्टव्यः।

तत्र श्रीकण्ठो यथा—

"यदाह करालः—

कूणितं खरवर्त्माक्षि कृच्छ्रोन्मीलाविलेक्षणम् ।
सदाहं सास्रजा वाताच्छुष्कपाकान्वितं वदेत् ॥"

इति ( निदानटीकायां नेत्ररोगे )

२९ । **चक्षुष्यतन्त्रम्** ।—केचित्तु चक्षुष्येणतन्त्रमिति संज्ञान्तरमस्याहुः । एतत्तन्त्रप्रमाणञ्च यथा—

निदानटीकायां श्रीकण्ठः,

"चक्षुष्योऽप्याह—

स्त्रीप्रसङ्गादभीघातादथवा देहकर्म्मणा ।
क्षिप्रं संजायते कृच्छ्रः शिरोरोगः क्षयात्मकः ।
वातपित्तात्मकं लिङ्गं व्यामिश्रं तत्र लक्षयेत् ॥"

इति ( शिरोरोगाधिकारे ) ।

३० । **कृष्णात्रेयतन्त्रम्** ।—कृष्णात्रेयश्च पुनर्व्वसुरात्रेयश्चेत्येक एवेति केचित् । तन्न । कृष्णात्रेयस्य शालाक्यतन्त्रकारत्वेन पृथक् प्रसिद्धेः । तथाहि सिद्धयोगव्याख्याने ( कवलाधिकारे ) श्रीकण्ठः—

"शालाकिभिस्तु प्रतिदोषं पठितानि द्रव्याणि । तथाच कृष्णात्रेयः"—इत्यादि ।

शिवदासोऽपि चक्रसंग्रहटीकायां नस्याधिकारे समुद्दधार कृष्णात्रेयतन्त्रीयं पाठम् । यथा—

"उक्तं हि कृष्णात्रेयेण,

सप्तवर्षमुपादाय नस्तःकर्म्म चतुर्व्विधम् ।" इति ।

तान्येतानि विदेहाधिपादिकृष्णात्रेयान्तपरमर्षिकृतानि दश शालाक्यतन्त्राणि साम्प्रतमस्माभिर्लब्धाभिज्ञानानि ।

---

१ दर्शितश्चेदमस्मन्मित्रेण "वनौषधिदर्पण"कारेणापि स्वकीयोपोद्घाते ।

## [ अथ भूतविद्यातन्त्राणि ]।

अथेदं भूतविद्याख्यमायुर्व्वेदाङ्गं कदाचिदतिप्रसिद्धमपि सम्प्रति चिराय विलुप्तमेव। तथाचेदानीं भूतविद्यातन्त्राणां नामान्यपि न लभ्यन्ते किमुत ग्रन्थाः?

अस्ति त्वायुर्व्वेदे लभ्यमानेषु निबन्धेषु भूतविद्याबीजमद्यापि तद्यथा—

(१) सुश्रुते अमानुषप्रतिषेधाध्याये ( उत्तर० ६ अ० );

(२) चरके उन्मादचिकित्सिते ( चिकि० ८ अ० );

(३) वाग्भटे भूतविज्ञानीय-भूतप्रतिषेधाख्ययोरध्याययोः (उत्तर० ४,५ अ०); इति दिक्।

किञ्च सुश्रुतवाग्भटयोः पृथग्भूतविद्याभिधानेऽपि, चरकेण भूतविद्याया उन्मादाधिकार एवाऽन्तर्भावः सम्पादित इत्यवधेयम्। यथा च तत्तत्प्रसङ्ग-व्याख्याने सहस्राधिकवर्षपुराणैर्व्याख्यातृभिरपि क्वचिन्नोद्धृतानि कस्यापि भूतविद्या-तन्त्रस्य प्रमाणानि, तथा तर्कयामो—बहुतिथः किल कालो व्यतीतो भूतविद्या-तन्त्राणां विलुप्तानामिति। तथापि पौराणिकयुगेषु नाभूत् सर्व्वथा भूतविद्या-विलोप इत्यग्निगरुडादिपुराणेषु तत्प्रसङ्गविस्तरस्य दर्शनात् सम्भावयामः। बाल-ग्रहादिचिकित्सायाश्च भूतविद्यायामेवान्तर्भावः सुकरः। तथापि तस्याः पृथग् बालतन्त्रे ( कौमारभृत्ये ) वर्णनादनुमीयते—चरकानुसृतमार्गेण मानसरोगाधि-कार एवेयं भूतविद्येति।

वृद्धास्त्वाहुः[1]—आथर्व्वणतन्त्रमिति अथर्व्वाख्यमहर्षिप्रणीतमभूत् कदाचित् प्रसिद्धं भूतविद्यातन्त्रम्, अथर्व्वाख्यश्चासौ महर्षिरथर्व्ववेदनिर्दिष्ट इति। तदे-तन्मतं किम्बदन्तीमात्रमूलमित्यलमस्य विचारेण।

## [ अथ कौमारभृत्यतन्त्राणि ]।

कौमारभृत्यतन्त्रकारेषु जीवक-पार्व्वतक-बन्धकानां संज्ञाः डल्लनेन निर्दिष्टाः सौश्रुतोत्तरतन्त्रव्याख्यानारम्भे। एवञ्च—

३१। **जीवकतन्त्रम्**

३२। **पार्व्वतकतन्त्रम्**

---

१ वयन्तु आथर्व्वणतन्त्रमिदं वेदनिर्दिष्टाथर्व्वमहर्षिणैव प्रणीतं तन्त्रमित्यत्र संशयानास्तर्कयामः अनेके—किलामन् युगे युगे वशिष्ठविश्वामित्राथर्व्वादिनामधरा महर्षयः, न च वेदनिर्दिष्टेभ्यो वशिष्ठविश्वामित्रादिभ्यो रामायण-महाभारतादि निर्दिष्टानां तत्तदाख्यमुनीनामभेदः सम्भाव्यते, तुल्यनाम्नां लोके बाहुल्ये न सम्भवात् तादृशकल्पनाया अन्याय्यत्वात्।

२३। **वन्धकतन्त्रञ्चेति** तन्त्रत्रयं पूर्व्वमभूत् प्रसिद्धमित्यनुमीयते। तत्प्रमाणानि तु नास्माभिरद्यापि लब्धानि। जीवकादयश्च बौद्धाचार्याः, इति चिरन्तनी प्रसिद्धिः।

एतेषु च जीवकादिषु जीवको नाम बौद्धभिषग् 'जीवक कोमारभच्च'[1] (कौमारभृत्यः) इति संज्ञया बौद्धेतिहासेषु प्रसिद्धः। स च सुप्रथितनाम्नो विम्बिसाराख्य बौद्धनृपतेर्भगवतस्तथागतस्य च चिकित्सको भिक्षोरात्रेयस्य च शिष्य इति बौद्धेतिवृत्तविदां[2] प्रवादः। भिक्षुरात्रेयश्च[3] चरके निर्द्दिष्ट इति केचित्।

यत्तु कुमारतन्त्रमिति भानुमत्याख्यसुश्रुतटीकायां निर्द्दिष्टं चक्रपाणिना,—

"कर्णव्यधे कृते बालो न ग्रहैरभिभूयते।
भूष्यतेऽस्य मुखं तस्मात् कार्य्यस्तत्कर्णयोर्व्यधः॥"

( सु० सू० १६ अ० व्याख्याने )—

इति पाठोद्धारपूर्वकं, तत् केन रचितं कुमारतन्त्रमिति न शक्यं निर्णेतुम्।

२४। **हिरण्याक्षतन्त्रमिति** प्रसिद्धमपरञ्चासीत् कुमारतन्त्रमिति सम्भाव्यते। तत्प्रमाणञ्च श्रीकण्ठेनोद्धृतं निदाने बालरोगव्याख्याने यथा—

"हिरण्याक्षेऽप्युक्तम्—

संस्राव-दाह-पाकाद्यैश्चितः स्फोटैर्भयान्वितः।
स्रस्ताङ्गो विस्रगन्धिः स्यात् शकुन्या पीड़ितः शिशुः॥" इति।

कौमारभृत्यप्रसङ्गश्च सुश्रुते उत्तरतन्त्रे ( २७—३८ ) द्वादशभिरध्यायैर्वर्णितः। तथाचानुमीयते सुमहदङ्गमेतदायुर्व्वेदस्य सम्प्रति सर्वथा प्रनष्टप्रायमिति।

---

१ "कोमारभच्च" इति तु 'कौमारभृत्य' शब्दस्य पालिभाषारूपम्।

२ Cf. "When Jivaka, surnamed Komaravaccha, had reached the years of discretion, he went to Takshasila to study Medicine under a renowned professor. After seven years of study, he was perfectly skilled in the Art and was dismissed as such by his teacher. In course of time, the young physician had occasion to show his eminent skill. He cured Pradyota the Cruel, king of Ujjayini, as well as Bimbisara who appointed him to be his physician. On a certain day, Buddha was troubled with constipation, Jivaka was called" etc. etc. (Kern's Manual of Buddhism—P. 30.) Also see बुद्धदेव by Mahamohopadhyaya Satish Ch. Bidyabhusan Pp. 220—223 and 166—170, and ItSing's Record of Buddhistic Practices, P. 128.

३ चरके तु वशिष्ठविश्वामित्रभरद्वाजात्रेयादीनां भिक्षोरात्रेयस्य च हिमवत्सानौ सम्मेलनं प्रतिपादितं, तथाचैषां तुल्यकालिकता स्यात्! तथापि जीवकगुरोर्भिक्षोरात्रेयस्य चरकोक्तात्रेयभिक्षोर्भेद एव सम्भाव्यते नाभेदः। पुनर्व्वसुरात्रेयस्त्वग्निवेशादिगुरुः सर्व्वथैव भिन्नः। अन्ये तु गम्भीरदर्शिनः चरकोक्तमृषिसङ्घं भोजप्रबन्धोक्तकविसङ्घवत् काल्पनिकमाहुः।

इदञ्चात्रावधेयम्। "कौमारभृत्यं नाम कुमारभरणधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसमुत्थानाञ्च व्याधीनामुपशमनार्थम्"—इति सुश्रुतः। प्रसूतितन्त्रस्य गर्भिण्युपचारादिप्रयोजनकस्य तु नात्रान्तर्भावः। तस्य हि वैद्यके शारीर एवान्तर्भावः, शल्यतन्त्रे च मूढ़गर्भचिकित्सादेः। एवञ्च सर्व्वथा कौमारभृत्यात् पृथगेव प्रसूतितन्त्रं ( Midwifery ) मन्तव्यम्। स्त्रीरोगास्तु केचित् कौमारभृत्यान्तर्गता एव, सौश्रुतोत्तरतन्त्रीयविभागदर्शनात्। तत्र हि योनिव्यापत्प्रतिषेधाध्यायान्ते दृश्यते पाठः—"इति सुश्रुताचार्य्यविरचिते आयुर्व्वेदशास्त्रे उत्तरतन्त्रे कौमारभृत्यं समाप्तम्"—इति।

## [ अथ अगदतन्त्राणि ]।

निखिलस्थावरजङ्गमविषचिकित्सा (Toxicology) खल्विह अगदतन्त्रमित्युच्यते। तच्च सम्प्रति सौश्रुतकल्पस्थाने चरकचिकित्सास्थानीय त्रयोविंशाध्याये तन्मूलकनिबन्धेषु च परिसमाप्यते। विलुप्तप्रायाः पुनरिदानीं प्राचीनाः संहितास्तद्विषयाः। तास्त्वेता अस्माभिर्लब्धपरिचयाः—

२५। **काश्यपसंहिता।** काश्यपो नामर्षिर्महाराजपरीक्षितश्चिकित्सार्थमागतो मध्ये पथि प्रतिनिवर्त्तितश्च तक्षकेणेति प्रसिद्धा महाभारतीया वार्त्ता। काश्यपसंहितोद्धृतानि प्रमाणानि च डल्लन-चक्रपाणि-श्रीकण्ठैः प्रदर्शितानि।

तत्र डल्लनः—

"ननु काश्यपेन मुनिना सिरादिष्वग्निकर्म्म प्रतिषिद्धं, तथाच तद्वचनम्—

'न सिरास्नायुसन्ध्यस्थिमर्मस्वपि कथञ्चन।
दंशस्योत्कर्त्तनं कार्य्यं दाहो वा भिषजाऽग्निना।'

—इति" (सु० सूत्र० १२ अ० व्याख्याने)।

चक्रपाणिश्च—

"उक्तं हि काश्यपीये—

भूयो वर्षति पर्जन्यो गङ्गाया दक्षिणे जने।
तत्र वर्षाप्रावृडाख्यौ ऋतू तेषां प्रकल्पितौ।"

अथ श्रीकण्ठोऽपि—

"यदाह वृद्धकाश्यपः—

संयोगजं च द्विविधं तृतीयं विषमुच्यते।
गरः स्यादविषं तत्र सविषं कृत्रिमं मतम्॥"

इति ( निदानटीकायां विषाधिकारे )।

केचित्तु काश्यपीयं तन्त्रं कायचिकित्सापरं मन्यन्ते, अपरे च शल्यतन्त्रपरम्। अस्माभिस्तु महाभारतसंवादात्, "दंशस्योत्कर्त्तन"मित्यादि पाठोद्धारदर्शनाद् वृद्धवैद्यप्रसिद्धेश्च अगदतन्त्रविषयासौ संहितेति निरणायि।

३६। **अलम्बायनसंहिता।** तत्प्रमाणञ्च यथा निदानटीकायां विषाधिकारे श्रीकण्ठः—

"तदुक्तमलम्बायने—

नैति रक्तं क्षताद् यस्य लताघाते न राजिकाः।
न लोमहर्षः शीताद्भिर्वर्जयेत्तं विषार्दितम्॥ इति।"

३७। **उशनःसंहिता।** उशनसा कृतेयमगदतन्त्रीया संहितेति वृद्धवैद्यप्रसिद्धिः। उशनःपथानुसारिणा कौटिल्येन च कृतेऽर्थशास्त्रे विषादिप्रतीकारोपदेशस्य आशुमृतकपरीक्षायाश्च[1] दर्शनादनुमीयतेऽस्याः संहितायाः पर्वसत्ता। (दृश्यतां कौटिलीयार्थशास्त्रे[2]स्य कण्टकशोधनाधिकरणम्)।

३८। **सनकसंहिता।** (शौनकसंहिता वा)—सेयमगदतन्त्रविषयाऽतिप्राचीना संहिता, यां स्वभाषयाऽनूदितवन्तः पुरा यवनाः। तत् प्रमाणानि च भूम्ना समुद्धृतानि डा॰ प्रफुल्लचन्द्ररायाख्यैः स्वकीयरसायनशास्त्रेतिहासे[3], दर्शितञ्च तत्र तैरेव चरकसुश्रुतोद्धृतविषाधिकारप्रसङ्गानामेतत्संहितानुवादेन यावनभाषास्थेन सादृश्यम्। (तच्च मुलराख्येन पाश्चात्यविदुषाऽविष्कृतम्)

३९। **लाट्यायनसंहिता।** तत्प्रमाणञ्च डल्लनेन समुद्धृतं यथा—
"अथ लाट्यायनोक्तः सामान्यज्ञानोपायो लिख्यते—

कटुभिर्बिन्दुलेखाभिः पक्षैः पादैर्मुखैर्नखैः।
शूकैः कण्टक-लांगूलैः संश्लिष्टैः पत्ररोमभिः॥

---

१ आशुमृतकपरीक्षा हि साम्प्रतिकानां Post Mortem Examination, एवञ्च नव्यानां व्यवहारायुर्वेद- (Medical Jurisprudence)-संज्ञमायुर्वेदाङ्गमुशनःसंहितादीनामङ्गमभूदिति सुवचम्। २ एष ग्रन्थः सम्प्रति दक्षिणापथे (Mysore) मुद्रितः प्रकाशितश्च। —३ Vide Dr. P. C. Roy's History of Hindu Chemistry, Vol. I. (Introduction) CXII. But "Asankar"(probably a corrupt form of अगदङ्कर), *a book on poison* by Sanaq the Indian" can not be the same as Astanga of Vagbhata, as supposed by Dr. Roy.

स्वनैः प्रमाणैः संस्थानैर्लिङ्गैश्चापि शरीरगैः।
विषवीर्य्यैश्च कीटानां रूपज्ञानं विभाव्यते ॥"

( इति कल्पस्थानव्याख्याने )।

तदेवमगदतन्त्रीयं संहिताचतुष्टयमस्माभिर्लब्धाभिज्ञानमिदानीं सर्व्वथा विनष्टं प्रतिभाति।

## [ अथ रसायनतन्त्राणि ]।

अथ रसायनाख्यमिदमायुर्व्वेदाङ्गं जराव्याधिविनाशन-भेषजप्रयोगक्रमोपदेश-परायणमार्यचिकित्साशास्त्र एव दृश्यते नान्यत्र। तथाचाऽस्याङ्गस्याऽतिविलक्षणा समुन्नतिरभूदायुर्व्वेदमध्यन्दिने, तदनन्तरं बौद्धयुगे चेति प्रागवोचाम। केचित् पुनराहुः—आर्षा हि रसायनोपदेशाः प्रायो वनौषधिप्रयोगपराः, क्वचिदेव लोहादि प्रयोगपरा वेति कृत्वा रसतन्त्राणि सर्व्वथाऽयुर्व्वेदतः पृथगभूतानि। तन्न समञ्जसम्। रसायनाख्यस्याङ्गस्य सर्व्वथा वैद्यकाङ्गतयैव प्रसिद्धेः। तथाचोक्तं—"यज्जराव्याधि-विध्वंसि भेषजं तद्रसायनमिति"। सुश्रुते अन्नपानविध्यध्याये लोहानां गुणवर्णनात्, तत्रैव कुष्ठप्रमेहादिचिकित्सिते लौह-शिलाजतु-माक्षिकधात्वादि-प्रयोगोपदेशाच्च। अथ चरकेऽपि लोहानां रसस्य च दृश्यते व्यवहारः। एवञ्च आर्ष-युगेषु लोहानां प्रयोगेषु सत्स्वपि बौद्धयुगारम्भे रसादिपार्थिवभेषजोपचारबाहुल्यादतिपुष्टं रसायनाङ्गं पृथगिव प्रतीयते स्म, न तु वस्तुतः पृथगेवाभूदित्यवसेयम्। नहि व्यायामविशेषादुपचितमङ्गमनङ्गं पृथगङ्गं वा नाम भवति।

द्विविधानि च श्रूयन्ते रसायनतन्त्राणि – आर्षाणि चानार्षाणि चेति। तत्रार्ष-तन्त्रेष्वेतान्यस्माभिर्लब्धाभिज्ञानानि—

४०। **पातञ्जलतन्त्रम्।** तदेतत् पतञ्जलिमहर्षिप्रणीतं तन्त्रं बहुधा व्याख्यानकारैरुद्धृतपाठम्। तत्र शिवदासोद्धृतं किञ्चित्प्रमाणं दर्शितपूर्व्वम् ( ४८-पृष्ठे ), अन्यानि चक्रदत्तटीकायां रसायनाधिकारव्याख्याने द्रष्टव्यानि।

४१। **व्याडितन्त्रम्**

४२। **वशिष्ठतन्त्रम्**

४३। **माण्डव्यतन्त्रञ्च।** तदेतत्तन्त्रत्रयं रसतान्त्रिकाणामाश्रयभूत-मतिप्राचीनमिति वृद्धवैद्यप्रसिद्धिः। व्याडिमाण्डव्ययोरभिज्ञानं रसरत्नस-

सुच्चयकारलिखितायां रसाचार्य्यसूच्यामधुनैव द्रष्टव्यम्। वशिष्ठमाण्डव्ययो स्तन्त्रकारत्वं पुनर्नागार्ज्जुनकृते रसरत्नाकरे द्रष्टव्यम्। यथा—

"शास्त्रं वशिष्ठ-माण्डव्यं गुरुपार्श्वे यथाश्रुतम्।
तदहं संप्रवच्यामि साधनञ्च यथाविधि॥"

४४। **नागार्ज्जुनतन्त्रम्** नाम नागार्ज्जुनाख्येन केनचिन्मुनिना बौद्धाचार्य्येण वा प्रणीतं रसतन्त्रम्। चक्रपाणिस्त्वाह—

"नागार्ज्जुनो मुनीन्द्रः शशास यल्लोहशास्त्रमतिगहनम्।"
इत्यादि (चक्रसंग्रहे रसायनाधिकारे)।

एतत्प्रामाण्यबलेन नागार्ज्जुनाख्यो लोहशास्त्रप्रवक्ताऽसौ मुनिरिति केचित्। अपरे तु चक्रपाणिना नेत्ररोगाधिकारे श्रीनागार्ज्जुनाञ्जनप्रसङ्गे—

"नागार्ज्जुनेन लिखिता स्तम्भे पाटलिपुत्रके"—

इत्येवमादिवार्त्तादर्शनात्, पाटलिपुत्रस्य बौद्धमहानगरतया प्रसिद्धेः, नागार्ज्जुनस्य बौद्धाचार्य्यतया सुविज्ञातत्वाच्च बौद्धनागार्ज्जुनमेवैनमाहुः।

सम्भावयन्ति चान्ये नागार्ज्जुनकृतं रसरत्नाकराख्यं ग्रन्थमेव नागार्ज्जुनतन्त्रमिति।

सुश्रुतप्रतिसंस्कर्त्तृविचारे चास्माभिर्नागार्ज्जुनप्रसङ्गो वर्णितपूर्व्वः।

**कक्षपुटतन्त्रम्, आरोग्यमञ्जरी**ति संज्ञञ्च ग्रन्थद्वयं नागार्ज्जुनकृतमेवेति प्रसिद्धिः। आरोग्यमञ्जरीप्रमाणन्तु विजयेन दर्शितं निदानटीकायाम्।

तदेतन्नागार्ज्जुनतन्त्रमार्षयुगावसानसमये प्रणीतमिति नः प्रतीतिः। प्राचीनतमस्य नागार्ज्जुन इति प्रसिद्धाचार्य्यस्य बुद्धपरभावित्वात्।

इयञ्च रसतन्त्राचार्य्याणां सूची रसरत्नसमुच्चयकारेण सूचिता सूचयत्यन्यानपि रसतन्त्रकारान्—

---

१ एतद्ग्रन्थांशश्च डा० प्रफुल्लचन्द्ररायैः स्वग्रन्थसमाप्तौ उद्धृतः (Vide Dr. Roy's History of Hindu Chemistry, Vol. II., Sanskrit Texts, P. 14). २ अनेके किलाभूवन् नागार्ज्जुना इति हि प्रतिपादितपूर्व्वम् (ट—पृष्ठ )।

"आदिमश्चन्द्रसेनश्च लङ्केशश्च विशारदः।
कपाली मत्तमाण्डव्यो भास्करः शूरसेनकः।
रत्नघोषश्च शम्भुश्च तथार्कौ नरवाहनः।
इन्द्रदो गोमुखश्चैव कम्बलिर्व्याडिरेव च।
नागार्ज्जुनः सुरानन्दो नागबुद्धिर्यशोधनः।
चण्डः कापालिको ब्रह्मा गोविन्दो लम्पको हरिः।
सप्तविंशतिसंख्याका रससिद्धिप्रदायकाः।
रसाङ्कुशो भैरवश्च नन्दी स्वच्छन्दभैरवः।
मन्थानभैरवश्चैव काकचण्डीश्वरस्तथा।
वामदेव ऋष्यशृङ्गः क्रियातन्त्रसमुच्चयी।
रसेन्द्रतिलको योगी भालुकिर्मलयाह्वयः।
महादेवो नरेन्द्रश्च वासुदेवो हरीश्वरः।
एतेषां क्रियतेऽन्येषां तन्त्राण्यालोच्य संग्रहः।" इति *

# [ अथ वाजीकरणतन्त्राणि ]।

अथ वाजीकरणं नाम "अल्पदुष्टविशुष्कक्षीणरेतसामाप्यायनं प्रहर्षजननाय" शास्त्रमायुर्व्वेदचरमाङ्गम्। वाजीकरणतन्त्रेषु च साम्प्रतं नावशिष्यते प्राचीनः संहितालेशोऽपि। विलुप्ताश्च नूनमखिला आर्षसंहिताः सहस्रवर्षतोऽपि प्राक्, यतः पुराणटीकाकृद्भिरपि नोद्धृतानि तत्प्रमाणानि। नचैतावता सर्व्वथा तासामभावः शङ्कनीयः। दृश्यन्ते हि वात्स्यायनीये कामसूत्रे औपनिषदिकाधिकारे नानाविधा वाजीकरणा योगाः प्राचीनाः, श्रूयते च तत्रैव—

"महादेवानुचरस्र नन्दी सहस्रेणाध्यायानां पृथक् कामसूत्रं प्रोवाच। तदेव तु पञ्चभिरध्यायशतैरौद्दालिकः श्वेतकेतुः संचिक्षेप। तदेव तु पुनरध्यर्द्धेनाऽध्यायशतेन साधारणसांप्रयोगिक-कन्यासंयुक्तक-भार्य्याधिकारिक-पारदारिक-वैशिकौपनिषदिकैः सप्तभिरधिकरणैर्बाभ्रव्यः पाञ्चालः सञ्चिक्षेप। तस्य षष्ठं वैशिकमधिकरणं पाटलिपुत्रिकाणां गणिकानां नियोगाद्दत्तकः पृथक्चकार। तत्प्रसङ्गाच्चारायणः साधारणमधिकरणं पृथक् प्रोवाच। सुवर्णनाभः साम्प्रयोगिकम्। घोटकमुखः कन्यासंप्रयुक्तकम्। गोनर्द्दीयो भार्य्याधिकारिकम्। गोणिकापुत्रः पारदारिकम्। कुचुमार औपनिषदिकमिति।"

* एष पाठोऽस्मदीयपुस्तकालयस्थाद्धस्तलिखितपुस्तकाद् गृहीतः। मुद्रितपुस्तके तु बहुधा दृश्यानि पाठान्तराणि।

एवञ्चानुमीयते—पुरा कामसूत्रकारैरेव ऋषिभिः प्रणीतं कामशास्त्राङ्ग-भूतमौपनिषदिकाख्यमेतत्तन्त्रमायुर्व्वेदे वाजीकरणतन्त्रमिति संज्ञया पृथक् प्रतिष्ठामयासीत्। एवञ्च वात्स्यायननिर्द्दिष्टमिदम्—

४५। **कुचुमारतन्त्रं** नाम प्राचीनं वाजीकरणतन्त्रं कदाचित् सुप्रसिद्ध-मभूदिति शक्यमसंशयं वक्तुम्। किञ्चैवमौद्दालकिवाभ्रव्यकृतयोरतिमहतोः कामशास्त्रयोरौपनिषदिकाधिकारद्वयमपि पुराणं वाजीकरणतन्त्रद्वयमेवेत्यपि सुवचम्।

वात्स्यायनश्चासौ महाराजचन्द्रगुप्तस्याचार्य्यभूतः कौटिल्य एवेति केचित्। तदाख्यो मुनिरित्यपरे। उभयथाऽपि द्विसहस्राधिकवर्षपुराणत्वमस्य न व्याहन्यते। तथाचामूनि वात्स्यायनोद्दिष्टानि औद्दालकि-वाभ्रव्य-कुचुमारादिकृतानि तन्त्राणि ततोऽपि भृशं प्राचीनतराणीति निर्व्विवादः सिद्धान्तः।

वाजीकरणतन्त्रावशेषस्तु सम्प्रति चरके चिकित्सास्थानस्य द्वितीयाध्याये सौश्रुतचिकित्सितस्य षड्विंशतितमाध्याये च दृश्यते—इति दिक्।

तदेतदद्यापि पञ्चचत्वारिंशत्संख्यानां विलुप्तार्षग्रन्थानामभिज्ञानसूचित-मष्टाङ्गमानुषचिकित्सासमन्वितमतिप्रौढ़िमुपागतं शास्त्रमायुर्व्वेदाख्यमर्णववद-गाधमिदानीं दुर्द्दैवागस्त्यचुलुकीकृतं कस्य न शोकमावहति? को नु वा समर्थः प्राचीनगौरवमनुस्मरन् पुनस्तदुद्धारापूरणार्थं न प्रयतेत?

गजाश्वचिकित्सितादिविषये पुनरभूवन्नैकसंख्याः प्राचीनाः संहितास्तासु—

(१) **शालिहोत्र संहिता**—अश्वायुर्व्वेदविषया। सेयमिदानीं दुर्लभाऽपि सुप्रसिद्धैव। सा च पुरा आरबदेशीयैः स्वभाषयाऽनूदिता "शाला-टोर" इति संज्ञया प्रख्यापिता बभूवेति प्रसिद्धिः पुरावृत्तविदाम्।

नकुलकृतं जयदत्तसूरिकृतञ्चाश्ववैद्यकमिदानीं वङ्गदेशीयैसियाटिक् समाजेन प्रकाशितं प्रसिद्धमेव। तत्र नकुलकृते ग्रन्थे दृश्यते—

"जयति स पाण्डवनाथो धर्म्मसनाथो युधिष्ठिरो नृपतिः।
भीमार्ज्जुनसहदेवास्तदनुचरो वाजिशास्त्रतत्त्वज्ञः॥
दृष्ट्वा सम्यङ् नकुलः शास्त्रं कृत्स्नं च शालिहोत्रीयम्।
ब्रूते शास्त्रार्थमन्यच्छास्त्रं कृत्वा समासेन॥"—इति।

(२) **पालकाप्य संहिता**—गजायुर्व्वेदविषयः सुमहान् ग्रन्थः। स चेदानीं पुण्यपत्तनस्थानन्दाश्रमाध्यक्षैर्मुद्रितः। तत्र अङ्गाधिपरोमपादनृपतिं प्रति भगवता पालकाप्यमुनिना समुपदिष्टं कृत्स्नं गजायुर्व्वेदशास्त्रम्।

अथामुष्मिन्नायुर्व्वेदमध्यन्दिनसमये निखिलभूमण्डले भारतस्यैवासीदुज्ज्वल-ज्ञानालोकप्रकाशता, तदितरेषाञ्च देशानां सन्तमसाच्छन्नतेति सुविदितं पुरावृत्तविदाम्। तदानीञ्च आर्य्यावर्त्तबहिष्कृतैः कैश्चन व्रात्यक्षत्रियैर्नानादेशोपनिविष्टैः समुन्मेषिता भारतीया-ज्ञानालोकच्छटा तत्तद्देशेषु। क्रमशश्च परस्ताद् हीयमाने-ऽप्यार्षज्योतिषि नवाभ्युदितैर्बौद्धाचार्य्यैश्चिरन्तनार्षज्ञानाधिकारि-भिर्नवीनधर्म्मप्रचारोत्सुकैः प्रचारिताऽभूदधिकाधिकं भारतीया ज्ञानसम्पद् दूराद्दूरतरेषु प्राच्यप्रतीच्यप्रदेशेषु। एवञ्च क्रमात् परम्परया समुद्भासते स्म प्रतीच्याम् आरबदेशश्च (Arabia), मिश्रदेशश्च (Egypt), ग्रीस-रोमाद्याश्च देशाः; प्राच्यामुदीच्याञ्च[1] जापानादिदेशाश्चीनाख्यो महादेशश्च, दक्षिणस्याञ्च यवद्वीपाद्याः[2] केचन द्वीपाः। ग्रीसदेशीयाश्च विद्वांसः पुरा समग्रस्य यूरोपखण्डस्य गुरुपदमधिरूढाः—इत्युरीकुर्व्वन्ति सर्व्व एव यूरोपीयाः। यथाच परम्परया साक्षाद्वा भारतशिष्याः ग्रीसदेशीयास्तत्र बहुधा समुन्नेयानि प्रमाणानि। तेषु कानिचित् प्रदर्शयामः—

आयुर्व्वेदमध्यन्दिने समग्रभूमण्डले आयुर्व्वेदस्य प्रचारः निखिल चिकित्सा-शास्त्रबीजता च।

(१) 'पोकक्'—इत्याख्येन पाश्चात्यपण्डितेन[3] शतशो दृष्टान्तप्रदर्शन-पुरःसरं सम्यक् प्रतिपादितमेतद् यथा—न केवलं ग्रीसभाषा संस्कृतभाषातः समुद्भूता किन्तु ग्रीसदेशीयानां नगर-दैवतनाम-कथावस्त्वादीन्यपि भारतीय-नगरदैवतनामादीनां सर्व्वथाऽनुकारीणि।

(२) पुरातनचित्रेषु ग्रीसरोमदेशीयानां वेशविन्यासः सर्व्वथा भारतीय-वेशानुकार्य्येवाङ्कितः—इति च स्फुटं चक्षुष्मताम्।

(३) अतिविशदञ्चान्यत्र[4] प्रदर्शितमस्माभिर्यन्निखिलान्यपीदानीन्तनानि यूरोपीयशल्यतन्त्रोक्तयन्त्रशस्त्राणि (—किमुत तानि ग्रीसदेशीयानि!) आयु-र्व्वेदोक्तयन्त्रशस्त्रैः प्रायेणाऽभिन्नरूपाणि। संवदन्ते च सर्व्वथा ग्रीसदेशीययन्त्र-शस्त्राणां लक्षणान्यपि स्वल्पतरलभ्यमानैरपि पुराणटीकाकारोद्धृतैर्यन्त्रशस्त्रलक्षणैः।

---

१ यथा विष्णुपुराणे—'स (सगरः) तद्गुरुवचनमभिनन्द्य तेषां वेशान्यत्वमकारयत्। यवनान् मुण्डित-शिरसः, अर्द्धमुण्डान् शकान्, प्रलम्बकेशान् पारदान्, पल्हवांश्च श्मश्रुधरान्, निःस्वाध्यायवषट्कारानेतानन्यांश्च क्षत्रियांश्चकार—इत्यादि। (विष्णुपुराण ४ अंश० ३ अ०)। २ यवद्वीपवासिषु केचिदद्यापि आर्य्यधर्म्मानुयायिन इति सम्प्रत्या विष्कृतं नाम। ३ Vide Pocock's India in Greece. ४ मदीये "आयुर्वेदोक्त यन्त्रशस्त्रादि ओ पाश्चात्य सर्जरि"—इत्याख्ये वङ्गभाषामये निबन्धे। निबन्धश्चायं बहुयन्त्रशस्त्रप्रतिकृतिसहितः कलिकाताख्य-साहित्यसभया मुद्राते साम्प्रतम्।

( ४ ) स्वीकृतञ्चेदं प्राचीनैतिहासिकैर्ग्रीसदेशीयैर्यद् भारत-मिश्रदेशादि-सभ्यैरेव ज्ञानैरभूवन् ज्ञानिनः 'पिथागोरस्'-'हिपोक्रेटिसा'द्याः ग्रीसभिषगाचार्य्याः । मिश्रदेशश्च आर्य्य-बर्ब्बरजात्योर्मिश्रीभूतयोर्निवासात्तथासंज्ञः ।

(५)वातपित्तकफशोणितानां सर्व्वदेहधारणहेतुता सर्व्वरोगकारण[२]ता च दृश्यते ग्रीसदेशीयभिषग्विद्याग्रन्थेषु । मतञ्चेदमतिपुराणं धन्वन्तरिसाम्प्रदायिकानाम् ।

( ६ ) अलिक्सन्दराख्यश्च ग्रीसदेशीयसम्राड् दिग्विजयाय प्रस्थितो भारतं समागत्य सर्पदष्टचिकित्सार्थं भारतीयान् वैद्यानाजुहाव, विसिष्मिये च तन्नैपुण्य-दर्शनेनेति सुप्रसिद्धा वार्त्ता[३] । समनन्तरञ्च टिसियस्-मेगास्थिनिसाख्यौ ग्रीक-भिषजौ भारतमध्यूषतुः ।

( ७ ) नव्यैरपि बहुभिर्गम्भीरदर्शिभि[४]रङ्गीकृतं यद् भारतीयचिकित्साशास्त्रमेव निखिलचिकित्साशास्त्रमूलमिति ।

अथ चेदत्रापि विवदेरन् केचित्—ग्रीसदेशत एवाविर्बभूव भारतीयज्ञान-ज्योतिरित्यभिदधानास्तर्हि सुखमिह मोदन्तां तादृशा आरूढशाखाच्छेदिनः ।

---

१ Cf. "The Greeks themselves did not lay claim to the honor—which is now often claimed for them by modern writers—of originating culture generally or the Science of Medicine in particular. Nearchus and Arrian inform us that "the Grecian physicians found no remedy against the bite of snakes but the Indians cured those who happened to incur that misfortune." Arrian tells us that the Greeks when indisposed applied to the Sophists (Brahmans), who by wonderful and even more then human means, cured whatever would admit of cure. Dioscarides, who lived in the first century A. D., is the most copious author on the Meteria Medica of the ancients and Dr. Royle has in an exhaustive inquiry shown how much of his Materia Medica was taken from the more ancient Materia Medica of the Hindus. The same remark holds good with regard to Theophrasus, who lived in the 3d century B. C., while even Ktesias who lived in the 5th century B. C. wrote an account of India, which Dr. H. H. Wilson has shown, contains notices of the Natural products of India. But the chain of evidence is complete, when Hippocrates, called "the father of medicine", because he first cultivated the subject as a science in Europe, is shown to have borrowed his Materia Medica from the Hindus. We refer our readers for evidence to Dr. Royle's excellent essay. "It is to the Hindus," says Dr. Wise, "that we own the first System of Medicine." (R. C. Dutt's Ancient India, Vol. II. Pp. 249—50.) For the testimonies of Pythagoras, Herodotus &c., see *Ibid*, pp. 17—19. For the debt of Hippocrates to India, also see Royle's "Essay on the Antiquity of Hindu Medicine"—p. 109. २ Cf. Dr. Allan Webb—'In the days of Hippocrates, the elementary theory was the only one known in Greece. His views and those which Pythogoras entertained of health and disease precisely accord with Plato's and the Hindu Sushruta's." (Historical Relations of Ancient Hindu with Greek medicine, P. 9.) ३ Vide V. A. Smith's Early History of India. ४, *e. g.* Dr. Wise (Commentary on Hindu Medicine), Dr. Royle, Dr. Allan Webb &c.

आरबदेशीयानाञ्च भारतीयज्ञानकणाधिकारिता अल्बरुणाख्येन[1] प्राचीनाऽरबैरतिहासकेन सम्यक् स्वीकृता। सुप्रथिता चेयं चिरन्तनी वार्त्ता यद् "हरुण् उल् रशीद्"—इत्याख्यस्य नरपतेः राज्याधिकारसमये ख्रीस्तीयाष्टमशतके आरबभाषयानूदितं 'शरक्'( चरक ), 'सस्रद्'( सुश्रुत )—इत्याख्यं ग्रन्थद्वयम्, माधवीयनिदानम्, अपरे च केचिद् ग्रन्था अगदतन्त्रकौमारभृत्यादिविषयाः। श्रूयते च — मङ्कनामा कश्चन भारतीयो भिषक् तमेव नृपतिं दारुणरोगमुक्तं विधाय तत्सदसि महतीं प्रतिष्ठां गतो, वनौषधिविद्याविषयं कञ्चन संस्कृतग्रन्थमारबभाषयाऽनूदितवानिति।

यावनचिकित्सा चेदानीं यूनानी[2] तिब्बीति संज्ञया वा प्रसिद्धा। सेयं पुरा भारतादारबदेशं गता ततश्च पुनर्भारतविजयिभिर्महम्मदीयनृपतिभिर्भारते समानीतेति नात्र कस्यापि विमतिः। तत्र यावनचिकित्सायामायुर्व्वेदबीजान्यद्यापि दृश्यन्ते बहुशः। तथाह्यत्र[3] स एव सौश्रुतमतानुसारी वातपित्तकफशोणितवादः, सैव सिराव्यधप्रणाली, स एव सिराव्यधस्य बहुलप्रचारः[4], तान्येव मरिच-मधुक-लाक्षा-गुग्गुल्वादीनि शतशो भारतीयानि भेषजानि, क्वचित् स एव रसादिप्रयोगक्रमः, सर्व्वत्र च सैव शैली भेषजप्रयोगस्य। वाजीकरणञ्चेदानीं सर्वस्वभूतं यावनचिकित्सायाः। तथाच सर्व्वथा निःसंशयं ब्रूमो यावनचिकित्सेयमायुर्व्वेदापभ्रंशरूपेति।

चीनदेशीयचिकित्साशास्त्रेऽपि बहुधा दृश्यमायुर्व्वेदबीजम्। तथाहि तत्र स एव पुनर्वातपित्तकफशोणितवादः इत्सिङ्गाख्येन[5] चैनिकपरिव्राजकेन निर्दिष्टः। भेषजानि च बहुशो भारतोद्भवान्येव।

तस्मान्निखिलचिकित्साशास्त्रबीजभूतोऽयमायुर्व्वेद इत्यत्र न युज्यते धीमतां मनागपि संशयः। स चायमायुर्व्वेदमध्यन्दिनकालीनो वृत्तान्तो यं स्मरन्तोऽपि धन्या वयमिदानीन्तनीं निजाऽधन्यतां सुतरामाकलयामः।

---

१ Vide Dr. P C. Roy's History of Hindu Chemistry, Vol I. Introd. Ch. VI., which contains a full description of "The Indebtedness of Arabians to India." २ यूनानीशब्दोऽसौ यवनानी शब्दस्यापभ्रंश एव। यवनानां भाषा यवनानी—इति हि वैयाकरणाः। ३ एतत्प्रमाणार्थं दृश्यतां यः कोऽपि यूनानीग्रन्थः यथा—"इलाज्-उल् गुर्वा", "तिब्ब अकरब्बी" इत्यादि। तत्र यावनभाषया वायु-पित्तकफाः "सौदा-सफ्रा-बल्गम्" इत्याख्याभिः प्रसिद्धाः। ४ तथा हि सुश्रुते—"सिराव्यधश्चिकित्सार्द्धं शल्यतन्त्रे प्रकीर्त्तितः।" ( सु० शा० ८ अ० )। ५ Vide Itsing's Records of Buddhistic Practices (Translated by Prof. Takakusu), Ch. 27—29

अथेदानीं द्विसहस्रवर्षाधिककालीनमायुर्व्वेदस्य ( अथवा—सर्व्वार्थविद्याया एव ) ध्वंसवृत्तान्तं संक्षेपादालोचयामः।

अथ भारतीयानां ज्ञानार्ज्जन विघ्नाः शास्त्रलोपहेतवश्च। (१) तत्रादौ विघ्नः— ग्रीसदेशीयानामाक्रमणम्।

इह खलु क्रमेण दुर्दैववशाद्धीयमाने चिरन्तनवैदिकाचारगौरवे, क्षीयमाणज्योतिषि बौद्धदुर्द्दिनाच्छन्ने च भारतप्रभावदिनकरे प्रादुरभूवन्नकालवज्रनिर्घाता इव शक-हूण-यवनादिजातीनामुत्पाताः शतधा ज्ञानार्ज्जनविघ्नभूताः। तेष्वाद्य उत्पातो भारताक्रमणमलिकसन्दराख्येन ग्रीकभूपतिना। स हि महाबलः परःसहस्रचतुरङ्गसेनासमृद्धिः खीस्तपूर्व्वसप्तविंशत्यधिकत्रिशतमिते वर्षे (327 B. C.—अर्थात् प्रायः सपादद्विसहस्रवर्षतः प्राक्) राहुरिव करालो भारतसूर्य्यमग्रसीत्। तदाक्रमणजन्ये च महति विप्लवे विध्वस्तप्राय आसिन्धुपञ्चनदावधिर्महादेशो येन गृहदाहदुर्भिक्षादिना सहस्रशो विनष्टाः प्रजाः, शतशः प्रनष्टानि च ग्रन्थरत्नानि। प्रतिनिवर्त्तमानेन च तेन ग्रीकभूपतिना तत्तत्प्रदेशशासनाय विनियुक्तः सेल्युकसाख्यो ग्रीकवीरः, स्वदेशं प्रापिताश्च केचन भारतीया ग्रन्थाः, विशेषतश्च चिकित्साग्रन्थाः भारतीयचिकित्सानैपुण्यविलोकनविमुग्धेन चेतसा। ततो मगधाधिपेन महाराजचन्द्रगुप्तेन पराजितोऽसौ सेल्युकस्वीरः सन्धाय प्रतिनिवर्त्तमानोऽपि भारतीयविद्यार्ज्जनाय मेगास्थिनिसाख्यं ग्रीकभिषजं चन्द्रगुप्तसदसि पाटलिपुत्रे स्थापयाम्बभूव। तदेतदखिलं भारतीयज्ञानालोकस्य यावनदेशप्रचारस्य द्वारमभूदिति पुरावृत्तविदां वार्त्तया सुप्रतिपन्नं चक्षुष्मताम्। न च शङ्क्यम्—ग्रीसदेशीयज्ञानत एव भारतस्यासीद् विज्ञानसमृद्धिरिति। न हि मुष्टिमेयैर्वितताड़िताविशिष्टैश्च ग्रीकसैनिकैः शिक्ष्यन्ते स्म भारतीया ज्ञानर्द्धिसमृद्धाः सुधियः, न च सत्येवं ग्रीसदेशीयैरैतिहासिकैस्तथा नाभविष्यल्लिखितम्। दर्शिताश्चास्माभिरनेकधाऽन्येऽपि भूतार्थप्रतिपादका हेतवः।

---

१ अतत्या ऐतिहासिकवार्त्ताः प्रायेणैतेभ्यो ग्रन्थेभ्यः संगृहीताः—V. A. Smith's Early History of India ; R. C. Dutt's School History of India ; H. Shastri's History of India ; Elphinstone's History of Ind a &c. वैद्यकाचार्य्याणां कालनिर्णयस्त्वस्माभिर्बहुभिर्हेतुभिरन्यत्र कृतः।

( २ )
द्वितीयो विघ्नः—
नन्दवंशध्वंसविप्लवः,
राज्यारम्भे अशोककृतो
महान् प्रजाध्वंसश्च ।

ततः प्रशान्तप्राये नन्दकुलधूमकेतोर्महाराजचन्द्रगुप्तस्य शौर्य्येण ग्रीकाख्य-यवनानां प्रभावे चन्द्रगुप्तस्य तत्सूनोर्विन्दुसारस्य च राज्यावसाने क्रूरप्रकृतिरशोकनामा विन्दुसारपुत्रो राजवंश्यान् बहुधा विनिपात्य सिंहासनमारुरोह (264 B C.)। तेन च क्रोधभयानकेन 'चण्डाशोक' इति ख्यातिं गतेन कलिङ्गेषु वर्षत्रयं सुमहान् युद्धविप्लवः समारब्धस्तेन लक्षशो विनष्टाः प्रजाः, न किमुत शतशो ग्रन्थरत्नानि ? ततोऽसौ उपगुप्ताख्येन बौद्धाचार्य्येणोपदिष्टो बौद्धधर्म्ममग्रहीत्, प्रसिद्धश्चानन्तरं धर्म्मिष्ठो भवन् 'धर्म्माशोक' इति बौद्धेषु। प्रचारितश्च तेन नानादिगन्तेषु प्रेषितैर्बौद्धश्रमणैश्चीन-ग्रीसादि सुदूरदेशेषु बौद्धानां धर्म्मो ज्ञानालोकश्च भारतीयः। आयुर्व्वेदश्च पुनस्तदानीं किञ्चिन्मन्दप्रभोऽपि परहितव्रतैर्बौद्धश्रमणैरुपासितश्चीन-यवनादिदेशेषु प्रचारविशेषं लेभे। तथापि राजाज्ञया शवच्छेदादि[1]निषेधात्ततःप्रभृति शारीरशास्त्रस्यावनतिरेवाभूत्, नष्टप्रायशारीरस्य च वैद्यकस्य कथङ्कारं समुन्नतिः ?

( ३ )
तृतीयो विघ्नः—
पार्थिनाम्नां यवनानां
शकानाञ्च
भारताक्रमणम् ।

ततो विनष्टपराक्रमे मौर्य्यवंशे (183 B. C.) पार्थिनामानो ग्रीकयवनाः शकाख्यबर्वराश्च पुनःपुनर्भारतमाक्रम्य आसिन्धु-साकेतपुरावधिप्रदेशेषु निरन्तरं विप्लवं जनयामासुः। तदा मिलिन्दाख्यो यवनः पञ्चनदप्रदेशं बुभुजे, स च नागार्ज्जुनेन बौद्धधर्म्मे उपदिष्ट इति मिलिन्दप्रश्नी[2]या कथा बौद्धानाम्। मगधेषु च तदैव पुष्यमित्रः शुङ्गवंश्यो मौर्य्यवंश्यं बृहद्रथं विनाश्य राज्यमग्रहीत्, विताड़ितश्च तेन मिलिन्दाख्यो यवनः साकेतपुरीं रुन्धानः। भगवान् पतञ्जलिश्च तदानीन्तन एवेति ऐतिहासिकाः[3]।

[ततः
शुङ्गवंश्येन पुष्यमित्रेण
स्थापितायां शान्तौ
चरकस्य प्रादुर्भावः। ]

एवञ्च मनाक् प्रशान्ते विप्लवे चरकापरपर्य्यायेण तेन भगवता पतञ्जलिना प्रतिसंस्कृता विशीर्णप्राया अग्निवेशसंहितेति प्रागदर्शयाम। बौद्धाचार्य्येण नागार्ज्जुनेन च तस्मिन्नेव काले सुश्रुतसंहिताऽपि प्रतिसंस्कृतेति केचित्। अमुष्य च प्रायो वर्षसहस्रद्वयी समतीता वृत्तान्तस्य।

---

१ Vide Journal of Asiatic Society, Vol vii. P. 261. २ मिलिन्दप्रश्नश्चासौ पालिभाषया लिखितो "मिलिन्दपञ्हो"—इति संज्ञया प्रसिद्धो बौद्धग्रन्थः। मिलिन्दः = Meander (Greek). ३ Vide Mabel Duff's Chronology of Ancient India; also, Goldstucker and Bhandarkar (referred to on page ञ of text). अतएव "अरुणद् यवनः साकेत"मिति महाभाष्ये प्रयोगः।

[शकनरपतेः कनिष्कस्य अधुना १८३५— शकाब्दाः। ततः परम् काश्मीरे दृढ़बल-प्रादुर्भावः।]

अथ पुनः पुनः शकजातीयानामाक्रमणेन चीणदीनबलेषु सकलराजकेषु कुशाणवंशीयः कनिष्कनामा महाप्रतापः शकनरपतिरा-हिमाद्रिविन्ध्यपर्य्यन्तं भारतस्य पश्चिमार्द्धं बहुभिर्युद्धैर्जिगाय। तस्य शकनरपतेरतीताब्दाश्च साम्प्रतं १८३५-संख्याः। पर स्तादर्षशतत्रयं कथञ्चिदिव प्रशान्ता रणलीला। अस्मिंश्चाव-सरे चरकसंहितापूरकः सम्बभूव काश्मीरेषु दृढ़बलाचार्य्यः।[1]

( ४ ) चतुर्थो विघ्नः— हूणजातिकृतः सुमहान् राज्यविप्लवः। [ततः शकारिविक्र-मादित्यस्य प्रादुर्भावः।]

ततो हूणैः काम्बोजीयैश्च पुनर्भारतमाक्रम्य शलभैरिव शतकोटिसंख्यैर्वर्षशतं समारब्धो विप्लवः सुमहान्। हूणाश्च शका एव भिन्नप्रान्तीयाः इति केचित्। तांश्च सर्वान् मालवाधिपो विक्रमादित्यो यशो धर्म्मदेवाख्यो महता शौर्य्येण विजित्य शकारिसंज्ञां लेभे, विस्तारयामास च सुमहत् साम्राज्यमुज्जयिनीत आ-हिमाद्रि-मूलम्। ततश्च प्रभृति (खीस्तीय ५३२ अब्दतः)—सर्व्वथा विताड़ितेषु शकहूणादिबर्ब्बरेषु सार्द्धचतुःशतवर्षं पञ्चशतवर्षं वा कथञ्चित् प्रतिष्ठिता शान्तिः। विक्रमादित्यश्चायं कालिदासादिनवरत्नोपासितो विद्याब्धि-कर्णधार इति प्रख्याप्यते पुरावृत्तवेदिभिः। सोऽयं सम्बत्[2]प्रवर्त्तको विक्रमो नवेति नास्मद्विचार्य्यम्।

[महाराजविक्रमादित्या-दीनां राज्यकालेषु पञ्चशतवर्षान्तः भारतीय-विद्यानां पुनरुद्धारः। तत्र कालिदासादीनां वाग्भट-वृन्द-माधव-चक्रपाणि-डल्लना-दीनाञ्च प्रादुर्भावः।]

अत्र च सार्द्धचतुःशतवर्षान्तः पञ्चशतवर्षान्तर्वा विक्रमादित्यवंश्येषु भारतं शासत्सु पुनरपि समुद्भासते स्म म्लानज्योतिरपि भारतीय-ज्ञानसमृद्धिः। अत्रैव खल्वाविर्बभूवुर्विक्रमकाले कालिदासा-मरसिंह-वररुचि-वराहमिहिराद्याः विद्वांसः, ततश्च परं क्रमेण दण्डि-बाणभट्ट-भवभूत्यादयः केचन कवयः, आर्य्यभट्ट-ब्रह्म गुप्तादयो ज्योतिर्विदश्च। स च भगवान् शङ्कराचार्य्योऽपि खीस्तीयनवमशतके प्रादुर्भूतः एतत्कालाभ्यन्तरीण एव। आयुर्वेदे च एतत्समयान्तरेव प्रादुरासीद् वाग्भटाचार्य्यो[3] नाम अष्टाङ्गवैद्यकसंग्रहीता, वृन्दमाधवादयश्चापरे संग्रहकाराः,

१ दृढ़बलकालनिर्णयहेतुः ( ८० पृष्ठे ) दर्शितपूर्व्वः। २ सम्बत्प्रवर्त्तको विक्रमादित्यस्तु १९७० वर्षः पुराणः स्यात् किन्तु तत्काले कस्यापि विक्रमस्य प्रादुर्भावः साम्प्रतिकैरैतिहासिकैर्न शक्यो निर्णेतुम्। तथा चात्र बहुधा प्रवर्त्तन्ते वादाः। तद्विचारस्तु अप्रासङ्गिकत्वाद्विस्तरभिया नेह क्रियते। वराहमिहिरोक्तगणनया तु कालि-दासादिनवरत्नोपासितो विक्रमादित्यो यशोधर्म्मदेव एव पूर्व्वोक्तः। ३ तत्र वाग्भट-कालनिर्णये हेतुरुक्तपूर्व्वो वक्ष्यते च। वृन्दमाधवादीनां कालनिर्णये हेतवस्त्वनुपदमेव वक्ष्यन्ते।

जेज्जट-गयदास भास्कर-ब्रह्मदेवाद्या वैद्यकव्याख्यानारश्च। चक्रपाणिदत्तस्तु वङ्गेषु नयपालनृपतेः प्रियभिषगासीदिति तदुक्त्या[1] ज्ञायते, नयपालकालश्च ख्रीस्तीय १०४०—१०६० वर्षाणि। तस्माद् भारतीयविद्यानां पुनरभ्युदयकालस्य शेषतः प्रादुरासीद् वैद्यकाचार्य्यश्चक्रपाणिः। डल्लनाख्यः[2] सुप्रसिद्धसुश्रुतटीकाकारश्च चक्रपाणेः समकालीनः किञ्चित्पूर्व्वतनो वा।

मालवराज्याधिपो नानाशास्त्ररसिकः प्रसिद्धतमो भोजनरपतिश्च एतत्कालान्ते खृ० १००६ अब्दे सम्बभूवेत्यैतिहासिकाः। मालवदेशश्च विन्ध्याद्रिश्रेणीरक्षितो नाभूद् महम्मदीयाक्रमणविषयस्तदानीम्।

अथ पुनर्भारतीयानां मन्दभाग्यवशात् प्रववृते महम्मदीयानां घोराक्रमणप्रवाहः। तत्राद्यमाक्रमणं महम्मद विन्-कासिम-कृतं सिन्धुदेशेषु ( ख्री० ७१२ वर्षे ) श्रूयते। ततः परं कदा एकादशशतके गान्धारप्रान्तीयाद् गज्निनगरादागतेन दुर्द्धर्षेण महमुदाख्येन पापिष्ठेन बहुसहस्रदुराचारसैनिकसहायेन पुनः पुनराक्रम्य लुण्ठिताः सोमनाथपत्तनादिषु भारतीयसम्पदः, कुट्टितास्तीर्थस्थानेषु देवमूर्त्तयः, व्यापादिताः सहस्रशो ब्राह्मणाः, निर्दग्धाश्च प्रतिदिनं शतशो गृहाः, तदा सर्व्वथा धनजनधर्म्मरक्षणव्याकुलैः परित्यक्तो नवीनज्ञानार्ज्जनप्रयत्नो लोकैः। न विद्मः—कियन्ति नाम तदा, ततःप्रभृति च, भस्मीभूतानि लुप्तावशिष्टानि प्राचीनग्रन्थरत्नानि !!

( ५ )
पञ्चमो विघ्नराशिः—
महम्मद गज्निकृतो
बहुवर्षव्यापी
भारतकीर्त्तिध्वंसः।

ततोऽनुपदमेव सुघोरकर्म्मणा घोराख्येन महम्मदेन स्वदेशद्रोहिणो जयचन्द्राख्यस्य कान्यकुब्जाधिपस्य साहाय्यात् समास्कन्द्य पातिता क्षत्रकुलसूर्य्यस्य देहलीपतेः महाराजपृथ्वीराजस्य राज्यश्रीः (ख्रीस्तीय० ११९१)। देहलीराजधान्यामद्यापि तत्कीर्त्तिस्तम्भमन्दिर-भग्नावशेषास्तत्तत्कुकृत्यसाक्षिभूताः। ततश्च दशवर्षाभ्यन्तरत एव महम्मदीयैर्दुर्वृत्तैर्निर्ज्जिता समग्रा आर्य्यावर्त्तभूमिर्मालव-दाक्षिणात्यवर्जम्। मालव-दाक्षिणात्ययोस्तु 'अल्तामास्' इत्याख्येन तद्दासपुत्रेण, 'अलाउद्दीन' इत्याख्येन च तत्परवर्त्तिना महम्मदीयेन ख्रीस्तीय-

( ६ )
षष्ठो विघ्नः
महम्मदघोरकृतं
सुघोरमाक्रमणम्
पृथ्वीराज-
राज्यापहारश्च।

---

१ तदुक्तिश्च चक्रसंग्रहसमाप्तौ —'गौडाधिनाथरसवत्यधिकारिपात्रे'त्यादिप्रसङ्गस्य शिवदासकृतव्याख्याने द्रष्टव्या। २ डल्लनकालनिर्णयहेतुश्चाग्रे वक्तव्यः।

त्रयोदशशतकेऽभूदाक्रमणम्। तयोश्च कुकृत्यशतैर्भारतदक्षिणार्द्धस्था अपि विध्वस्तप्राया: प्रायेण सर्व्वा एवाऽर्य्यकीर्त्तय:। उज्जयिनीस्थानि महाकालमन्दिरादीनि तु—अल्तामास इत्यनेनैव विध्वस्तानि।

[ वङ्गेषु माधव-चक्रपाण्योरनन्तरं विजय-रक्षित-श्रीकण्ठदत्तयो: प्रादुर्भाव: ]

वङ्गेषु तु महम्मदीयाक्रमणाद् दूरतरं स्थितेषु, खीस्तीयसप्तमशतके अष्टमशतके वा निदानसंग्रहकार इन्दुकरात्मजो माधवस्ततश्च परम् एकादशशतके चक्रपाणिर्नाम नयपालराजस्य वैद्यवर: प्रादुर्बभूव। ततो द्वादशशतके (त्रयोदशशतके) वा किञ्चित् प्रवृत्तेऽपि मुसलमानाक्रमणे विजयरक्षित-श्रीकण्ठदत्ताभ्यां टीकाकाराभ्यां पुनरपि किञ्चित् समुद्दीपितं वैद्यकज्योति:। तयोश्चान्तिके तदानीमप्यासन्ननेके प्राचीनवैद्यकग्रन्था इति तदुद्धृतप्रमाणशतैरनुमीयते। ततश्च हन्त महम्मदीयै: कपटनीत्या निर्ज्जिता बङ्गराजलक्ष्मीरपि।

( ७ )

सप्तमी विघ्नराशि:—चेङ्गिज्खान्-तैमुर-लङ्गाभ्यां भारत-सम्पद्विलुण्ठनं जनपद-विध्वंसनञ्च।

ततस्त्रयोदशशतकमध्यभागे 'चेङ्गिज्खान्' इत्याख्येन मुगलजातीयमहादस्युना पुनरपि विलुण्ठिता भारतीया: सम्पद आ-हिमाद्रिमध्यदेशपर्य्यन्तम्। नृशंसाधमेन च तेन बहुलक्षनरघातकेनानुष्ठितान्यतिघोराणि कुकृत्यानि। तत: परावृत्तेऽपि चेङ्गिस्खानाख्ये मुगले पुन: पुन: समागतैर्मुगलै: सह पठाननरपतीनां प्रावर्त्तत चिराय दारुणा रणलीला बहुजनपदध्वंसिनी। अन्तरा च 'तैमुरलङ्गा'ख्यो घोरकर्म्मा मुगलदस्युराज: खीस्तीयचतुर्द्दशशतकान्ते समापतितो मासद्वयं यावदप्रतिहतप्रसरो लक्षश: प्रजा विनिहत्य, प्रज्वाल्य च तद्गृहान्, विलुण्ठ्य च तत्समृद्धी: समग्रमार्य्यावर्त्तं हाहाकारमयमकरोत्।

[ दाक्षिणात्ये वीरवुक्क-नृपतिकृता राज्यरक्षा सायण-माधव-कृतो वेदोद्धारश्च। तत्समकालं च शार्ङ्गधराख्यस्य वैद्यक-संग्रहकारस्य प्रादुर्भाव: ]

दाक्षिणात्ये त्वेवंविधेऽपि समये वीरवुक्को नामाऽभून्महाविक्रान्तो नरपतिर्येन विजयनगरराज्यमधितिष्ठता न केवलं सुरक्षिता दाक्षिणात्यराज्यश्रीरेव किन्तु भगवता मत्स्यावतारेणेव समुद्धृता व्याख्यापिताश्च वेदा: स्वसभासद: सायणमाधवादीन् प्रोत्साह्य। शार्ङ्गधरो नाम स्वसंहिताख्यवैद्यकसंग्रहकारश्च दाक्षिणात्ये एतत्कालाभ्यन्तर एव समभूदिति शार्ङ्गधरपद्धत्यां निर्द्दिष्टेन कालेन (सं १४२०) प्रतीयते।

अथ षोडशशतकारम्भे बाबराख्येन मुगलराजेन विजितेषु पाठानराजकेषु मुगलराज्याधिकार: प्रवृत्ते। तत: कतिपयवर्षाणि बाबरपुत्रेण हुमायूनेन दिग्विजयविप्लव: समारब्ध:, शेरशा इत्यनेन बङ्गेषु पराजितोऽसौ क्रमादपहृतसिंहासनश्चासीत्। अन्तरा च मुगल-पाठानानां सुदुर्द्धर्षाणां युध्यमानानां संघर्षेण महानभूत् प्रजाविध्वंस: षोड़शवर्षाणि। तत: षोड़शवर्षान्ते पुनर्मुगलराज्यं प्रतिष्ठाप्य उपरते हुमायूने तत्पुत्र: प्रथितनामा अकव्वरशाहाख्यो नरपतिर्बाहुबलेन सिंहासनमध्यास्य विजितवान् समग्रमपि भारतं वर्षम्।

( ८ )
अष्टमो विघ्न: मुगल-पठानानां रक्तलीला-कृतो राज्यविप्लव:।

[ अथ अकव्वरशाह-समये प्रतिष्ठितायां शान्तौ विदुषां प्रादुर्भावो विद्योन्नतिश्च। तत्र कान्यकुब्जेषु वैद्यकाचार्य्यो भावमिश्र: ]

तत: सुप्रतिष्ठायां शान्तौ नानाविद्यारसिकोऽसौ नरपतिर्बहुधा समाहृत्य भारतीयान् विदुष: शास्त्राणि च, "दिल्लीश्वरो वा जगदीश्वरो वेति" महतीं यशोगाथामर्ज्जयाञ्चकार। ईदृशे च समयेऽभूवन् तानसेनाद्या: भारतीयसङ्गीताचार्य्या:, टोडरमल्लाद्या राजनीतिकोविदा:, अपरे च केचिन्नानाशास्त्ररसिका विद्वांस:। अस्मिन्नेव च काले षोड़शशतकपरार्द्धे सप्तदशशतकपूर्वार्द्धे वा कान्यकुब्जेषु प्रादुर्बभूव भावमिश्राख्य: प्रसिद्धवैद्यकसंग्रहकार:।

[ अथ शाहजहान-राज्यकाले भट्टोजि-दीक्षितादीनां विदुषां प्रादुर्भाव: ]

तत: अकव्वरशाहानन्तरं तत्पुत्रे जहाङ्गीरबादशाहे राज्यं भुक्त्वा उपरते, जहाङ्गीरपुत्रो शाहजहान् नरपतिर्भारतसाम्राज्यं बुभुजे। स चासौ देहलीदुर्ग-ताजमहलादिनिर्मापक: स्थापत्यादिनानाकलाप्रिय इति सुप्रसिद्धकीर्त्तिरद्यापि। तद्राज्यकाले च भट्टोजिदीक्षित-जगन्नाथपण्डितराजादीनां, समनन्तरञ्च नागेशभट्टादीनां प्रादुर्भाव इत्यैतिहासिका:।

( ९ )
नवमो विघ्न:—अवरङ्गजेवकृत: सुमहानार्य्यकीर्त्तिध्वंससंरम्भ:।

तत: अवरङ्गजेवनामा शाहजहानस्य कनिष्ठपुत्र: कपटशतेन स्थविरं पितरमवरुध्य भ्रातॄंश्च हत्वा राज्यमधिचक्रमे। ततश्च पुन: प्रावर्त्तत यतस्तत: सुमहानार्य्यकीर्त्तिध्वंससंरम्भ:। तेन हि 'हिन्दु'नामद्वेषिणा विनाऽपि क्रोधकारणं शतशश्चूर्णीकृतानि देवमन्दिराणि, निर्दग्धा: सहस्रशो ग्रन्थराशय:, व्यापादिताश्च बहुश: स्वधर्म्मनिष्ठा: प्रजा नानाविधमिषशतेन। एवञ्च भूय: कथञ्चिदु-

* विषयबाहुल्याद्दर्श मालाचराणां नि:शेषत्वात् पत्राङ्कानुसरणमेव वरमित:प्रभृति।

जीवितप्रायाऽपि शोच्यां दशामाजगाम पुनरपि भारतीया विद्यासमृद्धिः। आयुर्व्वेदश्च यावनवैद्यैर्हतसर्व्वस्वस्ततःप्रभृति कथञ्चित् प्राणिति स्म।

सोऽयमायुर्व्वेदस्य,— अथवा समस्तभारतीयविज्ञानदिनकरस्य—अपराह्णकालः, नूनं वा सन्ध्यारम्भ एव। तादृशे च काले प्राचीनविज्ञानारक्षणरागसंग्रहणपरा एवाभूवन्नाचार्य्या इत्यपि भागधेयमेव भारतस्य। नवीनविज्ञानाविष्करणे तु प्रतिभा न समुन्मिमेष तादृशराज्यविप्लवैकार्णवीभूते भारते इति किमत्र विस्मयपदं नाम?

[ अथ महाराष्ट्रवीरैः शिवाजीप्रमुखैः कृती धर्म्मसाम्राज्यस्थापनप्रयत्नस्तन्निष्फलता च आत्मद्रोहकृता ]

एवंविधे च काले महाराष्ट्रवीरैः शिवाजीप्रमुखैः पुनरपि धर्म्मसाम्राज्यस्थापनाय समारब्धः सुमहान् प्रयत्नो लब्धश्च कथञ्चित् साफल्यमपीति स्मरणार्हम्। परं तत्परवर्त्तिभिर्महाराष्ट्रराजकैः परस्परं विवदमानैः प्रकामं विलुण्ठनपरैश्च निर्मूलिता स्वल्पेनैव कालेन महाराष्ट्रसाम्राज्यस्थापनस्याऽऽशालता। तथापि पुण्यश्लोकानां शिवाजी-राजारामादीनां सुकृतप्रभावादद्यापि इन्दौर-बड़ौदा-गवालियरादिराज्येषु सावशेषं महाराष्ट्रज्योतिरिति महदिदं हर्षस्थानं भारतीयानाम्।

( १० ) दशमो विघ्नोत्पातः- "नादिरशाह"—"महम्मदशाह" इत्येताभ्यां कृता संहारलीला

अथ दुर्व्विषहपापभाराक्रान्ते मुगलसाम्राज्ये, अवरङ्गजेबराज्यावसाने ( खी० १७०७ ) अतिदुर्बलप्रभावेषु तत्पुत्रपौत्रादिषु पुनरपि 'नादिरशाह' इत्याख्येन महादस्युना नवधा देहलीराजधानीमाक्रम्य महती संहारलीला प्रवर्त्तिता ( खी० १७३८ )। ततश्च पुनर्नववर्षान्ते 'अहमदशाह अबदली'—इत्याख्येन दुर्द्धर्षदस्युना चतुर्द्धा विलुण्ठिता देहली-मथुराद्या नगराः, अनुष्ठितानि च पुनःपुनस्तानि तानि गृहदाहादिकुकृत्यानि।

ततः सदयेन वेधसा प्रतिष्ठितं ब्रिटिशसाम्राज्यम

ततः सदयहृदयेन वेधसा एतावतीभिरत्याचारपरम्पराभिरपि अविनश्यन्तीमिव भारतीयविद्यासमृद्धिमाकलयता तद्रक्षणाय सम्प्रेषिता उदारहृदयाः श्वेतद्वीपपुरुषा ब्रिटिशनामानः। तैश्च वाणिज्यार्थमागतैरपि भारतीयप्रजानां दुर्दशाविमोचनार्थमिव क्रमात् वङ्गेषु च दाक्षिणात्ये च राज्यभित्तयो निर्म्मिताः, स्थापितञ्च वर्षशतेन बहुरक्तपातं विनैव सुमहत् साम्राज्यमखिलभारतव्यापि। ततः ( खी० १८५७ वर्षे ) प्राप्तेऽपि सैनिकविद्रोहकृते विप्लवे, गुणलुब्धेव राज्यश्रीर्न

मुमोच तेषामेवाङ्कारोहणसुखम्। ततःप्रभृति क्रमात् सुप्रतिष्ठायां शान्तौ सुरक्षिते च प्रजालोके, प्रतिदिनमादीप्यते भारतीयं ज्ञानज्योतिः। न च स्वयं सुविमलज्ञानाधिकारिणोऽपि प्रकामं नोत्साहयन्ति राजपुरुषाः सम्प्रति सर्वा अपि भारतीया विद्याः—इति सर्व्वथा धन्यवादार्हा एते भारतीयानाम्।

सोऽयमेतावानतिदारुणोऽपि सम्प्रति प्राप्तावधिर्वैद्यकविद्यायाः (प्रत्युत सर्व्वासां विद्यानां) ध्वंससमयः। इदानीमेतत्कालान्तः प्रादुर्भूतानां वैद्यकाचार्य्याणां कालनिर्णये हेतवः केचिदुपन्यस्यन्ते प्रसङ्गात् संक्षेपेण।

चरकसुश्रुतयोः प्रतिसंस्कारकालौ दृढ़बलस्य वाग्भटः पूर्वजत्वञ्च

तत्र चरकदृढ़बलयोः कालो निर्णीतपूर्वः। वाग्भटश्च दृढ़बलस्यावरज एव न पूर्वजः, इति निश्चयोऽस्माकम्। यतो वाग्भटेन अष्टाङ्गसंग्रहेऽपि दृढ़बलीयकल्पस्थानमेव गद्यमयेन वचसाऽनूदितं, अष्टाङ्गहृदये "ऋषिप्रणीते प्रीतिश्चे"दित्यादिवचनेन स्पष्टं लक्षितञ्च दृढ़बलकृतं चरकापूरणम्।

सुश्रुतसंहितायाः प्रतिसंस्कारस्तु चरकसंहितारचनादनन्तरजः प्रतिभाति। दृश्यन्ते ह्यत्र बहुधा चरकीयाः पाठाः, विषयसन्निवेशक्रमश्च[1] साधीयान्। तत्र दिङ्मात्रमुदाह्रियते—

चरके—"सूक्ष्माणि हि दोष-भेषज-देश-काल-बल-शरीराहार-सात्म्य-सत्त्व-प्रकृति-वयसामवस्थान्तराणि यान्यनुचिन्त्यमानानि विमलविपुलबुद्धेरपि बुद्धिमाकुलीकुर्य्युः किं पुनरल्पबुद्धेः।" (च० सूत्र० १५अ०) इति। सुश्रुते—"सूक्ष्मा हि द्रव्य-रस-गुण-वीर्य्य-विपाक-दोष-धातु-मलाशय-मर्म-सिरा-स्नायु-सन्ध्यस्थि-गर्भसम्भवद्रव्यसमूहविभागा * * * ये विचिन्त्यमाना विमलविपुलबुद्धेरपि बुद्धिमाकुलीकुर्य्युः किं पुनरल्पबुद्धेः।" (सु० सूत्र० ४ अ०) इति।

पुनः सुश्रुते कासाधिकारे—"अतिव्यवायभाराध्वयुद्धाश्वगजविग्रहै"रित्यारभ्य "कुपिताः चयजं कासं कुर्य्युर्देहक्षयप्रदम्"—इत्यन्तः सन्दर्भः (सु० उत्तर० ५२अ०) चरकीयकासाधिकाराद् गृहीतः (च० चिकि० १८ अ०)। सुश्रुतीय-ऋतुचर्य्याध्यायश्च (सु० सू० ६ अ०) चरकीयकालविभागानुवादपुरःसरमारब्धः।

---

१ न च सुश्रुतस्यैव सन्दर्भश्चरके समुद्धृत इति वैपरीत्यं शङ्क्यम्। यतो वाग्भटेन—"यदि चरकविहीनः प्रक्रियायामखिन्नः किमिव खलु करोतु व्याधितानां वराकः"—इति स्पष्टमेव वदता सुश्रुते केषाञ्चित् कायचिकित्सावर्णनीयानां रोगाणामभावो लक्षितः। अरुणदत्तश्च "व्याधितानाम्" इति पदस्य कासश्वासाद्यभिभूतानां"मित्यर्थं व्याचक्षाणस्तथैवाभिसन्धिमाविष्करोति। तदेतत् साधु दर्शितमस्मन्मित्रेण "वनौषधिदर्पण" कारेणापि स्वकीयोपोद्घाते।

सुश्रुतप्रतिसंस्कर्त्ता चासौ न माध्यमिकाचार्य्यो नागार्ज्जुनो भवितुमर्हति, तन्नाम्नः प्रसिद्धबौद्धाचार्य्यस्य चरकसमकालीनत्वात्। न हि समकालीनानामाचार्य्याणां वचांसि यथावद् गृह्यन्ते प्रसिद्धैराचार्य्यैर्विनैव तन्नामग्रहणम्। अथासौ कश्चनान्यो बौद्धाचार्य्यो नागार्ज्जुनाख्यः स्वीक्रियते तदवरजः सुश्रुतप्रतिसंस्कर्त्तेति, तथास्तु,—का क्षतिः ?

अथ वाग्भटकालनिर्णये त्रयो हेतव उपलभ्यन्ते। तत्र इत्सिङ्गाख्येन चैनिक परिव्राजकेन "अष्टाङ्गवैद्यकसंग्राहको नवीनाचार्य्यः"—इत्यादि-निर्द्देशो दर्शितपूर्व्वः प्रथमो हेतुः। तेन खीष्टीयपञ्चम-शतकारम्भे वाग्भटकालोऽस्माभिः स्थापितः। अथ चक्रपाणि-डह्लनादिभिः प्रायो वर्षसहस्रपुराणैराचार्य्यैर्वाग्भटपाठोद्धारो द्वितीयो हेतुर्येन तत्कालादपि बहुपुराणः (अन्यूनपञ्चशतवर्षप्राक्तनः) सम्भाव्यते वाग्भट-समयः। महम्मद-बिन्-कासिमकृतं (खीष्टीयाष्टमशतकारम्भे) सिन्धुदेशा-क्रमणं तृतीयो हेतुर्येन तत्पूर्व्वतन एव स्यात् सिन्धुदेशजो वाग्भट इति प्रतीतिः, न हि तदारभ्य प्रवृत्ते सिन्धुराज्यविप्लवे कथमपि अष्टाङ्गसंग्रहाष्टाङ्ग-हृदयाख्ययोर्म्महाग्रन्थयोर्न्निर्म्माणं सम्भवति नाम। यत्तु अष्टाङ्गसंग्रहकारो वाग्भटः अष्टाङ्गहृदयकाराद् वाग्भटाद् भिन्न इति कस्यचित् पाश्चात्यविदुषो मतम्, तत् सर्व्वथा निर्मूलमतिविस्मयकरञ्च नः। ग्रन्थद्वयस्य सर्व्वत्रैव भाषा-साद्दृश्यात्, ग्रन्थकर्त्रोः पितृनामसाद्दृश्यात्, क्वचिदपि मतभेदस्यादर्शनाच्च। वाग्भटेन हि महान्तं ग्रन्थमष्टाङ्गसंग्रहाख्यं विरचय्य तत्संक्षेपो "हृदयमिव हृदयमेतत्" निरमायीति स्वयमेवाभिहितं तेन सुस्पष्टया गिरा ग्रन्थसमाप्तौ।

वाग्भटकालनिर्णये हेतुत्रयम्

'रसरत्नसमुच्चय'कारो वाग्भटस्तु बहुपरतनः कश्चन भिन्न एवाचार्य्यस्तुल्य-नामा। यतः समुद्रवद् गम्भीरे अष्टाङ्गसंग्रहेऽपि न लभ्यते रसतन्त्रोक्तविषयाणां रससंस्कारादीनां गन्धोऽपि, लभ्यन्ते च समुच्चये प्राचीन-वाग्भटापेक्षया भृशमवरजानां सोमदेव-गोविन्दभगवत्पादा-दीनां ग्रन्थेभ्यः पाठोद्धाराः। तत्र सोमदेवग्रन्थात् समग्रं रसपरिभाषाप्रकरणं गृहीतं रसरत्नसमुच्चये (र० र० स० ८ अ०)। गोविन्दभगवत्पादकृताद्रसहृदयतन्त्रात्तु गृहीतानि—"सुकृतफलं तावदिदम्" इत्यादीनि, "भ्रूयुगमध्यगतं यत्"—इत्यादीनि च कानिचित् पद्यानि। गोविन्दभगवत्पादाश्च भगवतः शङ्कराचार्य्यस्य गुरव इति प्रसिद्धा एव नान्ये इति सुप्रतिपादितं विद्वद्भिः श्रीमद् गुरुनाथ त्र्यम्बक काले इत्येतैः

रसरत्नसमुच्चयकारो वाग्भटस्तु भिन्न एव, भृशमवरजश्च।

1 Vide Dr. Hoernle's "Medicine of Ancient India" Pt. I., pp. 10—15.

रसहृदयोपोद्घाते। न च शङ्क्यं—कथं तर्हि "सूनुना सिंहगुप्तस्ये"ति रसरत्नसमुच्चयादौ परिचय इति, यतो बहुषु हस्तलिखितग्रन्थेषु "सूनुना संघगुप्तस्ये"त्येव पाठः साधीयान् दृश्यते। तेन "सिंहगुप्तस्ये"ति पाठः कस्यचित् पण्डितम्मन्यस्य संशोधनप्रसूतो मन्तव्यः। असौ च रसतान्त्रिको वाग्भटः खीस्तीयत्रयोदशशतके प्रादुरासीदिति डा० प्रफुल्लचन्द्ररायस्य मतं[2] युक्तियुक्तमेव।

माधवकरस्य काल-निर्णयः।

अथ माधवकरो नाम प्रसिद्धवैद्याचार्यो निदानकार इन्दुकरात्मजो वङ्गेषु प्रादुरासीदिति सुप्रथिता किंवदन्ती। कर इत्युपाधिश्चास्य वङ्गीयतां स्फुटं व्यनक्ति। स च वाग्भटादवरजः, निदाने "निदानं पूर्वरूपाणि"—इत्यादि "तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम्"—इत्यन्तस्य समग्रसन्दर्भस्यान्येषाञ्च वाग्भटपद्यानां बहुधा ग्रहणात्। वृन्दचक्रपाण्योः पूर्वजश्च सः, ताभ्यां स्व-स्व-चिकित्सासंग्रहयोः "गदविनिश्चयो"क्तक्रमेण चिकित्सोपदेशात्। चक्रपाणिश्च खीस्तीयैकादशशतकमध्यभागे वङ्गभूमिमलञ्चकारेति सहेतुकमवोचाम, स च वृन्दकृत "सिद्धयोगा"ख्यग्रन्थमुपजीव्य स्वकीयं चिकित्सासंग्रहं रचयाम्बभूवेति तदुक्त्या[3] चक्रपाणेरन्यूनवर्षशतद्वयेन प्राक्तनः स्याद् वृन्दः। तेनासौ वृन्दाचार्य्यो नवमशतकेऽभूदिति उन्नीयते। माधवश्च तत्पूर्वजः खीस्तीयसप्तमशतके सम्बभूवेति सम्भाव्यते। इतश्च अष्टमशतके "हरूण उल् रसीद" समये माधवीयनिदानस्य पारस्यभाषानुवादोऽभूदित्येतिहासिकवार्त्तयाऽपि तत्पूर्वज एव माधवः पर्य्यवस्यति। तस्माद्वाग्भटपरवर्त्तित्वाच्च सप्तमशतके किञ्चित्पूर्वं वा माधवप्रादुर्भावः सिध्यति। माधवकरश्चासौ रुग्विनिश्चयाख्यनिदानग्रन्थप्रणेता रत्नमालाख्यद्रव्यगुणकारश्चेति प्रसिद्धिः। डल्लनादिनिर्दिष्टः सुश्रुतटिप्पणकारः श्रीमाधवस्तु भिन्न एवास्मात् प्रतिभाति, तस्य कुत्रापि माधवकर इति निर्देशादर्शनात्।

सायणमाधवस्तु भिन्न एव।

सायणापरनामा वेदभाष्यकृन्माधवाचार्य्यस्तु माधवकरात् सर्वथा भिन्नः पूर्वोक्तहेतोः, वर्षपञ्चशत्या तदवरजश्चेति तयोरभेदः कथमपि न शङ्कनीयः।

---

१ रसहृदयञ्च समग्रं मत्पत्येव "आयुर्वेदीयग्रन्थमालाख्य" मासिकपत्रे मुम्बई (Bombay) नगरतः प्रकाशितम्। २ Vide Dr. Roy's History of Hindu Chemistry, Vol. I. p. lxxxvi. ३ तदुक्तिश्च "यः सिद्धयोगलिखिताधिकसिद्धयोगा"नित्यादिरूपा चक्रसंग्रहसमाप्तौ।

डल्लनस्य कालनिर्णयः।

डल्लनो नाम सुप्रसिद्धः सुश्रुतव्याख्याता तु चक्रपाणेः समकालीनः समीपकालीनो वेति शक्यं निश्चयेन वक्तुम्, यतोऽसौ सहनपालदेवनृपतेर्वल्लभमात्मानं ख्यापयामास। पालनरपतयः खल्विह भारते ख्रीस्तीयदशमैकादशशतकयोरेव मगधेषु[1] गौड़ेष्वन्यत्र च प्रादुर्बभूवुः। तत्र नयपालनृपतेर्गौड़ाधिपस्य वैद्योऽभूच्चक्रपाणिरिति तदुक्त्या ज्ञायते, तत्पूर्वजस्य "पाल"वंशीयनृपस्य नृपद्वयस्य वा नाम न सम्यङ्‌निरूपितमद्यापि। तदूर्द्ध्वाधस्तनास्तु नारायणपालादयो नरपतयः सुविदितनामान इतिहासविदाम्[2]। तदभ्यर्णकालजाश्च 'गया'-'भागलपुरा'दि स्थानेषु कृतराज्या गोविन्दपालदेव-मदनपालदेवाख्या भूपतयः "पालदेवा"न्त संज्ञा इत्यपि सम्प्रत्येवाऽविष्कृतं ताम्रशासनाद्युद्दङ्कनेन[3]। तस्मादुच्यते चक्रपाणेः समकालीनः समीपकालीनो वाऽभूड्डल्लन इति। डल्लन-चक्रपाणिभ्याञ्च लभ्यमानसुश्रुतटीकयोस्तत्प्रणीतयोः क्वचिदपि परस्परस्य नाम न गृहीतं, गृहीतानि तु डल्लनेन जेज्जट-गयदास-ब्रह्मदेवादीनां नामानि। तस्मादितोऽपि तयोः परस्परप्रतिद्वन्द्विता शङ्क्यते। तदेवं ख्रीस्तीयदशमशतकशेषार्द्धे एकादशशतकपूर्वार्द्धे वा समभूद् डल्लन इति नः प्रत्ययः।

चक्रपाणिकालः

चक्रपाणिकालस्य ख्रीस्तीयैकादशशतकमध्यभाग इति सर्ववादिसम्मतः सिद्धान्तः पूर्वोक्तहेतुः।

विजयरक्षित-श्रीकण्ठदत्तयोः कालनिर्णयः।

विजयरक्षितस्तु निदानटीकामुखे चक्रपाणिं नामतो निर्द्दिदेश[4], श्रीकण्ठश्च तच्छिष्य एव। कालश्चानयोस्त्रयोदशशतकस्य द्वितीयः पादः। आतङ्कदर्पणाख्य-निदानटीकाकृता वाचस्पतिना त्रयोदशशतकमध्यजेन तन्निर्देशात्। कृतश्च विजयरक्षितेन योगरत्नमालाकारस्य गुणाकरस्य मतोद्धारः। योगरत्नमालाकारकालश्च त्रयोदशशतकस्याद्यः पादः,—इत्यपि हेतोः स एव निश्चयः। तदेतत् सर्वं साधु निर्णीतं डा० हर्नलि इत्याख्येन पाश्चात्यविदुषा।

---

१ तदुक्तिश्च तत्कृत चिकित्सासंग्रहावसाने द्रष्टव्या। २ Vide R. C. Dutt's History of Civilization in Ancient India, Vol. III. p. 243 et. seq. ३ द्रष्टव्यं वरेन्द्रानुसन्धानसमितिप्रकाशितायां "गौड़राजमाला"यां गोविन्दपालदेवादीनां विवरणम् (५०—५० पृष्ठेषु) ग्रन्थोऽयं बङ्गभाषया विरचितः। ४ यथा—"भट्टारजेज्जटगदाधरवाप्यचन्द्रश्रीचक्रपाणिवकुलेश्वरसेनभव्यैः"—इत्यादौ।

अरुणदत्तकाल:

अरुणदत्ताख्य: प्रसिद्धवाग्भटटीकाकारस्तु त्रयोदशशतकस्य प्रथमे पादे समभूदित्यपि तत्कृत एव निर्णय:।

शार्ङ्गधरकाल:

शार्ङ्गधरपद्धति-शार्ङ्गधरसंहितादिग्रन्थकार: शार्ङ्गधरस्तु चतुर्द्दशशतकस्य प्रथमार्द्धे प्रादुरासीदिति शार्ङ्गधरपद्धतिप्रस्तावनायां लिखितेन परिचयेन समुन्नेयम्।

शिवदासकाल:

शिवदाससेनाख्यश्चक्रसंग्रहस्य चरकसंहितायाश्च प्रसिद्धटीकाकारस्तु अरुणदत्त-श्रीकण्ठदत्तयोरर्वाचीन:, अथच गौड़ावनीपाल-भिषग्वरस्य सुत:—इति कृत्वा पञ्चदशशतकीय: प्रतीयते। गौड़ावनीपालश्चासौ महम्मदीय एव स्यादिति तत्प्रदत्तपरिचयभङ्ग्या ऐतिहासिकविचारेण च शङ्क्यम्।

भावमिश्रकाल:।

भावमिश्रस्तु शार्ङ्गधर-वङ्गसेनयोरवरज: कान्यकुब्जश्च—इत्यत्र नास्ति संशय:. यतोऽसावनयो: पाठानुद्धरति स्वग्रन्थे भावप्रकाशाख्ये निर्द्दिशति च परिचयं स्वकीयं तत्रैव। किञ्च तत्र फिरङ्गरोगस्य वर्णनात् षोड़शशतकस्य प्रथमपादादधस्तनोऽसौ निश्चीयते। फिरङ्गरोगो हि प्रथमं पोर्टुगीजाख्यफिरङ्गीयैस्तस्मिन्नेव काले स्वाङ्गसम्पर्केण भारतीयपण्याङ्गनासु प्रसारित:—इति सुप्रथितेयं वार्त्ता। चोपचीन्यहिफेनादीनां गुणाख्यानञ्चास्य नवीनतां व्यनक्ति।

वङ्गसेनकाल:।

वङ्गसेनस्तु शार्ङ्गधरभावमिश्रयोर्मध्यस्थे समये समभूत्। स च वङ्गदेशीय एव संग्रहकार:।

अधुना विलुप्तेष्वायुर्वेदाङ्गेषु शारीरमेवादौ समुद्धर्त्तव्यम्

त एते वैद्यकापराह्णकालसम्भवा अतिप्रसिद्धा वैद्यकाचार्य्या यै: खल्विह संग्रहैकव्रतै: समूहिता: परमयत्नेन हीयमानदीप्तेरायुर्वेदभास्करस्य ज्योतिश्छटा:। राज्यविप्लवसमये च तावदेवाभूत् पर्य्याप्तमित्यकामेनापि स्वीकरणीयं बुद्धिमता। तथाप्यत्र सर्व्वथा विलुप्तप्रायाणि न केवलमसंख्येयप्रायाणि प्राचीनार्षतन्त्राणि किन्तु कायचिकित्सावर्जं सर्वाण्यप्यायुर्वेदाङ्गानीति सशोकं स्मर्त्तव्यं नाम। किञ्चात्र कथं कथमपि ध्रियमाणस्यास्य कायचिकित्साङ्गमात्रस्यापि

---

१ यथा चक्रदत्तव्याख्यायां ग्रहण्यधिकारे कपित्थाष्टकचूर्णव्याख्याने—"अरुणस्तु वाग्भटटीकायां षड्गुणसिते"रित्यादि। तत्राधिकारे च—"श्रीकण्ठस्तु—घृतस्योपरिच्छिन्नभागो घृतमण्ड"मित्यादि।

प्रधानपूर्वाङ्गभूतं—शारीरविद्या वनौषधिविद्या चेति विद्याद्वयं विलुप्तप्रायमेव। तत्राप्याद्या शारीरविद्या तु साम्प्रतमशरीरिण्येव संवृत्तेति हन्त को नाम सहृदयो नात्र दीर्घं निःश्वसिति? कश्च वेदानीं समर्थः सम्प्रति सुप्रतिष्ठितशान्तिके देशे विद्योत्साहिषु च महानुभावराजकेषु पुनरपि समग्रभारतशरण्यमिदमायुर्वेदशास्त्रं संवर्द्धयितुं न प्रयतेत, विषहेत वा दुर्दैवहतकप्रापितामायुर्वेदस्याऽपूर्णतां परैर्विहस्यमानाम्?

[ ४ ]

तत्रेह **शारीरं** नाम सकलनरशरीरबाह्याभ्यन्तरवस्तुविवरणपरायणं प्रधानपूर्व्वाङ्गमायुर्व्वेदस्य यदिदमाचक्षते द्वारभूतं चिकित्साविद्यायाः,—व्याकरणमिव निखिलवाङ्मयस्य, तर्कशास्त्रमिव च सर्व्वार्थावबोधस्य। शरीरं हि खल्वधिकृत्य प्रवर्त्तन्ते तास्ताः क्रियाः स्वाभाविक्यः श्वसनान्नविपाचन-रक्तसंवहन-विषयग्रहण-चेष्टनाद्याः नानाशयसिराधमन्यादिसमाश्रयाः, यास्विह विकृतिमापद्यमानासु प्रभवन्ति रोगा नैकप्रकारास्तत्तदाशयाद्यधिष्ठानाः। न चाज्ञातेषु आशयादिविशेषेषु सर्व्वथा स्थानसंस्थानादिभिर्विज्ञायन्ते शारीरक्रियाः स्वाभाविक्यः, रोगा वा तद्विकृतिभूताः।

शारीरस्य वैद्यके प्रधानपूर्व्वाङ्गता।

चिकित्सा हि चिकित्स्यमपेक्ष्य प्रवर्त्तते, चिकित्स्यश्च पुरुषस्तत्तदाशयादिगतविकारशतैः क्लिश्यमानः। पश्यंश्च शारीरशास्त्राख्यज्ञानचक्षुषा सर्व्वानातुरगतान् विकारांस्तत्तदाशयादिसंश्रितानलं भिषग् भेषजैः प्रतिकर्त्तुम्। आहुश्च—

"आतुरस्यान्तरात्मानं यो नाविशति रोगवित्।
ज्ञानबुद्धिप्रदीपेन न स रोगान् चिकित्सति॥" (च० सू० १३अ०)

अथ येऽपि पुनर्मानसा रोगा मनोमात्राधिष्ठानास्तेऽपि शारीरक्रियाविकृतिविशेषैरेव लक्षणीयाः शारीरोपक्रमसाध्याश्च भूम्ना दृश्यन्ते—इत्यप्रतिहतं सर्व्वथा शारीरविद्याया वैद्यकप्रधानपूर्व्वाङ्गत्वं मन्यन्ते परमर्षयः पुराणाः। उपदिशन्ति च—"शरीरविचयः शरीरोपकारार्थमिष्यते, भिषग्विद्येयम्। ज्ञाते हि शरीरतत्त्वे शरीरोपकारकेषु भावेषु ज्ञानमुत्पद्यते। तस्मात् शरीरविचयं प्रशंसन्ति कुशलाः।" इति (च० शा० ६अ०)

एष पुनरितरेभ्यः शास्त्रेभ्यो विशेषः शारीरशास्त्रस्य यन्नियतप्रत्यक्षपरमत्वात् न केनचिदुन्मत्तेतरेण शक्यमस्य सत्यतायां संशयितुम्। विप्रतिषिद्धं ह्यत्र शास्त्रे

यदुपदिष्टञ्च प्रत्यक्षविरुद्धञ्चेति। न वा सर्व्वथा प्रत्यक्षविरुद्धमिहोपलभ्यमानं ब्रह्म-वचोऽपि समाद्रियेरन् सम्यग्दृशः। "न हि युक्तयः सहस्रमपि घटं पटयितुमीशते।" आह च भगवान् धन्वन्तरिः सुश्रुताय—"प्रत्यक्षानुमानोपमानागमैरविरुद्धमुच्यमानमुपधारयेति।" प्रशंसन्ति चेह प्रत्यक्षसमर्थितस्यैव शास्त्रोपदेशस्य प्रामाण्यं प्राज्ञाः। तथाह्युक्तम्—

शारीरस्य प्रत्यक्षपरत्वात् प्रामाण्यम्

"शरीरे चैव शास्त्रे च दृष्टार्थः स्याद्विशारदः।
दृष्टश्रुताभ्यां सन्देहमवापोह्याचरेत् क्रियाः॥
प्रत्यक्षतस्य यद्दृष्टं शास्त्रदृष्टं च यद् भवेत्।
समासतस्तदुभयं भूयोज्ञानविवर्द्धनम्॥" इति ( सु० शा० ६अ० )

न च वाच्यं—शल्यतान्त्रिकाणामेव समुपादेयमिदं शास्त्रं न कायचिकित्सकानाम्, ते हि तावत् सुपरिज्ञातैर्वातपित्तकफतत्त्वसूक्ष्मानुसूक्ष्मविशेषैरलं-रोगान्निर्णेतुं प्रतिकर्त्तुञ्च सर्व्वथेति किमनेन बहुपरिश्रमसाध्येन नव्यशास्त्रेणेति। पूर्व्वोक्तप्रयोजनानां नियतजागरूकत्वात्। न च शारीरक्रियाणां प्राकृतवैकृतीनां सम्यगवबोधो वातपित्त-कफतत्त्वैरेव शारीरज्ञानविरहितैः सम्भाव्यते। वातपित्तकफैर्हि खलु व्यक्ताव्यक्तस्वरूपैः प्रग्रहभूतैः प्रवर्त्त्यन्ते प्रगृह्यन्ते च शारीर्य्यः क्रियास्तत्त-दाशयाद्यधिष्ठानाः—इत्यनवगतशारीरवस्तुस्वरूपस्य वातपित्तकफविवेक एव न पुष्कलः सम्पद्यते किमुत रोगावबोधः। न वा क्वचित् प्रग्रहपरिज्ञानादेव प्रगृह्य-माणपरिज्ञानं सम्भवति,—न खलु रश्मिषु परिज्ञातेष्वेव ज्ञायन्ते वाजिनः स्वरूपेण, चिकित्स्यन्ते वा सम्यक् तद्रोगाः। न च निदानोक्तरोगाणां सम्प्राप्तिविशेषाव-बोधः शारीरज्ञानमन्तरेण सम्भवति। तथाहि श्रूयते ज्वरसम्प्राप्तावेव—"दोषा ह्यामशयाश्रया बहिर्निरस्य कोष्ठाग्निं ज्वरदाः स्यू रसानुगा"—इति। तत्र चेन्न ज्ञायते भिषजा कस्तावदामाशयः क्व च कोष्ठस्य, कथङ्कारं वा कोष्ठाग्नेर्बहि-र्निरसनं रसानुगमनञ्चेति,—तर्हि किमसौ बुध्येत, किं वा बोधयेत्? एवं "भूयः संदूषितो वह्निर्ग्रहणीमभिदूषयेत्" इत्यत्र ग्रहणीस्थान-संस्थान बोधः, "दूषयित्वा रसं दोषा विगुणा हृदयं गताः" इत्यत्र रसस्य हृदयप्रवेशक्रमादिबोधश्च सर्व्वथा शारीरज्ञानापेक्ष इति पदे पदे सन्ति शतशो दृष्टान्ताः। तस्मात् शल्यतान्त्रि-काणामेवेदमुपादेयं शास्त्रमित्यालस्यपरं वचो न युज्यते सद्वैद्यमुखेषु। यत्तु "शल्यज्ञानादृते नैष वर्ण्यतेऽङ्गेष्वि"ति वचनं, तत् शारीरज्ञानमुखेन शल्यतन्त्रस्यो-

न च शारीरं शल्यतान्त्रिकाणामेव उपादेयम्

पादेयतां प्रतिपादयति, न पुनः कायचिकित्सकानां शारीराऽनुपादेयताम्। यतः खलु सर्व्वायुर्व्वेदप्रधानपूर्व्वाङ्गमिदं शास्त्रं शल्यतन्त्रे विशेषतो दृश्यते वर्णितं, ततः कायचिकित्सकैरप्यवश्यमध्येतव्यं शल्यतन्त्रमित्ययमस्य ह्यभिसन्धिः। तस्मादवहेलितव्याकरणस्य वैदुष्यमिव मा तावदविज्ञातशारीरवस्तुविवेकस्य ते वैद्यत्वं विवेकिजनोपहास्यं भूदित्यलमतिसरलेऽपि वस्तुनि वृथावादविस्तरेण।

एवञ्च प्राञ्चोऽपि परमाद्रियन्ते स्म शास्त्रमिदमायुर्व्वेदभित्तिभूतम्। तथाह चरकोऽपि संशयच्छेदिना वचनेन—

"शरीरं सर्व्वथा सर्व्वं सर्व्वदा वेद यो भिषक्।
आयुर्वेदं स कार्त्स्न्येन वेद लोकसुखप्रदम्॥" ( च० शा० ६ अ० )

शारीरे प्राचामादरः—द्रष्टव्यानि वेदपुराणतन्त्रादीनि

न चासीदायुर्वेद एवादरविशेषः शारीरशास्त्रस्य। शतपथब्राह्मणादिषु, पुराणेषु, पातञ्जलादियोगशास्त्रेषु, विष्णु-याज्ञवल्क्यादिस्मृतिषु, रुद्रयामलादितन्त्रेषु च शारीरविवरणविस्तरस्य स्फुटमभिधानात्। तथाहि शतपथब्राह्मणे,—"शिर एवास्य त्रिवृत्, तस्मात्त्रिविधं भवति,—त्वगस्थिमस्तिष्काः। ग्रीवाः पञ्चदश चतुर्द्दश वा एतेषां कारूकराणि"—इत्यादिर्महान् प्रसङ्गः।

तथाच यास्ककृतनिरुक्तेऽपि—

"अष्टोत्तरं सन्धिशतमष्टाकपालं शिरः सम्पद्यते, षोड़श वपावहनानि, नव स्नायुशतानि, सप्तशतं पुरुषस्य मर्म्मणा"मित्यादि ( निरुक्तपरिशिष्टे १४ अ० )।

विष्णुधर्म्मोत्तरे च,—"अस्थ्नां त्रिभिः शतैः षष्ट्यधिकैर्धार्य्यमाणम्। तेषां विभागः * * * * *"—इत्यादि।

अग्निपुराणेऽपि—"श्रोत्रं त्वक् चक्षुषी जिह्वेत्यादिना" समशाध्याये[1] न संक्षेपतः सर्व्वेऽपि शारीरावयवा वर्णिताः।

याज्ञवल्क्योऽपि स्वसंहितायाम्[2]—"तस्य षोढ़ा शरीराणि षट् त्वचो धारयन्ति च"—इत्युपक्रम्य साङ्गोपाङ्गं शरीरं समासतो व्याचचक्षे।

किञ्चैवं विष्णुस्मृतावपि शेषार्द्धे व्याख्यातं समग्रं शारीरं संक्षेपेण।

---

१ अग्निपुराणे ३७० अध्यायेन। २ याज्ञवल्क्यस्मृतौ यतिधर्म्मप्रकरणे।

एवञ्च भगवता पतञ्जलिनोपदिष्टं—"नाभिचक्रे कायव्यूहज्ञानं" विस्तारयाञ्चक्रुर्योगिवरा हठयोगप्रदीपिकादिषु ग्रन्थेषु।

तन्त्रशास्त्रेऽपि रुद्रयामलादौ सविस्तरमाकलयामः सहस्रार-सुषुम्नेड़ापिङ्गलादिस्वरूपं निरूपितं निखिलसंज्ञाचेष्टामूलम्। तथाच सम्प्रतिविलुप्तप्रायस्याप्यस्य शास्त्रस्य पूर्वं समादरातिशयः प्राचां नासीदिति न मनागपि शङ्कनीयम्। विलोपः पुनरस्य शास्त्रस्य दुर्दैवकृत इति न तावद् बुद्धिमता हृतधनेन पुनर्नार्ज्जनीयं सर्व्वार्थसाधनं द्रविणं नवीनम्।

न च विलुप्तप्रायेष्वपीदानीमायुर्वेदमहाजलधिरत्नेषु न लभ्यते परिचयः प्राचीनार्वाचीनशारीरनिबन्धानाम्। तथाह्यत्र—

(१) **भोजकृतसंहितायाः शारीरस्थानं** प्राचीननिबन्धेषु प्रधानमभूदिति प्रतिभाति। भोजश्चासौ सुश्रुतसतीर्थो महर्षिरेव न तु तन्नामा नृपतिरित्यवोचाम, तथाचास्य प्राचीनता निर्विवादैव। भोजकृतशारीरोद्धृताः पाठास्तु बहुधा दृश्यन्ते डल्लनचक्रपाणिभ्यामुल्लिखिताः। दिङ्मात्रमिहोदाहरामः।

प्राचीनाऽर्वाचीनशारीर-निबन्धानां परिचयः।

"तथाच भोजः—

हस्तपादाङ्गुलितले कूर्च्चेषु मणिबन्धयोः।
बाहुजङ्घाद्वये चापि जानीयान्नलकानि तु॥" इति

( सु० शा० ५अ० टीकायां डल्लनः )

पुनश्च तत्रैव "यथाह भोजः—

संघाताः सञ्चिता येस्तु सीमन्तांस्तान् प्रचक्ष्महे"—इत्यादि।

अवयववर्णनविस्तरश्च तत्रैव भोजकृतो यथा—

"विपुलपिप्पलपत्रसमाकृते-रवयवस्य शिरस्तलमाश्रितम्।
सकलकामसिरामुखचुम्बितं निगदितं मदनातपवारणम्॥" इति।

(२) श्रूयते च प्रायः सहस्रवर्षपुराणः शारीरनिबन्धो—भास्करभट्टकृतः **"शारीर-पद्मिनी"** संज्ञः सम्प्रति पाश्चात्यपण्डितैराविष्कृतः। तत्र वर्णितानि निखिलशारीरवस्तूनि प्रतिसंस्कृतसौश्रुतमतानुसारेण। तत्पाठाश्च बहुशः समुद्धृताः श्रीमता डा० हर्न्लि समाख्येन पाश्चात्यविदुषा स्वकीये ग्रन्थे। यथाच शवच्छेदादिना अप्रत्यक्षीकृतशारीरस्य संग्रहकारस्य संग्रहमात्रमेतत् तथाऽस्य शिष्योपयोगितां नाकलयन्ति धीमन्तः।

(३, ४) अस्ति चान्यदपि ग्रन्थद्वयं शारीरविवरणपरं पाश्चात्यदेशेषु वर्त्तमानमद्यापि। तच्च—

**श्रीमुखकृतं शारीरशास्त्रं, शारीर-वैद्यकञ्च**—नाम (केनचिदपरेण कृतम्)।

अनयोश्च ग्रन्थयोर्विवरणं Aufrecht's Catalogue इत्याख्यायां पाश्चात्य-ग्रन्थसंग्रहसूच्यां द्रष्टव्यम्।

एषाञ्च शारीर-पद्मिन्यादीनां ग्रन्थानां प्राचीनटीकास्वनुद्धारदर्शनादनुपादेयता नातिप्रसिद्धता वा शङ्क्यते इत्यलमितोऽधिकं सम्भाव्य।

अतीतसपाद-द्विसहस्र-वर्षेषु शवच्छेदस्याऽशक्यत्वात् शारीर-शास्त्रस्य दशा-विपर्य्यासः।

तदेवं पुरा स्थितेऽपि कदाचित् सुमहति शारीरशास्त्रे सर्वायुर्वेदमूलभूते, प्रायः सपादद्विसहस्रवर्षतः प्राक् प्रसिद्धबौद्धनृपतेरशोकस्याज्ञया प्रतिषिद्धे शवच्छेदे, विलुप्तेषु चानन्तरप्रवृत्तराज्यविप्लवशतेन प्राचीनग्रन्थरत्नेषु शनैः शनैरह्रीयत शारीरज्ञानं भिषजाम्। एवञ्च बौद्धयुगेषु शवच्छेदाद्यशक्तानां निबन्धृणां कल्पनाकल्पतरोः संरुरोह भ्रान्तशारीरवस्तुविस्तरः प्रत्यक्षविरुद्ध इति किमत्र चित्रं नाम? जीर्णवलभ्यामिव ह्यत्र दृश्यन्ते भूतवेताला निवसन्तः!

विपर्य्यस्त शारीरस्य सुश्रुतादिप्रतिसंस्कर्त्तृभिस्तदनुवर्त्तिभिरपरैश्च ग्रहणं, विपर्य्ययवर्द्धनञ्च

अथैवं बौद्धयुगेषु विपर्य्यस्तवस्तुकं शारीरं यथेच्छं विवृण्वन् सुश्रुतप्रतिसंस्कर्त्ता जीर्णप्रतिसंस्कृतावशेषां सुश्रुतसंहितामापूरयामास स्तोकमात्रेण शारीरस्थानेन। तत्र च दशाध्यायीमात्रमिते शारीरे सांख्यञ्च गर्भाधानादिविधिञ्च गर्भावक्रान्तिञ्च गर्भिणीचर्य्याञ्च कुमारभरणञ्चेति नानाविधप्रासङ्गिकाऽप्रासङ्गिकविषयान् सङ्कलयन् कथमपि ग्रन्थपुष्टिं विदधे, यथार्थशारीरविवरणे बहुधा प्रत्यक्षविरुद्धं कल्पनाविजृम्भितञ्च। मृतकपरीक्षायास्तदानीमशक्यत्वाच्च न कोऽपि तत् परीक्षितुमलमासीत् परवर्त्ती आचार्य्यः। प्राचीनमहोपदेशस्त्वद्यापि जागर्त्ति सुश्रुते—

"शोधयित्वा मृतं सम्यग् द्रष्टव्योऽङ्गविनिश्चयः" इति (सु० शारीर० ५अ०)

यथा पुनर्मृतकपरीक्षया न केवलं बहुधा प्रत्यक्षविरुद्धं किन्तु स्वग्रन्थविरुद्धमपि दृश्यते शारीरविवरणं सौश्रुतशारीरे तथाऽग्रे विशदं दर्शयिष्यामः। एवञ्च योऽसौ "शारीरे सुश्रुतः श्रेष्ठ" इति प्राचीनः प्रवादः, स वृद्धसुश्रुतमधिकृत्य प्रचलितो नेदानीन्तने सुश्रुते प्रयोक्तव्यः इति निःशङ्कं ब्रूमः। इदानीन्तु हन्त "शारीरे सुश्रुतो नष्टः"—इत्येव युज्यते विलपितुम्!

वाग्भटाचार्य्योऽप्यष्टाङ्गसंग्रहेऽष्टाङ्गहृदये च यथामति वर्णयामास शारीर-वस्तूनि। स च स्वयं बौद्धाचार्य्यः शवच्छेदाऽशक्तश्च सुश्रुत-चरकयोरवशिष्टं शारीरं बहुधा स्वकपोलकल्पनया पुनर्विपर्य्यासयाञ्चकार तृतीयेनैव मार्गेणेति सुविदितं सूक्ष्मदृशाम्।

शार्ङ्गधरस्तु चरकसुश्रुतवाग्भटानां शारीरवर्णनेभ्यः सारमिवाकर्षन्, स्वल्पैरेव वचोभिः स्वसंग्रहे शारीरं सञ्जग्राह। किञ्चासौ दाक्षिणात्ये राज्यविप्लवस्याल्पीयस्त्वादवशिष्टेभ्यः प्राचीनसंहितांशेभ्यो नवीनञ्च किञ्चिदन्यत्र दुर्लभं वस्तुजातमुपाहरत्। तद्यथा—आकृष्टश्वासवायोर्गुणकथनप्रसङ्गे—

"नाभिस्थः प्राणपवनः स्पृष्ट्वा हृत्कमलान्तरम्।
कण्ठाद् बहिर्विनिर्याति पातुं विष्णुपदामृतम्।
पीत्वा चाम्बरपीयूषं पुनरायाति वेगतः।
प्रीणयन् देहमखिलं जीवयञ्जठरानलम्॥" इति—

( शार्ङ्ग० पूर्व० ५अ० )

—तदेतदम्बरपीयूषं विष्णुपदामृतं वा आकृष्टश्वासवायोः सारभूतो वायुविशेषः शोणितशोधनादिसहायः पाश्चात्यबुधैः "अक्सिजेन्" (Oxygen) इति संज्ञया व्यपदिष्ट—इत्यत्र न संशयः। पुराणमपि नवीनायितमिदं तत्त्वमन्यत्र[1] वैद्यकग्रन्थेषु दुर्लभमेव।

भावमिश्रोऽपि स्वग्रन्थे गतानुगतिकरीत्या वर्णयति स्म शारीरवस्तुविस्तरं, स च बहुधा प्रमादसङ्कुलः स्वकीयकल्पनाऽनल्पीकृतश्च प्रतीयते विदितवेदितव्यानाम्।

सोऽयं हन्त वैद्यके साम्प्रतिकः शारीरावशेषः शारीरविपर्य्ययो वा लभ्यमानः। तत्राद्यो विपर्य्ययक्रमः संज्ञानां व्याकुलीभावादवगन्तव्यः। दर्शयितव्ये च तस्मिन् वस्तुपरिचयस्तावदुपक्रंस्यते संक्षेपतः, प्रदर्श्यन्ते च बीजान्यस्मत्परिभाषितार्थेषु कासाञ्चित् संज्ञानां व्यवहारस्य।

तत्र च दर्शयितव्ये वस्तुपरिचयः परिभाषाबीजञ्च।

---

[1] भाग्नयोऽपि पुनः शार्ङ्गधरे न दुर्लभाः, शवच्छेदसहकृतपरीक्षाविरहात्।

सन्ति खल्विह नानाविधप्रणाल्यर्थेषु प्रयुज्यमानाः संज्ञाः—सिरा, धमन्यः, स्रोतांसि, रसायन्यो, नाड्यश्चेति। तासु नाडीतिसंज्ञायाः प्राचुर्य्येण व्यवहारस्तन्त्रशास्त्रेष्वेव, इतरासान्तु सिरादिसंज्ञानां चरकसुश्रुत-वाग्भटादिषु बहुधा। न चासां संज्ञानां सर्व्वथा पृथगर्थप्रयुक्तानामेकार्थता कथमपि सम्भाव्यते, निखिल-शास्त्रार्थव्याकोपप्रसङ्गात्। इदञ्चेदञ्च नः प्रत्यक्षं मृतकपरीक्षया यत् सन्तीह काये चतुर्विधाः प्रणाल्यो नामरूपकर्म्मभिः सर्वथा विभिन्नाः। तासु द्विविधाः शोणितवहाः, एकविधास्तन्वच्छजलवहाः, अपराश्च संज्ञाचेष्टावहाः।

तासां नाडी विपर्य्ययक्रमः संज्ञानां व्याहृती-भावात्।

द्विविधासु च शोणितवहासु काश्चिन्नीलाः प्रायेण त्वचोऽधस्तादाभासमाना-स्तासु श्यामाभं रक्तं वहति हृदयाभिमुखम्। अन्यास्त्वरुणाभा गम्भीरावस्थिताश्च तासु उज्ज्वलारुणं रक्तं वहति हृदयतो बहिर्मुखं सर्वधातुपोषणाय। तत्राद्यासु नीलाभप्रणालीसु सिरापदं प्रयुक्तमाचार्य्यैः स्पष्टमेव सिराव्यधाधिकारे, तस्मात् तासां सिरेति संज्ञा स्वीकरणीया। अतश्चास्माभिरत्र सिरापदमस्मिन्नेवार्थे निरूढम्। अरुणाभासु पुनः शोणितवहासु प्रणालीषु दृश्यते स्फुटमेव शास्त्रे धमनीपदप्रयोगः सार्थकः, तद्यथा—"तस्य च हृदयं स्थानं, स हृदयाच्चतुर्विंशतिं धमनीरनुप्रविश्योर्द्ध्वगा दश दश चाधोगा-मिन्यश्चतस्रस्तिर्य्यग्गाः कृत्स्नं शरीरमहरहस्तर्पयति वर्द्धयति धारयति यापयति जीवयति चादृष्टहेतुकेन कर्म्मणा" इति (सु० सू० १४ अ०)। अस्माभिश्चे-दृशमेव धमनीपदप्रयोगं यथार्हमुपलभ्य अस्मिन्नेवार्थे संज्ञेयं परिभाषिता।

सिरा-धमनीसंज्ञयोः परिचयः

तन्वच्छजलवहासु पुनः प्रणालीषु चरके रसायनीति संज्ञा प्रसिद्धा, निरूढा च सा तस्मिन्नेवार्थेऽस्माभिरपि। स्रोतांसीति संज्ञा तु सुश्रुते पृथक् परिभाषिताऽपि प्रायो यथेच्छमेव प्रयुक्ता। चरके तु स्रोतांसीति सर्वविधप्रणालीषु निरुक्ता साधारणी संज्ञा, प्रयुक्ता च साऽस्माभिश्चरकानुवृत्त्या मलमूत्रवीर्य्यादिवाहिषु निखिलेष्वपि मार्गेषु।

रसायनीसंज्ञापरिचयः

अथ याः स्पर्शादिसंज्ञावहा अवयवसङ्कोचप्रसारणादिचेष्टाप्रद-वेगवहाश्च प्रणाल्यः शरीरे, ताः पीताभतन्तुमया नीरन्ध्रा मार्गा दृश्यन्ते। तासु च विद्युदिवधातुमयतन्त्रीष्विव प्रवहन्ति संज्ञाचेष्टाप्रदा वेगाः। तासाञ्च प्रायः समष्टीभूतमूलानां प्रधानायतनं पृष्ठवंशान्तरस्थस्तादृशतन्तुभूयिष्ठो कमलनालाकारः काण्डः, स च शिरोगुहान्तरस्थेन मस्तिष्केणोर्द्ध्वं संलग्नः।

नाडीसंज्ञापरिचयः

अभ्यासाच्च तन्त्रीणां सूक्ष्मतराणां मूलभूते—द्वे स्थूलतन्त्र्यौ पृष्ठवंशमुभयत: स्थिते धनुर्वक्रे। तदेतदखिलं प्रत्यक्षदृष्टं, परोक्षागतमिदञ्च तासां संज्ञाचेष्टा-बहुत्वम्। एतेन च बीजभूतेन परिचयेन सम्यक् संवदते तन्त्रशास्त्रोक्तो नाड़ीचक्रवर्णनविस्तर:। नाड़ीचक्रवर्णनञ्च योगियाज्ञवल्क्ये, रुद्रयामले, निरुत्तरतन्त्रे, शारदातिलके षट्चक्रनिरूपणादौ च मृग्यम्। प्रसङ्गविस्तरभिया त्विह दिङ्मात्रमुदाहरामः सारभूतम्।

**तन्त्रोक्त विस्तरस्य सारोद्धार:**

एष हि तन्त्रोक्तविस्तरस्य सार:। "नाड्योऽनन्ता:[1] समुत्पन्ना: सुषुम्नापञ्च-पर्वसु"—इत्यनन्तानां नाड़ीनां मूलभूता मुख्यास्तिस्र एव नाड्य:—ईड़ापिङ्गले पृष्ठवंशबहि:स्थे धनुराकारे, सुषुम्ना च पृष्ठवंशमध्यस्था "चव्यवल्लीव"[2] बहुसूत्रसंघातमयीति। सा च "ग्रीवान्तं प्राप्य गलिता तिर्य्यग्भूता"[3] शिरसि सहस्रदलपद्मेन संलग्ना। सहस्रदलञ्चेदं मस्तिष्क-मेव नान्यत्। तन्त्रोक्तं चक्रषट्कञ्च न काल्पनिकं, न वाऽप्रत्यक्षम्। तथाहि पूर्वोक्त-प्रधाननाड़ीत्रितयसंयुक्तै: सूक्ष्मनाड़ीप्रतानैरारचिताश्चक्राकारनाड़ीसङ्घाता: खलु षड़ेव मुख्या: प्रत्यक्षदृष्टा:। तानिहाग्रे यथास्थानं च सम्यग् वर्णयिष्याम:। कर्णि-कान्तरीया: सूक्ष्मतमविशेषास्तु ध्यानगम्या योगिनामेव नास्मादृशाम्। तथाप्येतत् सुस्पष्टञ्च प्रचुरञ्च बीजमुपलभ्यास्माभिस्तन्त्रशास्त्रोक्तार्थानुसारेण परिभाषिता नाड़ीति संज्ञा। किञ्च, परिभाषितार्थे नाड़ीपदप्रयोगश्चरकेऽपि दृश्यते यथा— "मन्ये संश्रित्य वातोऽन्तर्यदा नाड़ी: प्रपद्यते। मन्यास्तम्भं तदा कुर्य्यादन्तरयाम-संज्ञितम्।" इति ( च० चिकि० २८ अ० )

नाड़ीशब्दतश्च लाटिनभाषायां "न्युरन्" इति, पारस्यभाषायां 'नर्ह्' इति, आंग्लभाषायां 'नर्भ्' इति च संज्ञा: समुद्भूता इत्यस्माकं सुदृढ़: प्रत्यय:।

**नाड्यर्थे स्नायुपदप्रयोग: प्रामादिक: परिहर्त्तव्यश्च**

नाड्यर्थे स्नायुपदप्रयोगस्तु विपर्य्यस्तेऽपि शास्त्रे क्वचिदपि न दृष्ट:, प्रचलितस्तु हन्त सोऽद्य कस्यचिदज्ञानादादौ वङ्गभाषायां, तदनुकारेण च कासुचिदन्यास्वपि भाषासु। स चेतर्हि विज्ञै: सर्वथैव वर्जनीय:। स्नायुपदार्थस्त्वस्माभि: परिभाषाध्याये सम्यक् प्रतिपादित:।

---

१ इयं शारदातिलकीयं वचनम्। २ एष निर्देश: "मेरोर्बाह्यप्रदेशे शशिमिहिरसिरे सव्यदक्षे निषण्णे मध्ये नाड़ी सुषुम्ने"ति वचनव्याख्याने षट्चक्रनिरूपणटीकायां दृश्यते। वचनं हि—"सुषुम्ना चव्यवल्लीव मेरु-मध्ये परिस्थिता" इत्यादि। अतिमनोहरञ्चेदं स्वरूपानुगतं सादृश्यं, चव्यवल्ली हि सूत्रगुच्छसंघातमयी भवति। पृष्ठवंश मध्यस्थश्च नाड़ीकाण्डस्ताडृगेव लक्ष्यते सूक्ष्मशारीरपरीक्षया। ३ एषोऽपि पाठस्तन्त्रान्तरात्तथैवोद्धृत:।

अथैवमतिसंक्षेपेण सिराधमन्यादिवस्तूनां यथार्हं परिचयमारचय्य सम्प्रति प्रतिसंस्कर्तॄणां निबन्धॄणाञ्च निरङ्कुशप्रयोगानुदाहरामः ।

तत्र सिरापदस्य सुश्रुते सिराव्यधाधिकारेऽन्यत्र च बहुशो यथायथप्रयोगे दृश्यमानेऽपि, परिभाषित धमन्यर्थे प्रयोगो यथा—

वैद्यकी शारीरसंज्ञाविप्लवस्य उदाहरणानि—तत्र सिरेति संज्ञाया अपप्रयोगाः

"असृग्वहास्तु रोहिण्यः सिरा नात्युष्णशीतलाः" इति (सु० शा० ७अ०)

वाग्भटे धमन्यर्थे सिरापदप्रयोगो यथा—

"दश मूलसिरा हृत्स्थास्ताः सर्वं सर्वतो वपुः । रसात्मकं वहन्त्योजः"—इत्यादि ।

रसायन्यर्थे सिरापदप्रयोगो यथा—

"शीता गौर्य्यः स्थिराः कफात्" इति (सु० शा० ७अ०)

परिभाषितनाड्यर्थे सिरापदप्रयोगो यथा तत्रैव—

"कर्णयोर्दश, तासां शब्दवाहिनीनामेकैकां परिहरेत्" इति—

"व्याप्नुवन्त्यभितो देहं नाभितः प्रसृताः सिराः ।
प्रतानाः पद्मिनीकन्दाद्विसादीनां यथा जलम् ॥" इति च ।

अत्र हि शेषोक्ते पद्ये मणिपूराख्यचक्रात् समन्ततः प्रसृताः नाड्यो लक्ष्यन्ते विसतन्तुसदृशाः, न पुना रक्तवाहिन्यः प्रणाल्य—इति स्फुटमेव सूक्ष्मदृशाम् ।

अथ कण्डरार्थे सिरापदप्रयोगो यथा सुश्रुते—

"अंसदेशस्थितो वायुः शोषयित्वांऽसबन्धनम् ।
सिराश्चाकुञ्च्य तत्रस्थो जनयत्यवबाहुकम् ॥" इति
(सु० निदान० १अ०)

सर्वथा सिरापदार्थव्याकुलीभावः सुश्रुते यथा—

"धातूनां पूरणं वर्णं स्पर्शज्ञानमसंशयम् ।
स्वाः सिराः सञ्चरद्रक्तं कुर्य्याच्चान्यान् गुणानपि ॥" इति
(सु० शा० ७अ०)

न हि सिरासु सञ्चरद्रक्तं स्पर्शज्ञानं साधयति, तद्धि स्पर्शसंज्ञावाहिभिर्नाड़ीप्रतानैः सम्पद्यते !!

संग्रहकृतस्तु स्रोतःसाधारणेऽर्थेऽपि क्वचित् सिरापदं प्रयुञ्जते यथा—

"वीर्य्यवाहिसिराधारौ वृषणौ पौरुषावहौ" इत्यादौ । (शार्ङ्ग० पूर्व० ५अ०)

अथ क्रमादीदृशमपि हास्यास्पदं शारीरमाविर्बभूव यथा तत्रैव—

"सन्धिबन्धनकारिण्यो दोषधातुवहाः सिराः" इति

सन्धिबन्धनकारिण्यो हि स्नायवः, न सिराः । दृश्यतां सुश्रुते सम्यगध्यायः ।

एवं धमनीपदस्य सुश्रुते शोणितवर्णनीयाध्याये, चरके चार्थेदशमहामूलीये ऽन्यत्र च परिभाषितधमन्यर्थे सुष्ठु प्रयोगेऽपि परिभाषितसिरार्थे धमनीपद-प्रयोगो यथा—

अथ धमनीपदस्य अपप्रयोगाः

"अप्रतिरुद्धसौहृदः कृतघ्नः ।
कृशपरुषो धमनीततः प्रलापी ॥"—इत्यादि
(सु० शारीर० ४ अ० )

अत्र धमनीततत्वं हि नीलाभसिराबहुलत्वमिति स्फुटमेव ।

परिभाषित नाड्यर्थे धमनीपदप्रयोगाश्च दृश्यन्ते बहुशः । यथा—

"ऊर्द्ध्वगाः शब्द-स्पर्श-रूप-रस-गन्ध-प्रश्वासोच्छ्वास-जृम्भित-क्षुद्धसित-कथित-रुदितादीन् विशेषानभिवहन्त्यः शारीरं धारयन्ति ।'—इति ( सु० शा० ८ अ० ) ।

अथ नानाविध स्रोतोऽर्थेषु धमनीपदप्रयोगाः यथा—

"मूत्रवस्तिमभिप्रपन्ने मूत्रवहे द्वे, शुक्रप्रादुर्भावाय द्वे, द्वे च विसर्गाय,—ते एव रक्तमभिवहतो नारीणामार्त्तवसंज्ञम्" इति ( सु० शा० ८ अ० ) ।

नाड़ीपदस्य नानार्थेषु प्रयोगाः

अथ पूर्वदर्शितोदाहरणे चरके नाड़ीपदस्य यथार्हप्रयोगेऽपि नानार्थेषु तत्-प्रयोगा न विरलाः । यत्सत्यं, नाड़ीपदस्य नानाविधप्रणाल्यर्थे प्रयोग एव वैद्यके प्रचुरतरो दृश्यते, अस्मत्परिभाषितार्थे तत्-प्रयोगस्तु तन्त्रशास्त्रेष्वेव भूम्ना । नानार्थेषु नाड़ीपदप्रयोगोदा-हरणानि तु यथा— परिभाषित धमन्यर्थे नाड़ीपदं नाड़ीविज्ञाने । ( विस्मय-पदञ्चेदं यथा चरक-सुश्रुत-वाग्भटेषु नाड़ीपरीक्षाया गन्धोऽपि नोपलभ्यते ।) न च नाड़ीविज्ञानेऽपि धमन्यर्थे नाड़ीपदमेव प्रयुक्तं, "धमनी जीवसाक्षिणी"—इत्यादौ धमनीपदस्यान्वर्थस्यापि श्रवणात् ।

एवं सुश्रुतेऽपि—"मातुस्तु खलु रसवहायां नाड्यां गर्भनाभिनाड़ी प्रतिबद्धा साऽस्य मातुराहाररसवीर्य्यमभिवहति" ( सु० शा० ३ अ० )—इत्यत्र परि-भाषितधमन्यर्थं एव प्रयुक्तमाद्यं नाड़ीति पदं द्रष्टव्यं, सिराधमनीसमष्ट्यर्थे तु द्वितीयम् । परं तत्रैवानुपदं धमनीपदस्यान्वर्थप्रयोगोऽपि सुलभः, यथा—"असञ्जातप्रत्यङ्गविभागमानिषेकात् प्रभृति सर्वशरीरावयवानुसारिणीनां रस-वहानां तिर्य्यग्गतानां धमनीनामुपस्नेहो जीवयति" इत्यत्र (सु० शा० ३अ०) ।

नाड़ीपदस्य प्रणालिकार्थे प्रयोगा वैद्यके काव्यादिषु च शतशो दृश्यन्ते। तत्र दिक्—

"द्वारमलभमानः पूयः स्वमाश्रयमवदीर्य्योत्सङ्गं महान्तमवकाशं कृत्वा नाड़ीं जनयित्वा कृच्छ्रसाध्यो भवत्यसाध्यो वेति" (सु० सू० १७ अ०)। 'नाड़ीव्रण' इति प्रयोगश्चेदृश एव। "नाड़िन्धम"—इति पदञ्च स्वर्णकारार्थे लोके।

"सद्यश्छिन्नासु सिरासु रक्तातिप्रवृत्तिः, पक्वासु च तोयनाड़ीभिरिव तोयागमनं पूयास्रावश्च"—इत्यत्र च तादृश एव प्रयोगः। (सु० सू० २२ अ०)

नाड़ीपदस्य दुग्धवहस्रोतोऽर्थे प्रयोगोऽपि दृश्यते, यथा सुश्रुते स्तनपाकचिकित्सायाम्—

"पक्वे च दुग्धहरिणीः परिहृत्य नाड़ीः
कृष्णाञ्च चूचुकयुगं विदधीत शस्त्रम्"—इत्यत्र।
(सु० चि० १७ अ०)

अमरकोषीय भ्रमः तन्निरसनञ्च

ननु अमरेण "नाड़ी तु धमनिः सिरा" इति—नाड्यादिपदत्रयस्य पर्य्यायत्वेनाभिधानाद् यथेच्छप्रयोगे को दोष इति चेत्। मैवम्। ईदृशपारिभाषिक पदानां पृथगर्थतया शारीरे ग्रहणात्। तथाहि सुश्रुते सिरावर्णनाध्यायः सर्वथा पृथगेव धमनीव्याकरणाध्यायात्। श्रूयते च तत्र—"अन्या एव हि धमन्यः स्रोतांसि च सिराभ्यः, कस्माद्—व्यञ्जनान्यत्वान्मूलसन्नियमात् कर्म्मवैशेष्यादागमाच्च।" इति (सु० शा० ८ अ०)। युगपत्प्रयोगश्च सिरादिपदानां दृश्यते यथा—"तासां प्रथमा मांसधरा नाम, यस्यां मांसे सिरा-स्नायु-धमनी स्रोतसां प्रताना भवन्ति" (सु० शा० ४ अ०)—इत्यादौ। न हि पर्य्यायशब्दानां क्वचिद् युगपत्प्रयोगो भवतीदृशः। तस्मादमरसिंहोक्तं पर्य्यायवचनं शारीराऽज्ञानमूलमित्यवसेयमेव। एवं वैद्यकेऽपि संज्ञात्रयस्य यथेच्छप्रयोगः प्रतिसंस्कर्त्तॄणां प्रमादजन्य इति चाऽकामेनापि स्वीकरणीयम्। परमर्षिकृतानां यथार्हप्रयोगाणां विभागानाञ्चाद्यापि जागरूकत्वात्।

स्वोक्तिविरोधश्च संज्ञार्थव्याकुलीभावनिमित्तः सुश्रुते यथा—सूत्रस्थाने "हृदयाच्चतुर्विंशतिं धमनीरनुप्रविश्य" इत्याद्यभिधाय पुनः शारीरे "चतुर्विंशति-

धमन्यो नाभिप्रभवा अभिहिताः"— इति सूत्रनम्। वस्तुतस्तु अनयोः प्रयोगयोराद्ये परिभाषितधमन्यर्थे, द्वितीये तु नाड्यर्थे धमनीपदस्य प्रयोग इति शारीरानुगतः समाधिः।

न च वाच्यं—वैद्यके द्विविधास्वपि रक्तवहप्रणालीसु सिरापदं प्रयुक्तं, त्वदुक्त-नाड्यर्थे तु धमनीपदमिति। सिरापदस्य दर्शितोदाहरणेषु रसायन्यादिनानार्थेषु प्रयोगदर्शनात्, क्वचित् स्पर्शज्ञानसाधनताभिधानात्, वाग्वह-शब्दवहत्वादिसूचनाच्च। धमनीपदस्य च रसवह रक्तवहादि-प्रणाल्यर्थेष्वपि दर्शितदिशा प्रयोगशतदर्शनात्। तस्मात् सर्वथा व्याकुलीभूतमिदं संज्ञात्रितयं प्रतिसंस्कर्त्तृदोषात्, तद्दर्शनाच्च कोषादौ पर्य्यायाभिधानमित्यलमतिविस्तरेण।

न चात्र शक्यं किमपि समाधानम्

अथान्यः शारीरविपर्य्ययक्रमः शास्त्रनिर्दिष्टानामाशयादीनां वर्णनाविलोपात् परिचयविरहाच्च द्रष्टव्यः। श्रूयन्ते हि शास्त्रे नानाविधा आशयादीनां संज्ञाः, न च लभ्यन्ते तत्परिचायकानि वर्णनानि। तत्र दिङ्मात्रं यथा—

अथान्यः शारीर-विपर्य्ययक्रमः— आशयादिवर्णना-विलोपात् तत्परिचय-विरहाच्च

"स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च।
हृदुण्डुकः फुस्फुसश्च कोष्ठ इत्यभिधीयते॥" इति

(सु० चिकि० २अ०)—

इत्यत्राभिहितानामामाशयादीनां वर्णनविस्तरः शारीरे यथास्थानं न दृश्यते, दृश्यते तु किञ्चित् कुत्रचित् प्रसङ्गतः। यथा आमाशयवर्णनं हृद्वर्णनञ्च सुश्रुते पञ्चमाध्याये नोपलभ्यते, मर्माध्याये तु—"स्तनयोर्मध्यमधिष्ठायाऽमाशयद्वारं सत्वरजस्तमसामधिष्ठानं हृदयं नाम, तत्र सद्य एव मरणम्।" (सु० शा० ६अ०) इति निर्देशः। पुनरन्यत्र गर्भव्याकरणे च दृश्यते "पुण्डरीकेण सदृशं हृदयं स्यादधोमुखम्" इति (सु० शा० ४अ०)।

मूत्राशयपरिचयः सौश्रुतशारीरस्थाने नास्त्येव, अस्ति तु प्रासङ्गिको निदानस्थाने यथा—

"नाभि-पृष्ठ-कटी-मुष्क-गुद-वंक्षण-शेफसाम् ।
एकद्वारस्तनुत्वक्को मध्ये वस्तिरधोमुखः ।
अलाब्वा इव रूपेण सिरास्नायुपरिग्रहः ॥"—इति

( सु० निदान० ३अ० )

'फुस्फुस' परिचयश्च सुश्रुते नैव लभ्यते, न वा क्वचित्तस्य श्वासयन्त्रमित्यभिधानम् । शार्ङ्गधरे तु दृश्यते—"उदानवायोराधारः फुस्फुसः प्रोच्यते बुधै"रिति । न च "शोणितफेनप्रभवः फुस्फुस" इत्यनेन फुस्फुसस्य स्वरूपज्ञानं सम्भवति । तत्स्वरूपावबोधस्त्वद्यापि कथञ्चित् गतानुगतिकश्रुतेरेव ।

'उण्डुक'—परिचयः क्वापि स्पष्टं न वर्णितः, न च "शोणितकिट्टप्रभवः उण्डुक"—इत्युक्तेस्तत्स्वरूपावबोधः । समुन्नेयन्तु तत्स्वरूपं कथञ्चित् मलधराख्यकलाख्यानप्रसङ्गे "उण्डुकस्थं विभजते मलं मलधरा कला"—इत्यभिधानात् । उण्डुको हि नाम बृहदन्त्रस्याद्यो भागश्चरके 'पुरीषोण्डुक' इति प्रतिपादितः ।

आशयार्थाऽज्ञानादर्थव्याकुलीभावश्च प्रतिसंस्कर्त्तृकृतः प्रसङ्गाद् यथा—"तस्य पुनः संख्यानं—त्वचः कला धातवो मला दोषा यकृत्प्लीहानौ फुस्फुस उण्डुको हृदयामाशयौ अन्त्राणि वृक्कौ स्रोतांसि"—इत्याद्युपक्रम्य तत्रैव—"आशयास्तु—वाताशयः पित्ताशयः श्लेष्माशयो रक्ताशय आमाशयः पक्वाशयो मूत्राशयः स्त्रीणां गर्भाशयोऽष्टम इति"—पुनरुक्तौ । इह हि हृदय-फुस्फुसान्त्रादिभ्यः पृथङ्[१] न सन्ति रक्ताशय-श्लेष्माशय-पक्वाशयाद्या आशयाः क्वचिदपि लभ्यमानवैद्यके प्रत्यक्ष-दर्शने वेति नूनमर्थाज्ञानमूलोऽयं पृथङ्निर्देशः । अथ यकृत्प्लीहानौ रक्ताशयं मन्यसे, तत्र रसस्य रक्तीभावोपदेशात्,—तथापि यकृत्प्लीहव्यतिरिक्तोऽसौ रक्ताशयः कथमभिहितः ? वस्तुतस्तु—"त्वचः सप्त, कलाः सप्त, आशयाः सप्त"—इत्यादौ 'समास'वचने यकृत्प्लीहादेरन्तर्भाव एवाशयेषु प्राचामभिप्रेतस्तथाचोक्तप्रसङ्गे पाठसंस्कारः[२] करणीय एव, अन्यथा स्वोक्तिविरोधस्य दुर्वारत्वात् ।

आशयार्थाऽज्ञानात् सुश्रुते अर्थव्याकुली भावः

१ हृदयमेव रक्ताशयः, फुस्फुसः श्लेष्माशयः, अन्त्राणि पक्वाशयश्चेत्यादिः सुप्रसिद्धित्वात्तद्व्यतिरिक्तानां तत्तदाशयानामदर्शनाच्चेत्यभिसन्धिः । २ पाठसंस्कारश्च यथा स्यात्तथा परिशिष्टे विशदं प्रदर्शयिष्यामः ।

सन्ति च खल्विहाद्यापि लभ्यमाने शास्त्रावशेषे नानाविधाः शारीरसंज्ञा यासामर्थावबोधो दुष्करप्रायः। तदुदाहरणानि यथा—सुश्रुते अश्मरीनिदाने—

"वस्तिर्वस्तिशिरश्चैव पौरुषं वृषणौ गुदम्।
एकसम्बन्धिनो ह्येते गुदास्थिविवरस्थिताः॥"

(सु० नि० ३अ०)

तथापीह प्राचीन-शारीरसंज्ञा अद्यापि बहुशो वर्त्तन्ते— दुर्बोधप्रायाः

—इत्यत्र पौरुषं वस्तिशिरश्चेति पदद्वयं दुर्बोधम्। तत्र हि वस्तिशिरस्तावद् वस्तेः शीर्षभागो वा मूलभागो वेति सन्देहः। पौरुषमिति वस्तिमूलस्थो ग्रन्थिविशेषः[1] प्रत्यक्षदृष्टः स्यादिति प्रतीतिः शारीरविदाम्। न चात्र डल्लनोक्तः "पौरुषं मेढ्रम्"—इत्यर्थः सङ्गच्छते, पौरुषस्येह 'गुदास्थिविवरस्थित'त्वाभिधानात्[2]।

किञ्चैवमश्मरीचिकित्सिते—

"सेवनी शुक्रहरणी स्रोतसी फलयोर्गुदम्।
मूत्रसेकं मूत्रवहं मूत्रवस्तिस्तथाऽष्टमः॥"

(सु० चिकि० ७ अ०)—इत्यत्र—

निर्दिष्टानां पदानामर्थग्रहोऽपि अज्ञातशारीराणां सुदुष्कर एव। उक्तप्रसङ्गस्य निभृतनिपुणविचारविशेषतस्तु प्रतीमः—मूत्रप्रसेकः शिश्नस्थो मूत्रक्षरणमार्गः। मूत्रवहं स्रोतोद्वयं वृक्काभ्यां विनिर्गतं, वस्तिमुभयतः प्रविष्टम्। फलस्रोतसी फलकोषाभ्यामूर्द्ध्वं गते शुक्रवहे स्रोतसीत्यादि दिक्।

अथ तृतीयो विपर्य्ययक्रमः काल्पनिकशारीर सम्भवात्

अथापरो विपर्य्ययक्रमः काल्पनिकशारीरसम्भवाद् दृश्यते। इह हि प्रतिसंस्कर्त्तॄणां संग्रहकृताञ्च कल्पनाकल्पतरोरुदियाय नानाविधः शारीरविवरणविस्तर—इत्यवोचाम। सोऽसावनार्षश्च प्रत्यक्षविरुद्धश्चेति सर्वथा वर्जनीय एव। यथा चैतत् तथा साम्प्रतमुदाहरणैः प्रतिपादयामः।

तत्रैकमुदाहरणं वस्तौ मूत्रागमनविषयम्। मूत्रं हि नाम वृक्कयोः सहस्रशोऽवस्थितास्वति सूक्ष्मासु प्रणालीषु नियतं परिस्रवति, ततश्च वृक्कद्वयविनिर्गताभ्यां

---

१ Prostate gland—इत्याख्यया प्रसिद्धः। २ यद्यपि वृषणावपि न गुदास्थिविवरस्थौ तथापि गर्भावस्थानकाले बालस्य श्रोणिविवरान्तरेव तयोरवस्थानात् तथाभिधानं सङ्गच्छते। मेढ्रन्तु तदापि श्रोणिविवराद्बहिरेव।

"मूत्रवह" संज्ञाभ्यां स्रोतोभ्यां प्रचरति मूत्राशये वस्त्यपरपर्य्याये—इत्येतद-सन्दिग्धं सत्यं प्रत्यक्षसिद्धं परीक्षासिद्धञ्च। परं सुश्रुतेऽश्मरीनिदाने श्रूयते—

"पक्वाशयगतास्तत्र नाड्यो मूत्रवहास्तु याः।
तर्पयन्ति सदा मूत्रं सरितः सागरं यथा॥
सूक्ष्मत्वान्नोपलभ्यन्ते मुखान्यासां सहस्रशः।
नाड़ीभिरुपनीतस्य मूत्रस्यामाशयान्तरात्॥
जाग्रतः स्वपतश्चैव स निःस्यन्देन पूर्य्यते॥
आमुखात् सलिले न्यस्तः पार्श्वेभ्यः पूर्य्यते नवः।
घटो यथा तथा विद्धि वस्तिर्मूत्रेण पूर्य्यते॥" इति—
(सु० निदान० ३अ०)।

मा चैवं मंस्थाः—परमर्षीणामिवैष मतिभ्रमो, नात्र प्रतिसंस्कर्त्तुरपराध—इति। यतः अतिपुराणे सर्वायुर्वेदमहाकरेऽथर्ववेदे, सुश्रुते चान्यत्र दृश्यते मूत्रनिर्म्माणविषयकस्यापि यथार्थं शारीरज्ञानस्य पुष्कलं प्रमाणम्। तद्यथा—

अथर्ववेदे मूत्ररोधप्रसङ्गे शरशलाकया मूत्रसंस्रावणप्रसङ्गे मन्त्रः—

"यद् आन्त्रेषु गवीन्योर्यद्वस्तावधि संश्रितम्।
एवा ते मूत्रं मुच्यतां बहिर्वालिति सर्वकम्॥" इति[1]—

अत्र गवीन्योरित्यनेन निःसंशयं वृक्काभ्यां विनिर्गते मूत्रवहे स्रोतसी लक्ष्येते। व्याख्यातञ्च सायणाचार्य्येणापि—"मूत्रस्य मूत्राशयप्राप्तिसाधने पार्श्वद्वयस्थे नाड्यौ गवीन्यौ इत्युच्येते" इति।

सुश्रुतेऽपि धमनीव्याकरणे—

"मूत्रवस्तिमभिप्रपन्ने मूत्रवहे द्वे" इति स्पष्टं गवीन्योरेव निर्देशः।

---

१ एष मन्त्रः अथर्ववेदस्य प्रथमकाण्डे प्रथमानुवाके ३य सूक्ते लभ्यते। अस्य चेदं सायनभाष्यम्—"आन्त्रेषु उदरान्तर्गतेषु पुरीतत्सु। अधि सप्तम्यर्थानुवादे। यत् मूत्रं संश्रितं समवस्थितं रोगवशाद्बहिर्निर्गच्छन्निरुद्धमभूत्। तथा गवीन्योः,—आन्त्रेभ्यो विनिर्गतस्य मूत्रस्य मूत्राशयप्राप्तिसाधने पार्श्वद्वयस्थे नाड्यौ गवीन्यौ—इत्युच्येते। तयोरपि यत् मूत्रं संश्रितम्। तथा वस्तौ—धनुराकारो मूत्राशयो वस्तिरुच्यते, तत्रापि यत् मूत्रं संश्रितमस्ति। ते तव उक्तस्थानेषु निरुद्धं तत् मूत्रं, एवा एवम् यथापूर्वं मुच्यतां निर्गच्छतु। निर्गमनप्रकारमेवाह, सर्वकं सर्वं तन्मूत्रम्। वाल्—अनुकरणशब्दोऽयम्। इति एवमात्मकं शब्दं कुर्वत्। बहिः शरीराद् बाह्यप्रदेशे। मुच्यतामिति सम्बन्धः। गवीन्यौ = Ureters.

किञ्चाश्मरी चिकित्सितेऽपि श्रूयते सुश्रुत एव—

"मूत्रवह-शुक्रवह-मुष्कस्रोतो-मूत्रप्रसेक-सेवनी-योनि-गुद-वस्तीन् परिहरेत्। तत्र मूत्रवहच्छेदान्मरणं मूत्रपूर्णवस्तेः। शुक्रवह च्छेदान्मरणं क्लैव्यं वा। मुष्कस्रोत-उपघाताद् ध्वजभङ्गः। मूत्रप्रसेकक्षणनान्मूत्रक्षरणम्।" इत्यादि

( सु० चिकि० ७अ० )

अत्रापि मूत्रवहे गवीन्याविव। मूत्रप्रसेकः शिश्नस्थो मूत्रमार्ग इत्युक्तपूर्वम्।

अतएव वयं मन्यामहे,—पूर्वोद्धृतसन्दर्भे "सूक्ष्मत्वान्नोपलभ्यन्ते मुखान्यासां सहस्रशः" इत्युक्त्वा परमर्षिणा वृक्काभ्यन्तरस्थाः सूक्ष्मतमा प्रणाल्योऽभिलक्षिताः, ताभिर्हि शनैर्मूत्रं सञ्चिन्वतोभिर्वृक्कहृदये प्रथमं, ततश्च वृक्काभ्यां विनिर्गतयोर्गवीन्योर्मूत्रमर्प्यते, गवीनीभ्यान्तु मूत्रस्य मूत्राशयप्राप्तिः। प्रतिसंस्कर्त्ता पुनरिह शारीराऽज्ञानात् स्वकपोलकल्पनया मूत्राशय एव मूत्रवहा नाड्यः सहस्रशो योजिताः—इति हास्यास्पदमेवेदं विदितशारीराणाम्।

अथवा लिपिकरप्रमाद एवात्र स्वीक्रियताम्। तथाहि प्रथमश्लोके "तर्पयन्ति सदा मूत्रं" इत्यत्र "तर्पयन्ति सदा वृक्कौ"—इति पाठ एव साधीयान् प्रतिभाति, "सरितः सागरं यथा तथा मूत्रं तर्पयन्ती"त्युक्तौ सागर-मूत्रयोरुपमानोपमेयभावासङ्गतेः। शेषतश्च "घटो यथा तथा विद्धि वस्तिर्मूत्रेण पूर्य्यते"-इत्यस्य स्थाने "घटो यथा तथा वृक्कौ ततो वस्तिश्च पूर्य्यते" इति पठनीयम्। "विद्धि" इति पदस्य वृथागर्भितत्वादुक्तहेतोश्च।

अपरश्च शारीराऽज्ञानजन्यः सार्व्वजनीनप्रायो भ्रमो यथा—

"यथा पयसि सर्पिस्तु गूढ़श्चेक्षौ रसो यथा।
शरीरेषु तथा शुक्रं नृणां विद्याद् भिषग्वरः"।—( सु०शा० ४ अ० )

इति प्राचीनसौश्रुतपद्यदर्शनात् शुक्रस्य स्थानमेव नास्तीति मन्यन्ते केचिद् भिषजः। वस्तुतस्तु शुक्रं नियमेन फलकोषयोर्निर्म्मीयते, सञ्चीयते च शुक्राधारयोर्वस्तिपार्श्वगतयोः शुक्रवहाभ्यां स्रोतोभ्याम्। अतएव चरके—

"शुक्रवहानां स्रोतसां वृषणौ मूलम्" इत्यादि ( च० विमान० ५ अ० ) सुश्रुतेऽपि—"शुक्रवहच्छेदान्मरणं क्लैव्यं वे"ति स्पष्टमुच्यते। न च शुक्रा-

---

१ अत्र वस्तिपदेन वस्तिदेश उच्यते, अन्यथा अर्थासङ्गतेः।

धारयोर्ज्ञानाभावः परमर्षीणां सम्भवति, यतश्चरके वाजीकरणपादे नक्रशुक्रं व्यवस्थितम्, न च तत् शुक्राधारच्छेदमन्तरा लभ्यते।

"यथा पयसि सर्पि"रित्याद्यभिधानन्तु सर्वशरीरचरं सूक्ष्मतरं शुक्रसारं लक्षयति। अस्ति हि स्थूलं शुक्रं व्यवायादौ प्रच्यवत्—"स्फाटिकाभं द्रवं स्निग्धं",—यदधिकृत्य प्रवृत्तो वादः। अस्ति चापरं सूक्ष्मतरं सारभूतं शुक्रं, यस्मात् पुंस्त्वव्यञ्जकश्मश्रु-पौरुषाकृतिविशेषाः सम्भवन्ति, यदभावाच्च कृतकनपुंसकानां बलीवर्द्दादीनां नाविर्भवन्ति ककुदादीनि पुंस्त्वलिङ्गानि। तदेवं शुक्रद्वैविध्ये सिद्धे सूक्ष्मतरं शुक्रमभिप्रेत्य "यथा पयसि सर्पि"रित्यादि प्राचां वचनं व्याख्येयम्।

चतुर्थः शारीरविपर्य्यय-क्रमो लिपिकरप्रमाद-निमित्तः।

अथ चतुर्थः शारीरविपर्य्यासक्रमो लिपिकरप्रमादजन्य इति निर्विशङ्कं ब्रूमः। तदुदाहरणानि यथा—"पित्त-पक्वाशयमध्ये गर्भाशयो यत्र गर्भस्तिष्ठति"(सु॰शा॰५अ॰)—इत्यत्र "वस्ति-पक्वाशयमध्ये" इति पाठो भवितुमर्हति, शरीरे तथैव दर्शनादन्यथा प्रत्यक्षविरोधाच्च।

किञ्च—"द्व्यङ्गुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाप्यधः।

मूत्रस्रोतःपथाच्छुक्रं पुरुषस्य प्रवर्त्तते"। ( सु॰ शा॰४ अ॰ )

—इत्यत्र "द्व्यङ्गुले दक्षिणे वामे"—इत्येव साधीयान् पाठः, अन्यथा प्रत्यक्षविरोधात्, स्वोक्तिविरोधाच्च। श्रूयते हि "शुक्रवहे द्वे शुक्रप्रादुर्भावाय, द्वे शुक्रविसर्गाय चे"ति सुश्रुत एव ( सु॰ शा॰ ९ अ॰ )।

सन्ति च विपर्य्यस्तेऽपि शारीरे प्राचां सत्यसिद्धान्तज्ञान-सूचकानि प्रमाणानि यथा (१) रक्तसंवहन-क्रिया-वर्णनम्।

तदेतत् क्रमचतुष्टयं वैद्यके शारीरविपर्य्यासस्य। इदन्तु परमत्र विस्मयपदं यदित्थं विपर्य्यस्तेऽपि शारीरे न केवलमुपलभ्यन्ते सत्यसिद्धान्तबोधकानि प्रमाणानि संज्ञाद्यापि किन्तु रक्तसंवहनादि शारीरक्रियासूत्राण्यपि बहुशः। रक्तसंवहनक्रिया हि नाम—अन्नरसस्य यकृत्-प्लीहप्रचारेण शोणितीभूतस्य महासिराद्वयानीतेन रक्तेन सह मिलितस्य हृदयदक्षिणार्द्धे प्रवेशस्ततः फुस्फुसयोर्गत्वा 'विष्णुपदामृत'संयोगात् परिशोधितस्य पुनर्हृदयवामार्द्धे प्रत्यागमनं, ततः सर्वशरीरप्रचारो धमनीभिस्ततश्च पुनः सिराभीरसायनीभिश्च समानीतस्य महा-

१ इदं पाश्चात्यशारीरे—Internal secretion of the Testicles—इत्याख्यया प्रसिद्धम्।

सिराभ्यां हृदयदक्षिणार्द्धे पुनः प्रवेशः—इति सुपरीक्षितं परीक्षकाणाम्। तदेतत्तत्वमाविष्कुर्वतां प्रतीच्यकोविदानां नाद्यापि वर्षशतत्रयमत्यगात्, परमधुनाऽपि प्राचीन शारीरशेषे श्रूयते—

"दश मूलसिरा हृत्स्थास्ताः सर्वं सर्वतो वपुः। रसात्मकं वहन्त्योज" इति—

( अष्टाङ्गहृदय० शा० ३ अ० )।

सुश्रुतेऽपि "तस्य च हृदयं स्थान"—मित्यादिपूर्वोद्धृतः सन्दर्भ एतदेव लक्षयति. धमनीभिः सर्वशरीरे रसप्रचारस्य वर्णनात्। चरकेऽपि—

"यत् सारमादौ गर्भस्य यत्तद्गर्भरसाद्रसः।
संवर्त्तमानं हृदयं समाविशति यत् पुनः।"—

(च० सूत्र० ३० अ०)

इति पाठोऽपि तदर्थसूचक एव। श्वासवायुना "विष्णुपदामृत"-ग्रहणं शार्ङ्गधरोक्तन्तु दर्शितपूर्वं, तच्च रक्तस्य फुस्फुसागतस्य शोधनं सूचयतीत्यलं विस्तरेण।

तन्त्रोक्तः षट्चक्रविस्तरश्च प्राचां शारीरज्ञानमपूर्वं बोधयति। तत्र दिगिहैव दर्शितपूर्वा। दर्श्यते चापरं किञ्चित्। तथाहि श्रूयते—

(२) षट्चक्रविज्ञानम्

षट्चक्राणि शरीरे मूलाधार-स्वाधिष्ठान-मणिपूरा-ऽनाहत-विशुद्धाऽऽज्ञासंज्ञानि। तत्र मूलाधारस्तावत् "ध्वजाधो गुदोर्द्ध्व","खगाण्डवद्"-उच्यते—तदेतत् ग्रन्थ्याकारं दृश्यते मृतके गुदास्थि पुरस्ताद् ईड़ापिङ्गलाख्यनाड़ीद्वयमूलभूतम्। तच्च पाश्चात्यानां—Ganglion Coccygeum Impar—इत्याख्यया प्रसिद्धमित्यस्माकं निर्णयः। स्वाधिष्ठानचक्रं "ध्वजमूले"ऽवस्थितं, तच्च पाश्चात्यानां शारीरे – Hypogastric Plexus इत्याख्यया प्रसिद्धं नाड़ीचक्रमिति प्रतिभाति। मणिपूरचक्रं नाम "तस्योर्द्ध्वं नाभिमूले" स्थितं नाड़ीचक्रं प्राचां, स च पाश्चात्यानां—Solar Plexus—इति प्रसिद्धश्चक्राकारो नाड़ीसंघात एव। "तस्योर्द्ध्वं हृत्प्रदेशे"ऽवस्थितं पुनरनाहताख्यं चक्रं, पाश्चात्यनये—Cardiac Plexus – इत्याख्यया प्रथितो नाड़ीसमवायः प्रतीयते। विशुद्धाख्यं तु चक्रमभिन्नं—Carotid Plexus—इत्याख्येन नाड़ीचक्रेण कण्ठदेशावस्थितेन। आज्ञाचक्रं पुनर्भ्रूमध्यानुपूर्व्याऽवस्थितं पाश्चात्यनये—Cavernous Plexus—इत्यनेन तुल्यार्थमिति नः प्रतीतिः। सर्वोर्द्ध्वं च शिरसि विन्यस्तं 'सहस्रारं' सर्व-

१ "सिराभिरावृता नाभिश्चक्रनाभिरिवारके"रित्यादि प्राचीनप्रयोगश्च एतदेव चक्रं लक्षयतीति नः प्रत्ययः।

ज्ञानायतनं, तच्च मस्तिष्कमेवेत्यत्र न सन्देहः। तदेतदखिलं सूक्ष्मानुसूक्ष्मविशेषविवेकेन सम्यग् बुबुधिरे प्राञ्चः—इति षट्चक्रनिरूपणाद्यालोचनया दृढ़ं प्रतीमः। कालवशात्तु हन्त प्रविलुप्तं ज्ञानमाविर्भूतानि च ज्ञानार्ज्जनकण्टकानि शतशः—इति नैषा प्राचां वचनीयता।

कर्त्तव्ये शारीरप्रतिसंस्कारे द्विविधं साधनम्

अथैतर्हि सम्पादनीये शारीरप्रतिसंस्कारे द्विविधमिहोपकरणमुपलभामहे—प्राचीनशारीरञ्च प्रत्यक्षविज्ञानञ्चेति। तत्र प्राचीनशारीरं तावद् बहुधा विपर्य्यस्तमपि नानाविधज्ञाताऽज्ञातसंज्ञानामाकरभूतमद्यापि वरीवर्त्ति। वस्तुपरिचयसाधनानि चात्र नैकधा दृश्यन्ते यतस्ततः प्रासङ्गिकानि, भग्नावशेषहर्म्ये पृथु महार्घरत्नानीव रजोधूसराणि। प्रत्यक्षविज्ञानं पुनर्मृतकपरीक्षयाऽर्ज्जितमिदानीमपरं साधनं सर्व्वसन्देहनिराकरणम्। न चेदमायत्तं नव्यानामिव, नवैतत् तेषामेव शास्त्रं, प्रत्यक्षज्ञानस्य सर्वजनसम्पाद्यत्वात्। न च नाकलयामः प्राचामुपदेशं प्रत्यक्षपरीक्षणविधायकं बहुधा। यत्र यत्र च पुनरुपलभ्यते प्रत्यक्षविरुद्धं शारीरं, दिष्ट्या तत्र तत्रैव विषये प्रत्यक्षानुगतसिद्धान्तबोधकानि सन्त्यपराणि प्राचां वचांसि,—येन लभ्यमानानि प्रत्यक्षविरुद्धवचनानि,—प्रक्षिप्तानि वा प्रतिसंस्कर्त्तृकल्पनोत्थानि वा लिपिकरप्रमादकण्टकितानि वेति युज्यते वक्तुम्।

इत्थंगते चेदानीं शारीरप्रतिसंस्कारः षोढ़ा संविधातव्यः—

शारीरप्रतिसंस्कारस्य षड्विधो विधिः—

(१) प्रसिद्धानां कासाञ्चित् प्राचीनसंज्ञानां परिभाषानिर्द्धारणेन, (२)अनतिप्रसिद्धानामप्रसिद्धानां वाऽपरासां संज्ञानामाविष्करणाऽर्थनिर्णयाभ्याम्, (३) प्राचीनसंज्ञाऽलाभे नवीनसंज्ञानां निर्म्माणेन, (४) प्रत्यक्षदृष्टशारीरस्य सम्यग्वर्णनेन, (५) प्रत्यक्षानुगत्या प्रामादिकपाठ-संशोधनेन, (६) दृश्यविषयैः प्राचीनशारीरस्य सामञ्जस्यसम्पादनेन चेति। तत्र—

(१) परिभाषानिर्णयः

(१) प्रसिद्धानां प्राचीनसंज्ञानां परिभाषानिर्द्धारणविधिः सिराधमन्यादिपदानामर्थविचारप्रसङ्गे दर्शितपूर्वः। सन्ति चापराणि क्लोमादीनि सन्दिग्धार्थपदानि येषामर्थविचारं परिशिष्टे सविस्तरं करिष्यामः।

(२) अनतिप्रसिद्धानां संज्ञानामाविष्करणमर्थनिर्णयश्च यथा यथा शक्यते कर्त्तुं तदुदाहरणमथर्ववेदनिर्दिष्टस्य गवीन्यादिपदस्यार्थविचारे प्रादर्शयाम। याश्च वैद्यके मूत्रवह-मूत्रप्रसेकादिसंज्ञा दर्शितचरास्ता अनतिप्रसिद्धा अपि ज्ञेयार्थाः श्रमविशेषेण। सन्ति च तन्त्रेषु काश्चिदीडा-पिङ्गलाद्याः संज्ञा यासाञ्चार्थनिर्द्धारणमकरवाम। सत्सु चैवं नानाशास्त्रप्रकीर्णेषु बहुषु संज्ञाशब्देषु तदर्थद्योतनाय न निर्म्माणीयाः, न वा प्रयोज्याः संज्ञा नवीनाः— अन्यत्र प्रसिद्धतरसंज्ञाभ्यः। दृश्यन्ते हि वेदेषु काश्चन संज्ञाः शारीर्य्यो याः प्रायेणाश्रुतपूर्वा वैद्यैः। यथा—अनूकम्, पुरीतत्, गवीन्यौ, वनिष्ठुः, ग्रावस्तुत्—इत्यादयः। सन्ति च वैद्यकग्रन्थेष्वपराः यथा—कृकाटिका-कुकुन्दर-गोजिह्विकादयः। तन्त्रेषु चान्याः—यथा कुहूः, अलम्बुषा—इत्यादयः। तासामर्थनिर्द्धारणक्रमानपि परिशिष्टे प्रदर्शयिष्यामः।

(२) अप्रसिद्धप्राचीन-संज्ञानामाविष्कारः

(३) प्राचीनसंज्ञाऽलाभे नवीनसंज्ञानां निर्म्माणन्तु शारीरवर्णनविधौ बहुधाऽवश्यकमुपलभ्यते। तत्र च डित्थ-डवित्थादिवन्निरर्थकसंज्ञाकरणादन्वर्थानाञ्च श्रुतिसुभगानाञ्च संज्ञानामेव निर्म्माणं श्रेयः, शिष्याणां स्मरणसुखत्वात्।

(३) नवीनसंज्ञानिर्म्माणम्

(४) प्रत्यक्षदृष्टशारीरस्य सम्यग्वर्णनं तावदल्पैः पदैरतिदुष्करम्। अस्ति ह्यत्र पाश्चात्यानां शारीरं प्रभूतविस्तरं यस्यैकैको ग्रन्थश्चरक-सुश्रुत-वाग्भटानां समष्टिकोटिमारोहति विशालायतनेन। न च तादृशं विपुलविस्तरमधीयेरन् वैद्यकविद्यार्थिनो निष्प्रयोजनप्राय-विषयबाहुल्यात्। न चातिसंक्षिप्ते कृते सम्यगर्थोऽवबुध्येत, शारीरविषयाणामश्रुतचरत्वात्, प्रत्यक्षमन्तरा दुरधिगमत्वाच्च। एवञ्च प्रत्यक्षानुकल्पभूतानि चित्राण्यपि बोधसौकर्य्याय बहुधा प्रयोज्यानि, तानि च बहुश्रमसम्पाद्यानि प्रचुर-व्ययसाध्यानि च।

(४) प्रत्यक्षदृष्टशारीरस्य सम्यग् वर्णनम्

(५) प्रत्यक्षानुगत्या प्रामादिकपाठसंशोधनविधिरणेह प्रदर्शितचरः। अपराणि च पाठसंशोधनानि परिशिष्टे प्रदर्शनीयानि सविचारम्। इह तु विस्तरभिया विरम्यते।

(५) प्रामादिक पाठ-संशोधनम्

(६) प्रत्यक्षदृश्यविषये: प्राचीनशारीरस्य सामञ्जस्यविधानं तावद् बहु-

(६) नव्यप्राचीन-शारीरयो: सामञ्जस्य-विधानम्

श्रमविचाराभ्यां साध्यमपि करणीयमेव, प्राचीनप्रत्ययिनां सन्देह-निराकरणाय। दृश्यन्ते हि प्राचीनशारीरे बहव एवाऽपातविरुद्धा विषया:, येषां विरोधो न केवलं प्रत्यक्षदृश्यशारीरेणैव किन्तु परस्परमपि। तथाहि चरक-याज्ञवल्क्यादिषु षष्ट्यधिकं शतत्रयमस्थ्नां परिगण्यते, सुश्रुते तु शतत्रयं, नव्यशारीरे तु शतद्वयमेव। अस्य पुन: समाधानम्,—"आपात-विरुद्धवादिनोऽपि सर्व एवैते ऽवितथमाहु:। गणनाप्रकारभेदात्। तथाहि वेद-वादिनो नखदन्तादीनस्थिगणनायामन्तर्भावयन्ति नैवमितरे। तरुणास्थीनि दशनांश्च गणयन्ति शल्यतन्त्रविद: प्राच्या:, नैवं प्रतीच्या:। पृथगवयोग्रहणाच्च। प्राच्यो हि यौवनप्रविष्टस्य सञ्चक्षतेऽस्थीनि, प्रौढ़स्य तु पञ्चविंशतिवर्षदेशीयस्य प्रतीच्या:"—इत्यादिना मूलग्रन्थे वक्ष्यते। तत्र विरोधपरिहारस्य कानिचिदुदा-हरणानि यथा।—सुश्रुते श्रूयते "पार्श्वे षट्त्रिंशदेवमेकस्मिन्, द्वितीयेऽप्येवम्" इति, नव्यमते तु एकैकस्मिन् पार्श्वे द्वादशैव पर्शुका:—इति विरोधे, तत्समाधानं—सुश्रुते एकैकस्मिन् पार्श्वे द्वादश पर्शुका:, द्वादश उपपर्शुका:, द्वादश पर्शुकामूल-भागाश्चेति गणनया सुकरम्। पर्शुकामूलभागा हि तन्मुण्डसहिता: पृथगेव दृश्यन्ते, आपञ्चविंशतिवर्षात्। एवं च सुश्रुते—"एकैकस्यान्तु पादाङ्गुल्यां त्रीणि त्रीणि, तानि पञ्चदश। तलकूर्चगुल्फसंश्रितानि दश। पार्ष्ण्यामेकम्। जङ्घायां द्वे। जानुन्येकम्। एकमूराविति। त्रिंशदेवमेकस्मिन् सक्थ्नि भवन्ति"—इत्यादौ "एकैकस्यां तु पादाङ्गुल्यां त्रीणि त्रीणि द्वे अङ्गुष्ठे इति चतुर्दश। तल-कूर्चगुल्फसंश्रितानि एकादश"—इति पाठसंशोधनं सर्वथा युज्यते, अन्यथा सन्धि-वर्णनोक्तेन "एकैकस्यां पादाङ्गुल्यां त्रयस्त्रयो द्वावङ्गुष्ठे, ते चतुर्दश" इति स्ववचसा विरोधो दुर्वार:, प्रत्यक्षदर्शनतश्च तादृशेव पाठ: साधीयानिति दिक्।

अस्थ्यादिसंख्यासामञ्जस्यप्रदर्शन्य: सारण्यस्तु विदितशारीराणामेव बोद्धव्या:—इति कृत्वा परिशिष्टे संयोजनीया:।

तदेतदखिलं प्रतिसंस्कारविधिं स्मारं स्मारमस्माभिर्यथामतिश्रमपरै: प्रत्यक्ष

ग्रन्थनिर्माणक्रमो ग्रन्थकर्त्तु: श्रमपरिचयश्च

शारीराख्योऽयं ग्रन्थो निरमायि। अत्र चादौ शिष्याणां सम्यगव-बोधाय परिभाषा निरूपिता:, नवीनसंज्ञाश्च तदन्वर्थतां च स्मरणसुखताञ्च प्रकल्प्य यथाशक्ति प्राचां पदाङ्कानुसारत एवोद्-भाविता:। गृहीताश्च वेदादिभ्यो वैद्यकग्रन्थेभ्यश्च नवीनायिता: काश्चित्

पुराख्यः संज्ञा गवीन्यादयः। प्रत्यक्षदृष्टशारीरस्य वर्णनन्तु यावच्छक्यमल्पैरेव पदैः शिष्योपयोगितां मनसिकृत्य व्यधायि। चित्राणि चानल्पानि विषयावबोधसहायकानि श्रमलाघवञ्च व्ययकार्पण्यञ्चाऽकृत्वैव संयोजितानि। प्रदत्तानि च शारीरसंज्ञानां नवीन-पुराणानां निरूपणसौकर्य्याय पत्राधस्तनीषु टीकासु आंग्लभाषासंज्ञाः, दुर्बोधपदानां सरलार्थाश्च। एवं हि पाश्चात्यायुर्वेदमात्रज्ञानां डाक्टर-पदवाच्यानां भिषजामपि साहाय्यमज्ञातशारीराणां वैद्यविद्यार्थिनां सुलभं स्याद् अर्थांश्च साधु प्रतीयेरन्। प्राचीनपाठसंस्कारं सविस्तरं नव्य-प्राचीनमत-समन्वयञ्च ग्रन्थसमाप्तौ परिशिष्टभागे यथाशक्ति सविस्तरं विधास्यामः।

न चायं ग्रन्थःकस्यचित् पाश्चात्यग्रन्थस्यानुवादः

इदञ्चेह कृपया विमृशन्तु प्रेक्षावन्तो यदेष प्रत्यक्षशारीराख्यो ग्रन्थः कस्यचिदपि पाश्चात्यशारीरग्रन्थस्यानुवादो न भवतीति। यैः खलु पूर्वं तादृशोऽनुवादो विहितः पाश्चात्यविद्याप्रवीणैस्तेषां हि ग्रन्थेषु दृश्यतेऽतिदारुणः संज्ञाविपर्य्ययो दुर्बोधता च, बहूनां प्राचीन-संज्ञानां निरङ्कुशप्रयोगात् पाश्चात्यसंज्ञानां तादवस्थ्येनोपलम्भाच्च। न हि तादृशमप्राच्यमपाश्चात्यं भाषासङ्करं सम्यगुच्चारयितुमलं वैद्यविद्यार्थिनः, किं पुनर्बोद्धुम्। एवंविधहेतोरतिविस्तराभिधानाच्च तत्र न भिषजामुन्मुखीभावः। नापि तेनायुर्वेदोपकारः। तदिदमाकलयतामस्माकं श्रमराशिं कृततादृश-श्रमा एव बुध्येरन्। साफल्यन्तु पुनरस्मद्ग्रन्थस्य निरवधिना कालेन च विशेषज्ञजनैश्च निर्णेष्यते, नात्र वयं प्रभवामः।

एतत् परमतीव सन्तोषमावहति यद् ये खलु विद्यार्थिनो भिषजश्च ज्ञान-पिपासवो नानादिग्देशागताः प्रत्यक्षशारीरस्याद्यभागमस्माभिरध्यापितास्तैः सुगम एवामन्यत दुर्बोधोऽप्ययं विषयः। स्मरन्ति च ते सानन्दमीदृशान् स्मारक-श्लोकान् नीरस दुःस्मर-विषयाणाम्—यथा—

"भर्झरश्च जतूका च शुक्तिका चाथ सीरिका।
स्वसंज्ञश्चोर्द्ध्वहन्वस्थि ताल्वस्थ्ना संहितानि षट्।"

(प्रत्यक्षशारीरे ताल्वस्थिवर्णने—८५ पृ०)

त्रुटीस्वीकारः क्षमाप्रार्थना च

अथैवं सुमहता प्रयत्नेन साधितेऽप्यस्मिन् ग्रन्थविरचनकार्य्ये अस्मद्दृष्टि-दोषाद्वा मुद्राकरत्रुटीनां दुष्परिहरत्वाद्वा अस्मादृशाऽल्पज्ञजन भ्रम-प्रमादसौलभ्याद्वा यत्र यत्र स्खलनमभूत्तत्र दोषज्ञ-जन-करुणैव नः शरणम् । प्रार्थयामहे च प्रवीणान्—गुणमात्रपक्ष-पातपरायणैरत्रभवद्भिरध्ययनाध्यापनाभ्यामस्मद्ग्रन्थस्य [1] सफलीकरणीयो नः श्रम इति। मा भूदतःपरमुपहास्यता प्राच्यवैद्यानां पाश्चात्यवैद्यैः शारीराऽज्ञान-निमित्तम् ।

इदञ्चावसाने निवेद्यम्—

आ-काश्मीर-कुमारिकं[2] कृतधियाम् आ-चट्टलं-द्वारकं[3]
येषां पत्रशतैरिहास्म सुतरां प्रोत्साहिता दुर्गमे ।
येषाञ्चाथ नियोगतः श्रममिमं सत्यं लघुं मन्महे
तेषामेव कृतित्वमत्र न तु नोऽनुज्ञावहा वै वयम् ॥

इति—विद्वज्जनकृपार्थिनो

**गणनाथस्य**

---

१ कृपया शुद्धिपत्रदर्शनेन शोधनीया दृष्टाशुद्धयः पाठाः, विज्ञाप्याश्चापरे अस्माभिरदृष्टाशुद्धय इत्यभिप्रायः।

२ कुमारिका नाम कन्याकुमारिकाख्यो भारतस्य दक्षिणतमः प्रान्तः, काश्मीरदेशस्तु उत्तरतमः। ३ चट्टलग्रह-ग्रामो भारतस्य पूर्वतमः प्रान्तः, द्वारका तु पश्चिमतमा।

# शुद्धिपत्रम् ( उपोद्घातस्य )।

| (पृष्ठे) | (पंक्तौ) | (अशुद्धम्) | (शुद्धम्) |
|---|---|---|---|
| ख | १२ | सुश्रुतोपधेनवौ | सुश्रुतौपधेनवौ |
| ग | १ | भूतवैद्या: | भूतवैद्या: |
| ग | १ | जीवकाद्यां: | जीवकाद्या: |
| ग | २८ | कचपुटतन्त्रारम्भे | कचपुटतन्त्रारम्भे |
| घ | १ | यवनरेव | यवनैरेव |
| घ | १६ | निबन्धा | निबन्धा: |
| घ | २० | साम्प्रतं | साम्प्रतं |
| ङ | ७ | तन्त्रास्यास्य | तन्त्रस्यास्य |
| ङ | १३ | परम कारुणिकेण | परम कारुणिकेन |
| ङ | २० | भित्यादि पद्ये | मित्यादि पद्ये |
| ङ | २१ | शेषानां | शेषाणां |
| च | ३ | तदेतरुणदत्तो | तदेतदरुणदत्तो |
| च | २१ | व्यास: | कात्यायन: |
| च | २७ | प्रतिसंस्कर्त्तृ सूत्रं | प्रतिसंस्कर्तृसूत्रं |
| च | २८ | धन्वन्तरि: | धन्वन्तरि: |
| च | २८ | धन्वन्तरि'त्यादि | धन्वन्तरिरित्यादि |
| च | २८ | कौपनै: | कौपनै: |
| च | ३० | प्रतिसंस्कर्त्त सूत्रम् | प्रतिसंस्कर्तृ सूत्रम् |
| छ | ६ | न्याख्यास्यत | नाख्यास्यत |
| छ | २३ | श्रीचरणरङ्ग | श्रीरणरङ्ग |
| छ | २४ | मञ्जुषायाम् | मञ्जूषायाम् |
| ज | २८ | सुखदु:ख | सुखदु:ख |
| झ | १८ | प्रचरयामास | प्रचारयामास |
| ञ | २८ | अखण्डार्थं | अखण्डार्थं |
| ट | १४ | संस्कर्त्तृतया | संस्कर्त्तृ तया |
| ट | १८ | माध्यामिक | माध्यमिक |
| ट | २२ | नेपालप्रत्यान्तष्वासीत् | नेपालप्रत्यन्तेष्वासीत् |
| ठ | पार्श्वटिप्पण्यां | दशविपर्य्यास: | दशाविपर्य्यास: |
| ड | २३ | तदेतखिल | तदेतदखिल |

| | | | |
|---|---|---|---|
| ड | २५ | अपराह्नवेला | अपराह्णवेला |
| ढ | १८ | भत्तो | मत्तो |
| त | १२ | सवत्रैव | सर्व्वत्रैव |
| द | २८ | Burneil's | Burnell's |
| थ | ८ | दिष्ट्याऽप्यादि | दिष्ट्याऽप्यापि |
| प | ६ | सौकुमार्य्याच्च | सौकुमार्य्याच्च |
| फ | २४ | तन्वान्यार्षाणि | तन्वाख्यार्षाणि |
| ब | ३ | प्रमाणान्यापि | प्रमाणान्यपि |
| व | २५ | सन्यगन्वेषणेन | सम्यगन्वेषणेन |
| भ | ६ | खिया | स्त्रिया |
| र | १ | पुनस्तत्रैवाग्र | पुनस्तत्रैवाग्रे |
| ल | १५ | न्यस्यति | न्यस्यति |
| आ | १२ | पर्व्वंसत्ता | पूर्व्वंसत्ता |
| इ | २६ | तदेतत्तन्त्तत्रयं | तदेतत्तन्त्रत्रयं |
| ई | १ | मधुनैव | मधुनाऽपि |
| उ | १५ | जननाथ | जननार्थं |
| ऋ | २१ | अतिविशदत्वान्यैत्र | अतिविशदत्वान्यंत्र |
| ऋ | २७ | केचिदप्यपि | केचिदप्यापि |
| ऌ | २७ | अकरव्वी | अकव्वरी |
| ऌ | २ | आलोचयामः | आलोचयामः |
| ५२ | २ | कालीनामाचार्य्याणां | कालीनानामाचार्य्याणां |
| ५४ | २७ | ( ५०—५० ) | ( ५०—५५ ) |
| ६२ | पार्श्वटिप्पण्यां | तावाड्गी | तचायी |
| ,, | ,, | परिचय: | परिचय: |
| ६३ | २६ | इयं | इदं |

# प्रत्यक्षशारीरम्

समस्तभारतभिषक्सम्मेलनलब्ध-

'वैद्यावतंस'पदवीकेन

कविराज

**श्रीगणनाथ सेन विद्यानिधि-कविभूषण, एम्-ए,**

**एल्, एम्, एस्,**

इत्यनेन कृतः

प्रत्यक्षदृष्टनरदेहतत्त्व-

वर्णनपरः

**शारीरग्रन्थः ।**

[ तस्य चायम्

**अस्थिसन्धिस्नायुवर्णनीयो नाम**

प्रथमो भागः । ]

तदन्तेवासिना

**श्रीराखालदास सेन काव्यतीर्थेन**

कलिकाता महानगरतः

प्रकाशितः ।

PRINTED BY GOBARDHAN PAN.
AT THE GOBARDHAN PRESS,
*80/1, Muktaram Babu's Street, Calcutta.*

and

PUBLISHED BY KAVIRAJ RAKALDAS SEN KAVYATIRTHA
*From 65, Beadon Street, Calcutta.*



इह वामतो दृश्यमानं—पुरश्चित्रम्—आशयादिप्रदर्शनार्थम्।

## चित्र-व्याख्या।

| | |
|---|---|
| १। मस्तिष्कम् | १२। वृक्कः (वामः) |
| २। स्वरयन्त्रम् | १३, १३। क्षुद्रान्त्राणि |
| ३। श्वासपथः | १४-१४-१४। वृहदन्त्रम् (मलाशयः) |
| ४, ४। फुस्फुसद्वयम् | १५। उत्तरगुदम् |
| ५। हृदयम् | १६। वस्तिः (मूत्राशयः) |
| ६। महाधमनी | १७। उदरच्छदा कला |
| ७। फुस्फुसगा धमनी | (विदार्य्य दर्शिता) |
| ८। महाप्राचीरिकाख्या पेशी | १८। सिराः |
| ९। यकृत् | १९। धमन्यः |
| १०। आमाशयः | २०। नाड्यः |
| (तत्पृष्ठतो दृश्यः सर्पाकारः | २१। रसायन्यः |
| अग्न्याशयः) | २२। पेश्यः |
| ११। प्लीहा | २३। रसायनीमूलस्थाः ग्रन्थयः। |

तत्रेदं विशेषतो लक्षणीयम्,—सिराः नीलाः, धमन्यो लोहिताः, नाड्यः पीताभाः, रसायन्यः सूक्ष्ममालाकाराः। ता एताः, आशयाश्च प्रायः स्वाभाविकवर्णैरेव चित्रिताः।

दृश्यतां शारीरपारिभाषिकीयाध्याये आशयादिवर्णनसंक्षेपः, तद्विस्तरश्च यथास्थानम्।

# प्रथमभागस्य विषय-सूची ।


उपोद्‌घातः

मङ्गलाचरणम् ... १

प्रथमोऽध्यायः ।

शारीरोपक्रमणीयाध्यायो नाम ३

द्वितीयोऽध्यायः ।

शारीरपारिभाषिकाध्यायो नाम ५

त्वचः ... ५

कलाः ... ६

पेश्यः ... ६

स्नायवः ... ७

सिराः ... ८

धमन्यः ... ८

रसायन्यः ... ८

नाड्यः ... ८

स्रोतांसि ... ९

धातवः ... ९

रसः ... ९

रक्तम् ... ९

लसीका ... ९

मांसम् ... ९

मेदः ... १०

वसा ... १०

अस्थीनि ... १०

मज्जा ... १०

शुक्रम् ... १०

आशयाः ... १०

शिरोगुहा ... १०

उरोगुहा ... १०

उदरगुहा ... १०

ज्ञानेन्द्रियाधिष्ठानानि ... ११

श्रोत्रे ... ११

त्वचः ... ११

नेत्रे ... ११

रसना ... ११

घ्राणे ... ११

कर्म्मेन्द्रियाधिष्ठानानि ... १२

वागिन्द्रियम् ... १२

पाणिपादम् ... १२

पायुः ... १२

उपस्थः ... १२

नवद्वाराणि ... १२

मर्म्माणि ... १२

शिरोग्रीवोपाङ्गानि ... १२

शाखोपाङ्गानि ... १२

तृतीयोऽध्यायः ।

अस्थिसामान्यवर्णनीयाध्यायो नाम १३

अस्थिसामान्यस्वरूपम्—

अस्थिविभागश्च ... १३-१४

तत्र अस्थिसंख्याने प्राचां समन्वयः १४

शाखास्थ्नां संख्या ... १५

मध्यशरीरास्थ्नां „ ... १६

शिरोऽस्थ्नां „ ... १६

चतुर्थोऽध्यायः ।

अस्थिविशेषवर्णनीयाध्यायो नाम १७

तत्र शाखास्थिविज्ञानीयः परिच्छेदः १७

अथ अधःशाखास्थीनि—

पादाङ्गुल्यस्थीनि ... १८

पादकूर्च्चास्थीनि ... २०

जङ्घास्थि ... २२

अनुजङ्घास्थि ... २३

जान्वस्थि ... २४

ऊर्व्वस्थि ... २५
अथोर्द्ध्वशाखास्थीनि—
कराङ्गुल्यस्थीनि ... २७
करकूर्चास्थीनि ... २८
प्रकोष्ठास्थिनी ... ३१
प्रगण्डास्थि ... ३४
अथ मध्यकायास्थि विज्ञानीयः परिच्छेदः
पृष्ठवंशः ... ३७
कशेरुकासामान्यलिङ्गानि ३७
ग्रीवाकशेरुकाः ... ३८
पृष्ठकशेरुकाः ... ४१
कटीकशेरुकाः ... ४३
त्रिकास्थि ... ४३
अनुत्रिकास्थि ... ४४
श्रोणिफलकम् ... ४५
- जघनकपालम् ... ४७
- कुकुन्दरास्थि ... ४७
- भगास्थि ... ४८

अंसफलकम् ... ४८
अक्षकास्थि ... ५२
उरःफलकम् ... ५३
- ग्रैवेयकम् ... ५३
- मध्यफलकम् ... ५५
- अग्रपत्रम् ... ५५

पर्शुकाः ... ५५
- सामान्यपर्शुकाः ... ०६
- विशिष्टपर्शुकाः ... ५७

उरःपञ्जरम् ... ५८
अथ शिरोऽस्थिविज्ञानीयः परिच्छेदः
शिरःसम्पुटम् ... ५८
पश्चात्कपालम् ... ५८
पार्श्वकपाले ... ६३
पुरःकपालम् ... ६५
शङ्खास्थिनी ... ६८
- शङ्खचक्रम् ... ६८
- कर्णमूलपिण्डम् ... ७०
- अश्मकूटम् ... ७०

जतूकास्थि ... ७२
झर्झरास्थि ... ७५
कपालचक्रकाणि ... ७७
मुखमण्डलास्थीनि ... ७७
नासास्थिनी ... ७७
ऊर्द्ध्वहन्वस्थिनी ... ७८
अश्रुपीठास्थिनी ... ८१
गण्डास्थिनी ... ८१
ताल्वस्थिनी ... ८४
सौरिकास्थि ... ८६
अधोहन्वस्थि ... ८७
कण्ठिकास्थि ... ९०
समग्रकरोटिदृष्ट्या विशेषाः ९२
करोटिपटलम् ... ९२
करोटिभूमिः ... ९५
- करोटिपीठम् ... ९५
- करोटितलम् ... १००

करोटिपक्षौ ... १०४
- शङ्खखातम् ... १०५
- गण्डोत्तरखातम् ... १०५
- हनुजातूकखातम् ... १०६

करोटिपुरोभागः मुखमण्डलम्
नेत्रगुहे ... १०८

नासागुहे ... १११
समग्रकरोटिहृस्थ्याः त्वाचभागाः ११४

## अथ सन्धिस्नायुखण्डम् ।

प्रथमोऽध्यायः ।

सन्धिस्नायुसामान्यविज्ञानीयोनाम ११५
सन्धिसामान्यवर्णनम् ... ११५
सन्धिप्रकारभेदाः ... ११६
कोराः ... ११६
उदूखलाः ... ११७
सामुद्गाः ... ११७
प्रतराः ... ११७
तुन्नसेवन्यः ... ११७
वायसतुण्डाः ... ११७
मण्डल-शङ्खावर्त्ताः ... ११७
सन्धिष्टष्याः विशेषाः ... ११७
सन्ध्यंशाः ... ११८
तरुणास्थीनि ... ११८
स्नायवः ... ११८
श्लेषधरकलाः ... ११९

द्वितीयोऽध्यायः ।

सन्धिविशेषविज्ञानीयो नाम ११९
अधोहनुसन्धानम् ... १२०
शिरोग्रीवसन्धयः ... १२१
पृष्ठवंशसन्धयः ... १२४
पर्शुकापृष्ठसन्धयः
पर्शुकापूर्व्वसन्धयः ... १२७
अक्षकोरःसन्धानम् ... १२८
श्रोणिचक्रसन्धयः ... १२८
श्रोणिचक्रस्य पृष्ठवंशेन १२९
श्रोणिचक्राभ्यां परस्परम् १३०
अंससन्धयः ... १३२
अंसचक्रसन्धानम् ... १३२
अंसोदूखलसन्धानम् १३३
कूर्परसन्धिः ... १३४
प्रकोष्ठान्तरीयसन्धयः ... १३५
मणिबन्धसन्धिः ... १३६
करकूर्चान्तरीयसन्धयः ... १३७
करतलसन्धयः ... १३८
कराङ्गुलिसन्धयः ... १३९
वङ्क्षणसन्धिः ... १३९
जानुसन्धिः ... १४०
जङ्घान्तरीयसन्धयः ... १४३
गुल्फसन्धिः ... १४४
पादकूर्चान्तरीयसन्धयः ... १४५
पादतलसन्धयः ... १४७
पादाङ्गुलिसन्धयः ... १४७

# चित्र-सूची।

## पुरश्चित्रम्—( ग्रन्थारम्भे )


| | | | | | |
|---|---|---|---|---|---|
| कङ्कालचित्रम् ( प्रथमम् ) | | १४ | पश्चात्कपालम् ( पुरस्तलम् ) | | ६० |
| कङ्कालचित्रम् ( द्वितीयम् ) | | १६ | पश्चिमकपालम् ( पृष्ठतलम् ) | | ६२ |
| पादास्थि | ... | १८ | पार्श्वकपालम् ( आभ्यन्तरतलम् ) | | ६४ |
| जङ्घास्थि | ... | २२ | पुरःकपालम् ( बहिस्तलम् ) | | ६६ |
| जान्वस्थि | ... | २४ | पुरःकपालम् ( अन्तस्तलम् ) | | ६७ |
| ऊर्व्वस्थि | ... | २५ | शङ्खास्थि ( बहिस्तलम् ) | | ६८ |
| पाणिपुरोभागः | ... | २७ | शङ्खास्थि ( अन्तस्तलम् ) | | ७० |
| प्रकोष्ठास्थिनी | ... | ३१ | जतूकास्थि ( ऊर्द्ध्वतलम् ) | | ७३ |
| प्रगण्डास्थि | ... | ३४ | झर्झरास्थि | ... | ७६ |
| पृष्ठवंशः | ... | ३७ | नासास्थिनी | ... | ७७ |
| पृष्ठकशेरुका | ... | ३८ | ऊर्द्ध्वहन्वस्थि ( बहिस्तलम् ) | | ७८ |
| ग्रीवाकशेरुका | ... | ३९ | ऊर्द्ध्वहन्वस्थि ( अन्तस्तलम् ) | | ७९ |
| चूड़ावलया | ... | ३९ | अश्रुपीठास्थि | ... | ८१ |
| दन्तचूड़ा | ... | ४० | गण्डास्थि ( बहिस्तलम् ) | | ८२ |
| महाकण्टकिनी | ... | ४१ | गण्डास्थि ( अन्तस्तलम् ) | | ८२ |
| पृष्ठकशेरुका ( पार्श्वतो दृष्टा ) | | ४१ | ताल्वस्थि | ... | ८४ |
| विशिष्टाः पृष्ठकशेरुकाः | ... | ४२ | सीरिकास्थि | ... | ८६ |
| त्रिकास्थि | ... | ४३ | अधोहन्वस्थि | ... | ८८ |
| अनुत्रिकास्थि | ... | ४४ | कण्ठिकास्थि | ... | ९१ |
| श्रोणिफलकम् | ... | ४६ | करोटिपटलम् | ... | ९३ |
| अंसफलकम् | ... | ५० | करोटिपीठम् | ... | ९६ |
| अक्षकास्थि | | ५२ | करोटितलम् | ... | १०२ |
| उरःफलकमुपपर्शुकाश्च | ... | ५४ | करोटिपक्षः | ... | १०५ |
| पर्शुका ( सामान्यतः ) | | ५६ | मुखमण्डलम् | ... | १०७ |
| विशिष्टपर्शुकाः | | ५७ | नासागुहा | ... | ११२ |
| करोटिः | | ५९ | अधोहनुसन्धानम् | ... | १२० |

| | | | | | |
|---|---|---|---|---|---|
| शिरोग्रीवसन्धि: ( पुरस्तलम् ) | | १२२ | मणिबन्धसन्धि: | ... | १३६ |
| शिरोग्रीवसन्धि: ( पृष्ठतलम् ) | | ११३ | वङ्क्षणसन्धि: | ... | १४० |
| पर्शुकापूर्वसन्धय: | ... | १२७ | जानुसन्धि: | ... | १४१ |
| पर्शुकोर:सन्धय: | ... | १२८ | जानुसन्धेरभ्यन्तरम् | ... | १४२ |
| श्रोणिचक्रसन्धय: | ... | १३१ | गुल्फसन्धि: | | १४४ |
| अंससन्धय: | ... | १३३ | पादतलस्था: स्नायव: | | १४६ |
| कूर्परसन्धि: | .. | १३४ | | | |

# प्रत्यक्षशारीरम् ।

## ओं नम आयुर्व्वेदाचार्य्येभ्यः ।

कालिन्दीजलनीलिम्नो[1] नीलं ज्योतिरुपास्महे[2] ।
यद्भासं[3]दनुभासन्ते ज्योतींषि[4] च जगन्ति च ॥ १ ॥

वैद्यविद्या-महाम्भोधि-पारङ्गत-महाधियम् ।
विद्याकल्पद्रुमं तातं विश्वनाथं गुरुं नुमः ॥ २ ॥

यदन्तरगतं[5] महः परमहर्षिबोधोज्ज्वलम्
विराट्पुरुषधामजि[6]न्निखिलरोदसी[7] व्यानशे[8] ।
विलोप-परकल्पना[9]-जलदजाल-मन्दप्रभो
न कस्य विषयः शुचां स इह वैद्यविद्यारविः ? ॥ ३ ॥

आत्रेयादिमहर्षिभिर्निजतपःप्रज्ञा[10]नदीप्तेक्षणै-
दुर्ज्ञेयान्यपि[11] चेत्करामलकवत्तत्त्वानि संजज्ञिरे[12] ।
सुज्ञेयं करणैः[13] पुरो नयनयोर्दीप्यमानं तनोः
स्थूलं तत्त्वमपास्य[14] हन्त भिषजम्मन्या न लज्जेमहि[15] ? ॥ ४ ॥

---

१ यमुनाजलनीलतायाः सारभूतमिति शेषः । यद्वा कालिन्दीजलस्य नीलिमेव नीलिमा यस्य तादृशस्य । २ श्रीकृष्णरूपमिति फलितार्थः । ३ प्रकाशमानं । ४ सूर्य्यचन्द्रादीनि । तथाच श्रुतिः—"तमेव भान्तमनुभाति सर्व्वं तस्य भासा सर्व्वमिदं विभाति ।" ५ यस्य अभ्यन्तरगतं तेजः । ६ सहस्रशीर्षा विष्णोस्तेजःस्पर्द्धि, तथाचोक्तं—"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती"त्यादि । ७ समग्रद्यावापृथिव्यौ । ८ व्याप । ९ विलोपः—अग्निवेशसुश्रुतौपधेनवौरभ्रादिमहर्षिप्रणीतमूलग्रन्थानामनासादनं, परकल्पनाः—नानानार्षजनोद्भावित-प्रक्षिप्तमतादीनि । १० प्रज्ञानं परमज्ञानं, तपःप्रज्ञानाभ्यामुन्मीलितदिव्यदृष्टिभिः । ११ पारलौकिकान्यपि किमुत ऐहिकानि । १२ सम्यग् ज्ञातानि । १३ इन्द्रियैः । १४ शारीरं तत्त्वमज्ञात्वैव । १५ न लज्जेमहीति काकुः ।

प्राच्य[1]प्रतीच्यगुरुसङ्गमुपाश्य तस्मात्
तत्तद्भिषग्जनवचांसि विचार्य्य सम्यक् ।
प्रत्यक्ष[2]दृष्टनिखिलार्थकमद्य शास्त्र-
मुद्योतयन्न भवितास्मि विगीतकर्म्मा[3] ॥ ५ ॥

प्राचां गिरः शिरसि नोऽथ तदीयशैली
प्रायः पवित्रयति पद्धतिमस्मदीयाम् ।
भागीरथीव्यतिकरैः[4] कुरुते महिम्ना
रथ्यापयोऽतिमलिनं विमलं क्षणेन ॥ ६ ॥

प्राचां विरोध[5] इह नास्ति, कु[6]तोऽथ भाति,
प्रत्यक्षवस्तुविषये सहनीय एषः ।
आर्षे निबन्धृशतकृष्ट[7]वचोभिमृष्टे
शास्त्रेऽपि शस्यतुषभेदविदो[8] विदः[9] स्युः ॥ ७ ॥

धान्वन्तरीयमतमाकुलतामुपेतं
स्वच्छं पुनर्विदधता मृतकान् परीक्ष्य ।
अग्रन्थि[10] सम्प्रति मया नवको निबन्धो
बोद्धा श्रमस्य यदि तं शिरसा नमामि ॥ ८ ॥

तनुमतिरपि गुरुकरुणां गणनाथः सोऽयमाश्रयन् शरणम् ।
रचयति शरीरतत्त्व-प्रत्यक्षीकरणकारणं दीपम् ॥ ९ ॥

क्षमध्वमिह दोषांश्च[11] चिनुध्वं गुणलेशकान्
आद्रियध्वञ्च यत्सत्यं प्रत्यक्षे[12] को नु संशयः ? ॥ १० ॥

---

१ पृथिव्यां प्राच्याः भारतवर्षीयाः, पाश्चात्या यूरोपीयाः २ शवच्छेदादिना प्रत्यक्षीकृतसमस्ततत्त्वम् । ३ निन्दितकर्म्मा । ४ सम्पर्कैः । ५ यतः अनार्षजनप्रमादादिजन्य एव दृश्यते लभ्यमानग्रन्थेषु शारीरवस्त्वर्थ-व्याकुलीभावः । दृश्यतामुपोद्घातः । ६ यथा सिराधमन्यादिशब्देषु । ७ निबन्धॄणां शतैः प्रक्षिप्तानि यानि व्याकुलार्थानि वचांसि तैर्दूषिते । ८ इदं शस्यं ग्राह्यमिदन्तुषन्त्याज्यमिति भेदज्ञाः । ९ पण्डिताः । १० व्यरचि । ११ क्वचित् प्रसिद्धभान्तमतविरुद्धकथनादीन्, दुस्तरेऽस्मिन् शास्त्रे स्खलितानि च । १२ तत्रापि सकलजन-साधारणे स्थूलप्रत्यक्षे । उक्तञ्च केनचित्—"अध्यापयन्ति यदि दर्शयितुं क्षमन्ते शिष्यास्त एव गुरवो गुरवस्त एव" इति । अप्रत्यक्षीकृतशारीरतत्त्वाः केचन चेदत्रापि विवदेरन्, का गतिः ?

# प्रत्यक्षशारीरम् ।

## प्रथमोऽध्यायः ।

अथातः शारीरोपक्रमणीयमध्यायं* व्याख्यास्यामः ।

इह खलु शरीर-मनः-शरीरि[१]-समवायः पुरुष इत्युच्यते, तद्दुःखसंयोगा[२]श्च व्याधय इति । दुःखसंयोगश्चासौ द्वेधा समुत्पद्यते, शरीरव्यतिक[३]रेण मनोव्यतिकरेण चेति । तत्र शरीराधिष्ठा[४]ना व्याधयः शारीरैरुपचारैरुपक्रान्ताः प्रतिनिवर्त्तन्ते, मनोऽधिष्ठा[५]नाश्च भूम्ना[६] तथैव, अपरैश्च समा[७]धिसान्त्वादिभिरुपायैः प्रायेण शरीरद्वार[८]प्रयुक्तैः । तस्मात् व्याध्यायतनमिति चिकित्साधिष्ठानमिति च कृत्वा शरीरमेवादौ भिषजां विजिज्ञा[९]सितव्यं भवति । आहुश्च प्राञ्चः—"शरीरविचयः[१०] शरीरोपकारार्थमिष्यते, भिषग्विद्येयम् । ज्ञाते हि शरीरतत्त्वे शरीरोपकारकेषु भावेषु ज्ञानमुत्पद्यते । तस्मात् शरीरविचयं प्रशंसन्ति कुशलाः"—इति ( च. शा. ६ अ. ) ।

इतश्चेदं शरीरं मातापित्रोरान्तरभावभाविता[११]दृष्टविशेषाकृष्टशुक्रशोणितसंयोगादुद्भूयमानं क्रमशस्तैस्तैरवस्था[१२]-विशेषैरभिव्यज्यमानस्वरूपं रसादिशुक्रान्तधातूनामनेकाशयसिराधमन्यादीनाञ्चाधारभूतमभिसम्पद्यते प्राणायतनं नाम । प्राणा हि शरीरमाश्रित्य म्रियन्ते[१३] । तस्मात् प्राणान् रक्षितुकामेन शारीरं ज्ञानमवश्यमन्वेष्टव्यं भवति ।

---

* शारीरस्योपक्रमणमारम्भः तदधिकृत्य कृतम् ( छप्रत्ययः ) एवमग्रेऽपि । १ शरीरी आत्मा, समवायः समष्टिः । तथाह चरकः "सत्त्वमात्मा शरीरञ्च त्रयमेतत्त्रिदण्डवत् । लोकस्तिष्ठति संयोगात्तत्र सर्व्वं प्रतिष्ठितम् ।" २ अयं सुश्रुतस्यानुवादः (सु. सू. १ अ.) तस्मिन् पुरुषे ये दुःखसंयोगास्ते । ३ सम्पर्केण । ४ शारीराः । ५ मानसाः । ६ प्राचुर्य्येण । ७ समाधिश्चित्तैकाग्रम्, सान्त्वं मधुरवचः । ८ "समं कायशिरोग्रीवं धारयन्नचलं स्थिरः । संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्" इत्यादिभगवदुक्तरीत्येति भावः । ९ विशेषेण ज्ञातुमीप्सितम् । १० अङ्गविनिश्चयविद्या । ११ गर्भाधानकाले यथा यथा पित्रोरान्तरा भावास्तथा तथा गर्भस्यापि सम्भवन्ति, अदृष्टविशेषतश्च तस्मिंस्तस्मिन् काले गर्भसम्भवः । १२ कललाद्यवस्थाविशेषैरित्यर्थः । तथाहि सुश्रुतः—"प्रथमे मासि कललं जायते" ( सु. शा. ३ अ. ) इत्यादि । १३ तिष्ठन्ति ।

द्विविधः पुनरस्य शरीरस्य विज्ञानोपायो भवति,—बाह्य आभ्यन्तरश्च। तत्र बाह्यः पञ्चभिरिन्द्रियैर्विशेषतस्तु चक्षुषा नानाविधयन्त्रादिसहकृतेन[1] जीवच्छरीरं मृतकशरीरञ्च समभिवीक्ष्य प्रयुज्यमानो ज्ञानमुत्पादयति। आभ्यन्तरस्तूपायस्तपोज्ञानर्द्धिसमृद्धै[2]राश्रीयमाणो[3] ज्ञानचक्षुःसाधनः स्थूलेन्द्रिय-प्रयत्नमन्तरेणैव सर्वमपि सूक्ष्मानुसूक्ष्ममपि प्रकाशीकरोति। सोऽयमुत्तर उपायो योगिभिरेव शक्यः प्रयोक्तुं नास्मादृशैरिति बाह्यमुपायमाश्रित्य वक्ष्यामः।

तथाच सुश्रुतः—"तस्मात् समस्तगात्रमविषोपहतमदीर्घव्याधिपीड़ित-मवर्षशतिकं निःसृष्टान्त्रपुरीषं पुरुषमवहन्त्यामापगायां निबद्धं पञ्जरस्थं मुञ्ज-वल्कलकुशशणादीनामन्यतमेनावेष्टिताङ्गमप्रकाशे देशे कोथयेत्[4]। सम्यक् प्रकु-थितञ्चोद्धृत्य देहं सप्तरात्रादुशीरवालवेणुवल्कलकुर्च्चीनामन्यतमेन[5] शनैः शनै-रवघर्षयंस्त्वगादीन् सर्व्वानेव बाह्याभ्यन्तराङ्गप्रत्यङ्गविशेषान् यथोक्तान् लक्षये-च्चक्षुषेति[6]" (सु. शा. ६ अ.)।

तदेतत् खलु षड़ङ्गं शरीरं शरीरविदो भाषन्ते। अङ्गानि चास्य "शाखा-श्चतस्रो मध्यं पञ्चमं षष्ठं शिरश्चेति[7]"—(सु. शा. ५ अ.)।

तत्र ग्रहणधारणस्थूणा[8]र्नचलनादिसहाया: शाखाश्चतस्रः—द्वौ बाहू, द्वे च सक्थिनी। शोणितसंवहनश्वसनान्नविपाचनमूत्रोच्चारविभजनाद्याशयाधारो मध्यं, प्रकाण्ड इव महीरुहस्याश्रयः शिरसः शाखानाञ्च। श्वासान्नद्वारयोर्मुख[9]-मण्डलस्य चाधिष्ठानं, संज्ञावहचेष्टावहानां नाड़ीनां[10] बुद्धीन्द्रियाणाञ्च मूलाधिष्ठानं शिरः, तद्धि ज्ञानायतनमुत्तमाङ्ग[11]माहुः मस्तिष्काधारत्वात्। मस्तिष्कं हि

१ अणुवीक्षणादिसूक्ष्मदर्शनयन्त्रसहायेन। तथाहि—सिराधमनीरसायनीनां सूक्ष्माणि जालकानि मस्तिष्क-सुषुम्नादिगता विशेषाश्च अणुवीक्षणयन्त्रादिमृते न सम्यक् वेत्तुं शक्याः। २ दिव्यज्ञानसम्पन्नमहर्षिभिः। ३ प्रयुज्यमानः। ४ गलितं कुर्य्यात्। ५ कूंचीति भाषायाम्। ६ स्थूलोऽयमुपायः सर्व्वथा सर्व्वानेव विशेषान्न दर्शयितुं क्षमः। पाश्चात्यनये तु कोथनिवारणैरुपायैरभिरक्षिते शरीरे ते ते विशेषाः सूक्ष्मानुसूक्ष्माः स्पष्टं परिदृश्यन्ते चक्षुषा। अस्थिविशेषास्तु निर्मांसकङ्काल एव सम्यक् ज्ञायन्ते। ७ चरके तु शिरोग्रीवमिति गृह्यते, मध्यं मध्यकायः, चरकेऽस्यैवान्तराधिसंज्ञा। ८ स्थूणाः स्तम्भाः तत्कर्म्मकरणमवलम्बनम्। ९ शकृत्। १० द्विविधा नाड्यः, संज्ञावहाश्चेष्टावहाश्च। तत्र संज्ञा-वहाः—शब्दादीन् विषयान् मस्तिष्काभिमुखं वहन्ति, येन तत्तद्विषयग्रहणं भवति। चेष्टावहास्तु—मस्तिष्कत-श्चेष्टाप्रवर्त्तकान् वेगानादाय पेशीः क्रियावतीः कुर्व्वन्ति। ११ अत एव वाग्भटः—"ऊर्द्ध्वमूलमधःशाख-मृषयः पुरुषं विदुः। मूलप्रहारिणस्तस्मात् रोगान् शीघ्रतरं जयेत्॥ सर्व्वेन्द्रियाणि येनाऽस्मिन् प्राणा येन च संश्रिताः। तेन तस्योत्तमाङ्गस्य रक्षायामादृतो भवेत्॥" (वाग्भट. उत्तरस्थान २४ अ.)।

नाम सर्व्वज्ञानाकरतया मन्यन्ते परीक्षकाः। सोऽयं षडङ्गस्य देहस्य परिचयो भवति वीजरूपो यमधिकृत्य विस्तारोऽत ऊर्द्धम्।

भवन्ति चात्र—

"शरीरं सर्वदा सर्वं सर्वथा वेद यो भिषक्।
आयुर्व्वेदं स कार्त्स्न्येन वेद लोकसुखप्रदम्॥" (च. शा. ६ अ.)
"शरीरे चैव शास्त्रे च दृष्टार्थः स्याद्विशारदः।
दृष्टश्रुताभ्यां सन्देहमवापोह्याचरेत्[1] क्रियाः॥
प्रत्यक्षतो हि यद् दृष्टं शास्त्रदृष्टञ्च यद् भवेत्।
समासतस्[2]तदुभयं भूयो ज्ञानविवर्द्धनम्॥" (सु. शा. ६ अ.)

---

# द्वितीयोऽध्यायः।

अथातः शारीरपारिभाषिकीय[3]मध्यायं व्याख्यास्यामः॥

त्वचः, कलाः, पेश्यः, स्नायवः, सिराः, धमन्यो, रसायन्यो, नाड्यो, धातवो रसादिशुक्रान्ताश्चेति शारीरोपादान[4]समुच्चयः। आशयाः श्वसनान्नविपाचनादिक्रियाकरा बहवः। पञ्च ज्ञानेन्द्रियाधिष्ठानानि[5]। पञ्च कर्म्मेन्द्रियाधिष्ठानानि। नव द्वाराणि। ललाटभ्रूगण्डादीनि चोपाङ्गानि—इति प्रत्यङ्गावयवसमासः। तत्र—

**त्वचो नाम**—सर्व्वदेहावरणरूपा भूमिः स्पर्शेन्द्रियस्य[6], स्रोतसाञ्च स्वेदवहानां, रोम्नामपि सरोमकूपानाम्। ताः स्थूलदृष्ट्या स्तरद्वयविभक्ताः,—

---

१ दूरीकृत्य। २ समुच्चयतः। ३ शारीरशास्त्रे वक्ष्यमाणे या याः संज्ञाः प्रयोक्तव्याः तासां परिभाषा अवश्यमेवादौ वक्तव्या, अन्यथा प्रचलितार्थेषु तेषां प्रयोगाननुसृत्य व्याकुलीकुर्य्युरर्थान् शिष्या इत्यभिप्रायेणोपक्रम्यतेऽयमध्यायः। ४ न खल्वमी उपादानानि उपादानकारणानि, किन्तु उपादानवत् शरीरनिष्पादकानि। ५ श्रोत्रत्वङ्नेत्ररसनाघ्राणाख्यानि। कर्म्मेन्द्रियाधिष्ठानानि वाक्पाणिपादपायूपस्थानि। यानि तु लोके निर्दिश्यन्ते इन्द्रियाणीति तानि हि इन्द्रियाधिष्ठानानि। इन्द्रियाणि त्वतीन्द्रियाणि। ६ स्पर्शेन्द्रियाधिष्ठानमित्यर्थः। भूमिपदेन परतोऽपि सम्बन्धः।

बहिस्त्वग्भागोऽन्तस्त्वग्भागश्चेति। तत्र बहिस्त्वङ् नामातीव तन्वी कृष्णगौरादिवर्णाधारा वह्निस्पर्शेण स्फोट[1]पिड़काव्यञ्जना च। अन्तस्त्वङ् नाम स्थूला शरीराभिरक्षिणी स्नेहादिकर्षणी च। सैव प्रधानायतनं स्पर्शस्य स्वेदस्रुताञ्च मार्गाणाम्।

प्राञ्चस्तु सूक्ष्मदृष्ट्या चीरस्येव सन्तानिकाः सप्त षड्[2] वा त्वचो मन्यन्ते। तासु प्रथमा अवभासिनी नाम, तस्या बाह्यत्वग्भागेनाभेदः। अपरासान्तु अन्तस्त्वग्भागेऽनुप्रवेशः।

**कला नाम**—सूक्ष्मकौषेयवासःसमाकारा नानाविधसंस्थाना मांसस्यास्थ्नः आशयानाञ्च सर्वेषामन्तर्बहिरावृत्य तिष्ठन्ति, यथादेशकर्म्म संज्ञाञ्च लभन्ते। ताः "धात्वा[3]शयान्तरमर्य्यादा"—इति पूर्व्वे (सु. शा. ४ अ.)। आहुश्च—

> "स्नायु[4]भिश्च प्रतिच्छन्नान् सन्ततांश्च जरायुणा।
> श्लेष्मणा वेष्टितांश्चापि कलाभागांस्तु तान् विदुः॥" (सु. शा. ४अ.)

कलाविशेषांस्तु तत्र तत्र वक्ष्यामः।

**पेश्यो नाम**—प्राणभृतां सकलचेष्टा[5]साधनानि। ताः मांसमय्यः

---

१ वह्निदाहेन या श्लेषपिड़का समुदेति तया व्यज्यते तन्वी बहिस्त्वक् पृथगेवान्तस्त्वच इति। २ षड़िति चरकमतं, सप्तेति सुश्रुतस्य (सु. शा. ४ अ.)। पाश्चात्यमतेऽप्येवमणुवीक्षणयन्त्रदृश्यञ्च। सन्तानिका स्तरः। अवभासिनीति सुश्रुतोक्ता संज्ञा, चरकमते प्रथमा उदकधरा नाम। कृष्णगौरादिवर्णाधारत्वात् अवभासिनी, श्लेषपिड़कायां जातायामुदकेन तां पूरयतीति उदकधरा वा। ता एतास्त्वचः षड़ङ्गं शरीरमवतत्य तिष्ठन्ति। ३ धातवो—रसादीन्याधेयानि, आशया आमाशयाद्या आधाराः, तेषामन्तरे मध्ये मर्य्यादाः व्यवधायिकाः तत्तदाशयानामन्तरावरण्यः सूक्ष्मपटरूपाः। इह धातव आशयाश्चेत्युपलक्षणमाधेयाधारार्थकं पदद्वयम्। तेनामाशयादौ ध्रियमाणस्यान्नादेरपि ग्रहणं, तथाच आमाशयान्तरावरणी या कला सैव तत्र व्यवधायिनी सेयं भुक्तधरा नाम, अस्थ्यन्तरावरणभूता या कला साऽसौ मज्जधरा नामेति दिक्। तदेतदुच्यते—"धात्वाशयान्तरमर्य्यादा" इति। पूर्व्वे—धन्वन्तरिप्रमुखाः। ४ स्नायुभिः तदाख्यैः शुभ्रसूक्ष्मसूत्रैः। प्रतिच्छन्नान् परस्परानुप्रवेशेन निष्पन्नान्। जरायुः सूक्ष्मजालकं तेन सन्ततान् व्याप्तान्। श्लेष्मणा श्लेषकाख्येन तरलपिच्छिलपदार्थेन वेष्टितान् स्नपितान्। तथाच सूक्ष्मकौषेयवासःसदृशाः कला इति फलितोऽर्थः। [कलाः = Membranes.] ५ सकलचेष्टासाधनानि सकलचेष्टानां साधनभूतानि। चेष्टाप्रवृत्तिस्तु मस्तिकतश्चेष्टावहनाड़ीराश्रित्य भवति, ताश्च नाड्यः पेशीरनुप्रविष्टा नियमेन। तथाच चेष्टाप्रवृत्तेः समागतायाः साधनभूता अधिष्ठानभूता वा पेश्यः। मांसमय्यः—मांसोपादानाः. . हि मांसं नाम पेशीतः किञ्चित् पृथगस्ति।

स्वरूपेण प्राय: स्थूलमध्या रज्ज्वाकारा: क्वचित् प्रच्छदाद्याकाराश्च[1] । ता: द्विविधा: स्वतन्त्रा: परतन्त्राश्च क्रियावैशेष्यात्[2] । तत्र परतन्त्राणां प्राय: सर्व्वासामेव पेशीनामेकैकस्या द्वावन्तौ प्रायेण रजतवर्णावस्थिनिबद्धौ चोभयत:[3] । आकुञ्चन-प्रसारणाभ्याञ्च पेशीनां नानाविधचेष्टाभिनिर्वृत्ति: । रज्ज्वाकाराणान्तु पेशीनां शुभ्रमसृणदृढ़प्रान्तभागा: कण्डरा[4] इत्युच्यन्ते । ता: स्वरूपत: स्नायुनिर्म्मिता रजतशुभ्रा बहुभारसहाश्च । तासां पेशीष्वेव स्नायुष्वेव वाऽनुप्रवेश: । "स्नायवो वृत्ता: कण्डरा भवन्ती"ति हि प्राञ्च: (सु. शा. ५ अ.) ।

**स्नायवो नाम**—सान्द्रमसृणशणगुच्छसमाकारा: सन्धिबन्धनार्थां: प्रायेण । स्नायुशब्देनैव द्वयोरर्थयोर्दृश्यते प्रयुक्त:—स्नायुसंहतौ स्नायुव्यक्तिषु च । तत्र प्रथम: अस्थिसन्धिबन्धनरूपोऽर्थ:, स मुख्य:—"प्रतानवतीभिर्हि स्नायुभिर्दृढ़ीकृता: सन्धय"—इति पूर्व्वाचार्य्योक्ते: । अथ द्वितीय: स्नायुव्यक्तिरूपोऽर्थ:, स गौण: । सोऽयं स्नायुशब्देन शणसूत्रवत् दृढ़शुभ्रसूक्ष्मसूत्राण्यभिधत्ते । तथाहि कलासु कण्डरासु पार्श्वपृष्ठोर:पेश्यन्तेषु आमाशयपक्वाशयवस्त्यन्तभागेषु च दृश्यते य: स्नायुशब्द: प्रयुक्त: पूर्व्वै: सोऽस्मिन्नेवार्थे । आहुश्च—

"स्नायुश्चतुर्विधा विद्यात्तास्तु सर्वा निबोध मे ।
प्रतानवत्यो वृत्ताश्च पृथ्व्यश्च शुषिरास्तथा ॥
प्रतानवत्य: शाखासु सर्वसन्धिषु चाप्यथ ।
वृत्तास्तु कण्डरा: सर्व्वा विज्ञेया: कुशलैरिह ॥
आमपक्वाशयान्तेषु वस्तौ च शुषिरा: खलु ।
पार्श्वोरसि तथा पृष्ठे पृथुलाश्च शिरस्यथ ॥

---

१ प्रच्छदाद्याकारा:—यथा ललाटसङ्कोचनी पेशी, सेयं प्रच्छदवदास्तृता शिरश्छादयति । २ क्रियावैशेष्यञ्चेहेदम्—चलनादिनिर्म्मापिकानां पेशीनां क्रियासु नास्मदिच्छाया: प्रभुता, स्वतन्त्रा हि खल्वेता: । करसञ्चालनादिकरीणां पेशीनां क्रियास्त्वस्मदिच्छाधीना: अत एव ता: परतन्त्रा: । ३ एकैकत: अस्थिप्रदेशविशेषे दृढ़निबद्धौ, तथाच पेश्या: सङ्कोचे सति अस्थिविशेषैकदेशाकर्षणेन अवयवविशेषस्य चेष्टाविशेष: । चेष्टाभिनिर्वृत्ति:—चेष्टानिष्पत्ति: । ४ कण्डरा: = Tendons. ५ पेश्यवयवत्वात् पेशीषु, स्नायुनिर्म्मितत्वात् स्नायुषु वा । ६ हन्त तावदयं स्नायुशब्दो वङ्गभाषायां कदाचित् केषाञ्चिद्भ्रान्तप्रयोगदर्शनात् नाड्यर्थे (*To imply Nerves*) प्रयुज्यते बहुश: । तथाच न भ्रमितव्यम् । न खल्वेष स्नायुशब्द: कदाचिदपि कथञ्चिदपि संज्ञावहचेष्टावहनाड़ीरूपमर्थं प्रकाशयति । यश्च तावच्छास्त्रे जातिव्यक्तिरूपो द्विविधोऽर्थो दर्शित: स युक्त एव यथा तृणशब्दस्तृणविशेषे तृणजातौ च प्रसिद्धो यथा च लोहमृगादयोऽपि शब्दा: । (स्नायु: = Ligament or Fibrous tissue.)

> नौर्यथा फलकास्तीर्णा बन्धनैर्बहुभिर्वृता।
> भारक्षमा भवेदप्सु नृयुक्ता सुसमाहिता॥
> एवमेव शरीरेऽस्मिन् यावन्तः सन्धयः स्मृताः।
> स्नायुभिर्बहुभिर्बद्धास्तेन भारसहा नराः॥" (सु. शा. ५ अ.)

**सिरा नाम**[1]—अविशुद्धशोणितवहाः सर्व्वदेहगाः प्रणाल्योऽस्मिन् शास्त्रे। ताभिः शरीरप्रचारान्मलिनीभूतं शोणितमभिप्रवर्त्तते हृदयाभिमुखम्। निखिलदेहव्याप्तानामपि तासां मिलितानामाश्रयो हृदयं समुद्र इवापगानाम्।

**धमन्यो नाम**—विशुद्ध[2]शोणितवहाः सर्वदेहगाः प्रणाल्योऽस्मिन् शास्त्रे। तासां मूलं हृदयं, तद्धि धमनीद्वारेण सर्वत्र शरीरे शोणितं धमति विक्षिपति वा। ताभिर्जीवरक्तवाहिनीभिः केदार इव कुल्याभिरभिप्रीयते शरीरम्।

**रसायन्यो[3] नाम**—लसीकाख्यतन्वच्छरसवाहिन्यः प्रणाल्यः निखिलदेहप्रसृताः, कक्षावंक्षणगलादिषु प्रदेशेषु गुञ्जानिम्बफलाद्याकारैर्ग्रन्थिभिरनुविद्धा[4]श्च।

**नाड्यो [5]नाम**—मृदुसूक्ष्मसूत्रसंघातमय्यो नीरन्ध्रास्तन्त्रयोऽस्मिन् शास्त्रे। ताश्च समाश्रित्य संज्ञाचेष्टयोरभिप्रवृत्तिः। तासां भगवान्वायु[6]रधिष्ठाता। विभुरचिन्त्यशक्तिरखिलान् शब्दादीन्विषयानादत्ते प्रवर्त्तयति च नानाविधाश्चेष्टाः क्रमेण संज्ञावहाश्चेष्टावहाश्च नाड़ीरधिष्ठाय। तासां च निखिलानां मूलं मस्तिष्कं सुषुम्नाकाण्डश्च।

---

१ सिराधमनीशब्दयोरस्मिन् शास्त्रे विशिष्टार्थयोर्निरोधः, अन्यथा लभ्यमानचरकसुश्रुतादिषु प्रतिसंस्कर्त्तृप्रयोगाननुसृत्य व्याकुलीकुर्य्युरर्थानविशेषविदः। एतत्प्रासङ्गिको विचारस्तु उपोद्घाते सविस्तरं द्रष्टव्यः। [सिराः = Veins ; धमन्यः = Arteries]। २ शरीरप्रचारान्मलिनीभूतं हि शोणितं फुस्फुसप्रचारेण प्राणवायुसमानीत-विषघ्नपदार्थ (Oxygen)-संयोगात् शुद्धीभूतं हृदयन्त्रेण विक्षिप्यते सर्वतो धमनीभिः। ३ [रसायन्यः—Lymphatics] रसायनीति चरककृतेयं संज्ञा (च. वि. ५ अ.)। ४ व्यामाः। ५ नाड़ीशब्दस्येह तन्त्रशास्त्रोक्तार्थे निरोधः। ताश्च नाड्यो विद्युद्वहधातुमयसूत्रवत् रन्ध्रहीनास्तन्तवः। तासु काश्चित् शब्दादिसंज्ञाः प्रापयन्ति मस्तिष्काभिमुखं, ताः संज्ञावहा नाम। अपरास्तु मस्तिष्कतो बहिर्मुखं नयन्ति चेष्टावेगविशेषान्, ता एताश्चेष्टावहा नाम। (नाड्यः = Nerves) ६ स चायमचिन्त्यशक्तिर्वायुर्नाम येन समुत्पाद्यन्ते अन्तर्मुखा बहिर्मुखाश्च वेगाः। अत एव चरकः "वायुस्तन्त्रयन्त्रधरः, प्राणोदानसमानव्यानापानात्मा, प्रवर्त्तकश्चेष्टानामुच्चावचानां, नियन्ता प्रणेता च मनसः, सर्वेन्द्रियाणामुद्योतकः, सर्वेन्द्रियार्थानामभिवोढे"त्यादि (च. सू. १२ अ.)।

सर्व्वासाञ्चासां विस्तरं यथास्थानं वक्ष्यामः।

[ स्रोतांसीति—तु शरीरमार्गाणां साधारणी संज्ञा। तथाहि चरकः—"स्रोतांसि खलु परिणाममापद्यमानानां धातूनामभिवाहीनि भवन्त्ययनार्थे" इति ( च. वि. ५ अ. )। ]

**धातवो नाम**—प्रीणन-जीवन-चालन--स्नेहन-धारण-गर्भोत्पादनादिकराणि शरीरोपादानानि। ते सप्तसंख्याः। "रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः" इति। तत्र—

**रसो नाम**—चतुर्विधस्य षड्रसस्य द्विविधवीर्य्यस्याहारस्य सम्यक्परिणतस्य तेजोभूतः सारः सौम्यः। "रस गतौ धातुरहरहर्गच्छतीति[1] रसः।" स खल्वाप्यो रसो भुक्तमार्गस्थैरतिसूक्ष्मैः स्रोतोभिराकृष्यमाणो यकृत्प्लीहानौ प्राप्य पाकरागावुपैति रक्तसंज्ञाञ्चानन्तरं लभते। भवति चात्र—

"रञ्जितास्तेजसा त्वापः शरीरस्थेन देहिनाम्।
अव्यापन्नाः प्रसन्नेन रक्तमित्यभिधीयते॥" (सु. सू. १४ अ.)

**रक्तं नाम**—सकलधातुप्रीणनः सारः शरीरस्य रस एव रञ्जकाख्येन पित्तेन तथा विपरिणमितः। तस्य च संग्रहणप्रेरणस्थानं[2] हृदयम्, तद्धि हृदयादेव धमनीरनुप्रविश्य कृत्स्नं शरीरमहरहस्तर्पयति वर्द्धयति धारयति जीवयति यापयति च। मलिनीभूतञ्च तत् शरीरप्रचारात्, सिराभिः प्रविशति हृदयमेव पुनः शुद्ध्यर्थं फुस्फुसगमनाय।

[ लसीका[3] तु—शोणितस्यैव तन्वच्छजलभागो रसायनीषु प्रचरिष्णुः सर्व्वधातुपोषणी। तस्याः शोणित एव रस एव वान्तर्भावः। ]

**मांसं नाम**—पिशीनासुपादानधातुर्मृदुलोहिततन्तुमयो जलौकाशरीरवत् सङ्कोचप्रसरणशीलः।

---

१ "रसवहानां स्रोतसां हृदयं मूलम्" (च. वि. ५ अ.) तेन विधम्यते रसात्मकमोजः ( शुद्धशोणितं ) सर्व्वत्र शरीरे। तथाह चरकः—"तेन मूलेन महता महामूला मता दश। ओजोवहाः शरीरेऽस्मिन् विधम्यन्ते समन्ततः।" (च. सू. ३० अ.) तच्च शरीरप्रचारान्मलिनीभूतं पुनरभिप्रपद्यते हृदयं शुद्ध्यर्थं फुस्फुसगमनाय। तस्मादुच्यते, "अहरहर्गच्छती"ति। २ तथाच सुश्रुतः—"तस्य च हृदयं स्थान"मित्यादि। (सु. सू. १४ अ.) चतुःप्रकोष्ठं च हृदयम्, तद्विवरणमग्रे वक्ष्यते। ३ लसीका = Lymph.

**मेदो नाम**—सान्द्रसर्पिस्तुल्यः स्नेहधातुः शरीरस्य। तस्य स्थानमुदरान्तः[1], त्वचामधश्च[2]।

[ **वसा तु**—मांसगतः स्नेहस्तस्या मेदस्यनुप्रवेशस्तुल्योपादानत्वात्। ]

**अस्थीनि नाम**—स्थिरकठिनावलम्बनो धातुः कायस्य यमाश्रित्य समग्रं शरीरमवतिष्ठते। विशेषश्चास्थ्नामनुपदं व्याख्यास्यामः।

**मज्जा नाम**—अस्थिमध्यगतः स्नेहः। स द्विविधः पीतो रक्तश्च, तत्र पीतो नलकास्थ्नामन्तः, रक्तः सर्वेष्वितरेषु प्रान्तभागेषु च नलकास्थ्नाम्। सोऽयं स्थूलस्वरूपेण मेदसोऽभिन्नोऽपि कर्म्मविशेषात् पृथगेव धातुः।

**शुक्रं नाम**—प्रजाजननार्थश्चरमो धातुः। तस्य प्रभवस्थानं मुष्कौ[3]। स्रोतसी चास्य द्वे मूत्रमार्गप्रतिबद्धे। तत् खल्वव्याकृतं "स्फाटिकाभं द्रवं स्निग्धं मधुरं मधुगन्धि" चाहुः। त एते रसादिशुक्रान्ता धातवः।

**आशया[4] नाम**—श्वसनान्नपचनशोणितसंवहनादिक्रियाकरा बहवः। तेषां तिसृषु गुहास्ववस्थानम्। तास्तु यथा—शिरोगुहा, उरोगुहा, उदरगुहा चेति। [ द्रष्टव्यतां पुरश्चित्रम् ( ग्रन्थारम्भे ) ] तत्र—

**शिरोगुहायां**—मस्तिष्कमनुमस्तिष्कं[5] सुषुम्नाशीर्षकञ्च। तदेतत्त्रयं निखिलसंज्ञाचेष्टामूलं, येन संबध्यते निम्नतः सुषुम्नाकाण्डः पृष्ठवंशान्तरस्थः। सेयं प्रथमा शिरोगुहा व्याख्याता भवति।

**उरोगुहायां**—फुस्फुसद्वयं[6] हृदयञ्च[7] प्रधानम्। तत्र श्वसनार्थौ फुस्फुसौ श्वासपथेन कण्ठाभिगतेनोरसि द्वेधाविभक्तेन प्रतिबद्धौ। शोणितसंग्रहणप्रेरणार्थकं हृदयं पुण्डरीकाकारं फुस्फुसयोरन्तरालस्थं, तत्र प्रतिबद्धं महासिराद्वयं महाधमनीमूलं, सिराधमन्यश्च यथास्थानं वक्ष्यमाणाः—इति द्वितीया उरोगुहा व्याख्याता भवति।

**उदरगुहायां**—भुक्तमात्रस्याधारो दृतिसमाकार आमाशयः[8] स नाभि-

---

१ उदरच्छदभूतायां वपाख्यस्थूलकलायाम् (In the Omentum) इति भावः। २ मेदोधराख्यकलायां सर्व्वदेहव्यापिन्याम्। ३ "यथा पयसि सर्पिस्तु गूढश्चेक्षौ रसो यथा" इत्याद्यभिधानन्तु पुंलक्षणश्मश्र्वादिसम्पादकसर्व्वशरीरचरशुक्रसारपरम्। तद्विवरणमग्रे वक्ष्यते। ४ आशयास्त्रिविधाः सगर्भा अगर्भाः ईषद्गर्भाश्च। तत्र सगर्भाः आमाशयादयः। अगर्भा यकृत्प्लीहादयः। ईषद्गर्भाः मस्तिष्कादयः। अगर्भेष्वपि सूक्ष्मसिराधमन्यादिजालकानां बाहुल्यात्, आशेरते दोषधातुमला एष्विति व्युत्पत्त्याऽऽशयपदप्रयोगः। ५ मस्तिष्कम् = Cerebrum (Brain.) अनुमस्तिष्कम् = Cerebellum. सुषुम्नाशीर्षकम् = Medulla Oblongata. ६ फुस्फुसद्वयम् = Lungs. ७ हृदयम् = Heart. ८ आमाशयः = Stomach.

रूढम्। पच्यमानस्य विपक्वस्य चाशयः पक्वाशयः स नाभेरधः परितश्च (पक्वाशयश्चान्त्राणि च मलाशयश्चेत्यनर्थान्तरम्[1])। पाचकरञ्जकपित्तयोः प्रभवो यकृत्[2], तत्र संलग्नः पित्ताशयः[3]। रञ्जकपित्तप्रभवः प्लीहा[4]। यकृत्प्लीह्नोश्च स्थितिः क्रमेण दक्षिणतो वामतश्चामाशयात्। पृष्ठत आमाशयात् कुठारिकाकारोऽग्न्याशयः[5]। मूत्रप्रभवौ महाशिम्बीबीजाकारौ कोषौ वृक्कौ[6] नाम कटिपार्श्वयोः। वृक्कप्रभवस्य मूत्रस्य मूत्रस्रोतोभ्यां[7] समागतस्याशयो वस्तिर्नाम[7] स नाभेरधः। योनेरूर्द्धमुखप्रतिबद्धः क्षुद्रकलसाकारो गर्भाशयः[8], स स्त्रिया एव। सोऽयं स्वमुष्टिमात्राकारोऽगृहीतगर्भायाः, गृहीतगर्भायास्तु यथागर्भमभिवर्द्धते। तस्य चोभयोः पार्श्वयोः बीजकोषौ[9] नाम, तौ बीजस्रोतोभ्यां[10] प्रतिबद्धौ गर्भाशयेन—तावेव तु पुरुषस्य बहिःस्थितौ मुष्कौ[11] नाम शुक्रप्रभवौ। सेयं तृतीया उदरगुहा व्याख्याता भवति।

ता एतास्तिस्रो गुहा यासु निखिलाशयावरोधः।

**पञ्च ज्ञानेन्द्रियाधिष्ठानानि**—श्रोत्रत्वङ्नेत्ररसनाघ्राणाख्यानि। तत्र—

**श्रोत्रे** द्वे श्रवणेन्द्रियाधिष्ठाने। तदवयवास्तु—कर्णशष्कुल्यौ[12] कर्णकुहरे[13] श्रुतिपटहादीनि[14] चेति। तेषां विस्तरो यथास्थानम्।

**त्वचो**—व्याख्याताः। ताः स्पर्शेन्द्रियाधिष्ठानम्।

**नेत्रे**—द्वे दर्शनाय। तत्र प्रतिनेत्रमवयवास्तु—सपक्ष्मणी नेत्रपुटे, नेत्रवर्त्मनी, अक्षिगोलके चेति। अक्षिगोलकान्तर्गतविशेषांस्तु यथास्थानं वक्ष्यामः।

**रसना** त्वेका—पेशीमयी, तत्र स्वादग्राहिनाड्याः प्रतानमुखानि स्वादाङ्कुरेषु प्रतिबद्धानि। वाग्यन्त्रोपकरणं च रसना। ततश्च वाग्वाहिनाड्या अपि प्रताना रसनापेशीषु प्रतिबद्धाः।

**घ्राणे**—द्वे अस्थिप्राचीरकेण द्विभागविभक्ते। तदवयवास्तु—घ्राणपुटे, घ्राणविवरे, घ्राणकला, घ्राणपथश्च त्रिभूमिविभक्तः। घ्राणकलायाञ्च गन्धग्राहिनाड्याः प्रतानाः।

---

१ पक्वाशयः = Intestines. अनर्थान्तरं समानार्थकम् तत्र केचिदाहुः क्षुद्रान्त्राणि पच्यमानाशयः = (Small Intestines). बृहदन्त्रं तु पक्वाशयो मलाशयो वा (= Colon). २ यकृत् = Liver. ३ पित्ताशयः = Gall-Bladder. ४ प्लीहा = Spleen. ५ आग्नेयरसप्रभवत्वादग्न्याशयः = Pancreas. सोऽयं क्लोमेत्यपरे। तच्चिन्त्यम्, हृच्छ्वतासुपोहातः। ६ वृक्कौ = Kidneys. यत्तु "वृक्कौ पुष्टिकरौ प्रोक्तौ जठरस्थस्य मेदसः" इति, तत् सन्दिग्धार्थं प्रतिभाति, प्रत्यक्षविरोधात्। ७ मूत्रस्रोतसी वृक्काभ्यामवाङ्मुखे वस्तिमभिप्रपन्ने = Ureters. वस्तिः = Bladder. ८ गर्भाशयः = Uterus. ९ बीजकोषौ = Ovaries. १० बीजस्रोतसी = Fallopian Tubes. ११ मुष्कौ = Testicles. १२ कर्णशष्कुल्यौ = Pinnæ of the Ears. १३ कर्णकुहरम् = External Auditory Meatus. १४ श्रुतिपटहम् = Tympanum. आदिपदात् श्रुतिशङ्खकादीनि यथास्थानं वक्ष्यमाणानि।

**पञ्च कर्म्मेन्द्रियाधिष्ठानानि**—तानि वाक्पाणिपादपायूपस्थसंज्ञानि। तत्र—

**वागिन्द्रियाधिष्ठानम्**—जिह्वासमवेतस्वरयन्त्रः कण्ठस्थः। वाचो हि कण्ठघोषेण नानाविधजिह्वापरिवृत्तिपरिणमितेनाभिनिष्पाद्यन्ते।

**पाणिपादम्**—ग्रहण-धारण-स्थान-चलनादिसहायमित्युक्तपूर्व्वम्।

**पायुर्नाम**—मलविक्षेपकर्म्मा बृहदन्त्रस्य प्रान्तभागो गुदसंज्ञः।

**उपस्थो नाम**—जननेन्द्रियम्,—पुरुषस्य शिश्नः, स्त्रियास्तु योनिरिति।

**नव द्वाराणि**—चक्षुषी, श्रोत्रे, नासाविवरे, मुखं, पायुर्मूत्रमार्गश्चेति। स्त्रियास्तु त्रीण्यधिकानि—स्तनावपत्यपथश्चेति।

[“**मर्म्माणि नाम** मांससिरास्नायुस्थिसन्धिसन्निपातास्तेषु स्वभावत एव विशेषेण प्राणास्तिष्ठन्ति। तस्मान्मर्म्मस्वभिहतास्तांस्तान् भावानापद्यन्ते। तान्येतानि पञ्चविकल्पानि मर्म्माणि। तद्यथा—सद्यःप्राणहराणि कालान्तरप्राणहराणि विशल्यघ्नानि वैकल्यकराणि रुजाकराणि चेति”। सप्तोत्तरञ्च मर्म्मशतमत्र काये। तद्विवरणमाकरे[1] द्रष्टव्यम्)।

अथेदानीं प्रत्यङ्गावयवविशेषान् ब्रूमः।

ललाटं, भ्रुवौ, शङ्खौ, गण्डौ, ऊर्द्ध्वहनुमण्डलम्, अधोहनुमण्डलम्, ओष्ठाधरौ, चिवुकं, शिरोधरा चेति **शिरोग्रीवोपाङ्गानि** स्पष्टार्थानि।

स्तनौ, वक्षः, पार्श्वौ, पृष्ठम्, उदरं, नाभिः, वस्तिदेशः, कटिः, त्रिकञ्चेति **मध्योपाङ्गानि** प्रसिद्धार्थानि।

**शाखोपाङ्गानि तु**—अंसः कक्षा प्रगण्डः कफोणिः प्रकोष्ठो मणिबन्धः पाणितलं पाणिपृष्ठमङ्गुलयश्चेति प्रतिबाहु उपाङ्गानि। तत्रांसो भुजशिरः। भुजवक्षसोः सन्धिः कक्षा। अंसात् कफोणिं यावत् प्रगण्डः। बाहुमध्यसन्धेः पृष्ठभागः कफोणिः स एव कूर्परोऽपि। कफोणेरधश्चोर्द्ध्वं मणिबन्धात् प्रकोष्ठः। करप्रकोष्ठयोः सन्धिर्मणिबन्धः। (मणिबन्धादाकनिष्ठं करबहिर्भागः करभः)। अधो मणिबन्धात् पाणिः करापरपर्य्यायः। पाणेः सम्मुखो रेखाङ्कितो भागः पाणितलम्, तद्विपरीतं पाणिपृष्ठम्। अङ्गुष्ठतर्ज्जनीमध्यमानामिकाकनिष्ठाख्याः पञ्च कराङ्गुलयः।

---

१ यथा सुश्रुतशारीरषष्ठाध्याये।

जघनं वंक्षण ऊरुर्जानु जङ्घा गुल्फौ पादसन्धिः पार्ष्णिः पादतलं प्रपदं पादपृष्ठमङ्गुलयश्चेति प्रतिसक्थि उपाङ्गानि। तत्र जघनं नाम श्रोणिपार्श्वं सक्थिशिरःस्थम्। मध्यकायसक्थ्नोः सन्धिर्वंक्षणः। वंक्षणजानुनोर्मध्यमूरुः। ऊरुजङ्घयोः सन्धिर्जानु। जानुनोऽधस्तात् जङ्घा। जङ्घाया अधोभागे उभयतः गुल्फौ। तदधस्तात् पादसन्धिर्गुल्फसन्धिर्वा। तदधः पादः। तदवयवास्तु—पादपश्चिमो भागः पार्ष्णिः, पादाग्रं प्रपदं, रेखाङ्कितो भागः पादतलम्, तद्विपरीतं पादपृष्ठम्, पादाङ्गुलयश्च पञ्च कराङ्गुलिवदेव नाम्नेति।

सा खल्वियं शारीरपरिभाषा या सम्यगवगता निखिलमपि शारीरतत्त्वमग्रे वक्ष्यमाणमवबोधयिष्यति।

तथाचाहुः—

"अव्यक्तानुक्तलेशोक्तसन्दिग्धार्थप्रकाशिकाः।
परिभाषाः प्रकथ्यन्ते दीपीभूताः सुनिश्चिताः॥"
"शरीरसंख्यां यो वेद सर्वावयवशो भिषक्।
तदज्ञाननिमित्तेन मोहेन स न युज्यते॥" (च. शा. ७ अ.)

———

# तृतीयोऽध्यायः।

अथातः अस्थिसामान्यवर्णनीयमध्यायं व्याख्यास्यामः।

**अस्थीनि नाम**—स्थिरकठिनावलम्बनधातुः शरीरस्येत्युक्तं प्राक्। तानि प्रथमतः परिज्ञेयानि, तेषां प्रधानालम्बनत्वात् कायस्य। तथाह्युक्तम्—

"अभ्यन्तरगतैः सारैर्यथा तिष्ठन्ति भूरुहाः।
अस्थिसारैस्तथा देहा ध्रियन्ते देहिनां ध्रुवम्॥
तस्माच्चिरविनष्टेषु त्वङ्मांसेषु शरीरिणाम्।
अस्थीनि न विनश्यन्ति साराण्येतानि देहिनाम्॥" (सु. शा. ५ अ)

तान्युपादानद्वितयसंयोगादभिनिष्पद्यन्ते। उपादानद्वितयञ्च—कोमलः स्नायुसंघातभागः, कठिनः सुधाभागश्चेति। कोमलस्नायुतन्तुजालकेषु कठिनसुधांशसंयोगाद्धि सर्वास्थ्नामभिसम्भवः।

१ सुधा चूर्णकम् (Lime)। २ शणसूत्रवद्दृढसूक्ष्मतन्तुजालकेषु कठिनचूर्णवद्वस्तुसङ्घातेनास्थ्नां निर्माणमित्यर्थः।

अथास्थ्नां द्विरूपमावरणम्—बाह्यमाभ्यन्तरञ्च। तत्र या बहिरावृणोत्यस्थीनि, सा अस्थिधरा नाम कला जीवभूमिरस्थ्नाम्[1]। यात्वन्तरावृणोत्यस्थिविवराणि अन्तर्वेष्टनीभूय, सा मज्जधरा नाम स्वनामव्याख्याता।

द्विविधश्चास्थ्नामुपादानसङ्घातविशेषः—घनसङ्घातः शुषिरसङ्घातश्चेति[2]। तत्र घनसङ्घातः सर्वास्थ्नां बहिर्भागेषु, विशेषतश्च नलकास्थ्नाम्। शुषिरसङ्घातः क्षुद्रास्थ्नां कपालास्थ्नाञ्चाभ्यन्तरतः[3], प्रान्तेषु[4] च नलकास्थ्नाम्।

एष पुनरस्थ्नां पोषणप्रकारः। धमन्यः सर्वास्थिषु स्फुटानि[5] विवराण्या-श्रित्य[6] प्रविशन्ति, प्रसरन्ति चानेकधा सूक्ष्मानुसूक्ष्मैः प्रतानैः—एवं पोषणार्थं शुद्धरक्तागमः। सिराश्च तैरेव विवरैरविशुद्धरक्तं बहिर्नयन्ति[7]—एवमविशुद्ध-रक्तविसर्गः।

अथैषां सर्व्वेषामेवास्थ्नां बाल्ये तारुण्यं[8] संख्याबाहुल्यञ्च; वयःपरिणामेन कठिनीभावः संख्याल्पत्वञ्च परस्परसंयोगेनापञ्चविंशवर्षात्[9]। श्वासपथादि-गतानान्तु नियतमेव तारुण्यमन्यत्र वार्द्धकात्। वार्द्धके तु नियततरुणानामपि केषाञ्चित् काठिन्यसम्भवः।

आकृतितः पुनः पञ्चविधान्याहुरस्थीनि प्राञ्चः। तानि—"कपालरुचक-तरुणवलयनलकसंज्ञानि।" तत्र कपालाकृतीनि कपालानि यथा शिरसि। दशनास्तु रुचकानि[10]। घ्राणकर्णादिषु तरुणानि। पार्श्वपृष्ठोरःसु वलयानि[11]। शाखासु नलकानि।

इतराण्यपि सन्ति क्षुद्रकठिनान्यस्थीनि येषां नैतेष्वन्तर्भावः सुकरः। तानि विषमाणि[12] नाम यथा—पाणिपादकूर्चास्थीनि।

---

१ सेयं कला (Periosteum) चेदभिहन्यते, तदा तदावृतमस्थ्यपि शीर्य्यते, अतएवेयं जीवभूमिरस्थ्नाम्। २ सुधांशाधिक्ये सति घनसङ्घातः, स्नायुंशाधिक्ये शुषिरसङ्घातः (Compact tissue and Cancellous tissue). ३ कपालास्थ्नामपि बहिरावरणफलकद्वयं घनसङ्घातमयमेव। ४ नलकास्थ्नामेकैकस्य द्वावन्तौ, तौ चान्तः शुषिरसङ्घातमयौ। ५ परिदृश्यमानानि। ६ Nutrient Foramina. ७ हृदयाभिमुखं नयन्तीति भावः। ८ कोमलत्वम्। तरुणास्थीनि हि कोमलास्थीनि। ९ बहवः खल्वस्थ्यवयवाः प्रौढ़ावस्थारम्भे परस्परं संयुज्यन्ते। १० रुचकानि, रुचकाकारत्वात्। रुचकं नाम कङ्कतिका (कंकही, चिरुणीति भाषा) ११ वलयप्रायाकारत्वात्। १२ विषमाकारत्वात्।

# प्रथमचित्रम् ।

## नरकङ्कालम् ( सम्मुखतो दृष्टम् ) ।



संख्यातस्तु त्रीणि सषष्टीन्यस्थिशतानि वेदवादिनो[1] भाषन्ते। त्रीणि शतानि शल्यतन्त्रविदः[2]। द्वे शते प्रतीच्याः[3]। आपातविरुद्धवादिनोऽपि सर्व एवैतेऽवितथमाहुः। गणनाप्रकारभेदात्। तथाहि वेदवादिनो नखदन्तादीनस्थिगणनायामन्तर्भावयन्ति नैवमितरे। तरुणास्थीनि दशनांश्च गणयन्ति शल्यतन्त्रविदः प्राच्याः, नैवं प्रतीच्याः। पृथग्वयोग्रहणाच्च। प्राञ्चो हि यौवनप्रविष्टस्य[4] सञ्चक्षतेऽस्थीनि, प्रौढ़स्य तु पञ्चविंशतिवर्षदेशीयस्य प्रतीच्याः। ये खलु तावदस्थ्यवयवाः पृथक् सन्ति यूनस्त एव एकीभूय बहुधा सम्पूर्णास्थीनि स्वल्पसंख्यानि निष्पद्यन्ते प्रौढ़स्येति हि संख्याभेदः।

इह तु प्रौढ़काये प्रत्यक्षदृष्टानि कठिनास्थीन्येव संचक्ष्महे—गणनासौकर्य्याल्लाघवाच्च। तरुणास्थिनखदशनानान्तु नेह ग्रहणम्। तरुणास्थ्नामसंख्येयप्रायत्वात्। नखदशनानाञ्च त्वग्विपरिणाम[5]मात्रत्वात्। एवञ्च कठिनास्थीनि चतुर्व्विधानि,—कपालानि, वलयानि, नलकानि, विषमाणि चेति।

अथैषां सङ्ख्यानम्। तत्र

शाखाऽस्थीनि—यथा [ दृश्यतां कङ्कालचित्रद्वयम् ]—एकैकस्यां पादाङ्गुल्यां त्रीणि त्रीणि, द्वे अङ्गुष्ठे इति चतुर्दश[6] अङ्गुलीषु। पञ्चानामङ्गुलीनां मूलतः शलाकाः[7] पञ्च। पादकूर्च्चास्थीनि[8] सप्त। जङ्घायां[9] द्वे। जानुन्येकम्[10]। एकमूरौ[11] विति। त्रिंशदेवमेकस्मिन् सक्थ्नि भवन्ति। तथा द्वितीये। बाहौ तु अङ्गुलीषु चतुर्द्दश। शलाकाश्च[12] पञ्च पूर्व्ववत्। पाणिकूर्च्चास्थीनि[13] अष्टौ। प्रकोष्ठे[14]

---

१ चरकयाज्ञवल्क्यादयः। २ सुश्रुतभेलाद्याः। ३ यूरोपीयाः। ४ कशेरुकावयवादीनां पृथक्संख्यानात् स्फुटमनुमीयते खल्वेतत्। चरक-सुश्रुत-नव्यमतानां संख्यानादितुलना तु उपोद्‌घातप्रकरणे दर्शयिष्यते। ५ त्वच एव विपरिणामेन निष्पद्यन्ते नखा दशनाश्च शैशवे। तेषामस्थिषु गणनं वेदवादिनामेव युज्यते, दशनादीनामपि गङ्गाजलादौ निःक्षेपे फलस्वीकारात्। ६ यत्तु सुश्रुते "एकैकस्यां पादाङ्गुल्यां त्रीणि त्रीणीति पञ्चदश"—इति तत् कस्यचित् प्रमादजन्यं प्रत्यक्षविरोधात् स्वोक्तिविरोधाच्च। तथा हि सन्धिगणनायां "एकैकस्यां पादाङ्गुल्यां त्रीणि त्रीणि द्वे अङ्गुष्ठे" इति अङ्गुलीसन्धीनां चतुर्द्दशैव संख्या निर्द्दिष्टा (सु. शा. ५ अ.)। अङ्गुल्यस्थीनि = Phalanges. ७ पादाङ्गुलिशलाकाः—Metatarsals ८ पादकूर्चास्थीनि—Tarsal Bones. ९ जङ्घास्थिनी = (Leg Bones) Tibia and Fibula. १० जान्वस्थि = Patella. ११ ऊर्व्वस्थि = Femur. १२ कराङ्गुलिशलाकाः—Metacarpals. १३ पाणिकूर्चास्थीनि = Carpal Bones. १४ प्रकोष्ठास्थिनी = Radius and Ulna.

द्वे। प्रगण्डे[१] एकम्। त्रिंशदेवमेकस्मिन् बाहौ भवन्ति। तथा द्वितीये। एवं शाखासु सविंशमस्थिशतं द्रष्टव्यम्।

**अथ मध्यशरीरे अस्थीनि**—तत्र मध्यालम्बनभूते पृष्ठवंशे कण्ठादारभ्य कटिं यावत् चतुर्विंशतिः कशेरुकाः[२]। तदनुबन्धेन त्रिकसंस्थमेकं त्रिकास्थि[३] नाम (तदस्थिपञ्चकसङ्घातमयम्)। तदनुबन्धेन च गुदपश्चिममेकमनुत्रिकं[४] नाम (तदपि तथैव)। श्रोण्योर्द्वे कपालास्थिनी[५] श्रोणिफलके नाम। उरसि पुरो मध्यफलकमेकम्[६] उरःफलकं नाम (तदस्थित्रयसंयोगजम्, अस्थिषट्कसंयोगजं वा)। अक्षके[७] द्वे तदुभयतः। अंसफलके[८] द्वे अंसपृष्ठतः। पार्श्वयोरेकैकस्मिन् द्वादशेति चतुर्व्विंशतिः पर्शुकाः[९]। ग्रीवायां पुरो रसनामूलगमेकमर्द्धवलयाकारं कण्ठिकास्थि[१०] नाम। एवमष्टपञ्चाशदस्थीनि मध्यकाये भवन्ति।

**अथ शिरसि**—चत्वारि शिरःकपालानि, पुरःकपालम्,[११] पश्चात्कपालं[१२] पार्श्वकपाले[१३] द्वे चेति। शङ्खयो[१४]र्द्वे शङ्खास्थिनी नाम। द्वे शिरोभूमिभूते—तयोरेकं जतूकाकारं[१५] कण्ठताल्वादिच्छादनं जतूकास्थि नाम, अपरं झर्झराख्यं[१६] लघुशुषिरं नासामूलगम्। द्वे गण्डयोः[१७]। द्वे ऊर्द्ध्वहनौ[१८]। एकमधोहनौ[१९]। द्वे ताल्वस्थिनी[२०]। द्वे नासामूलतः[२१] पार्श्वयोः नासास्थिनी नाम। द्वे नासाभ्यन्तरतः[२२] शुक्तिके नाम। एकं नासामध्यप्राचीरभूतं[२३] सीरिकाख्यम्। द्वे अक्षिकोटरपार्श्वयोरश्रुमार्गाश्रये अश्रुपीठे[२४] नाम। त्रीणि सूक्ष्मास्थीनि[२५] प्रतिकर्णमभ्यन्तरत इति कर्णयोः षट्, तानि श्रुतियन्त्रोपकरणानि। एवमष्टाविंशतिरस्थ्नां शिरसि।

तदिदं समुदायेन षड़धिकं शतद्वयं कठिनास्थ्नामवगन्तव्यम्, शतद्वयं वा कर्णास्थिवर्जम्।

केषुचित् कण्डरान्तेष्वपि प्रायश्चणकाकाराणि दृश्यन्ते क्षुद्रास्थीनि[२६]। नेह तेषां पृथक् संख्या, अनिश्चितावस्थानात्।

तरुणास्थ्नां[२७] च नेह गणनेति प्रागवोचाम, दिग्दर्शनार्थन्तु कानिचिन्नि-

१. प्रगण्डास्थि = Humerus. २ Vertebrae. ३ Sacrum ४ Coccyx. ५ Os Innominatum (Hip-bone). ६ Sternum. ७ Clavicles. ८ Scapulæ. ९ Ribs. १० Hyoid. ११ Frontal. १२ Occipital. १३ Parietal. १४ Temporal. १५ जतूका चर्मचटिका (चामचिके इति वङ्गभाषा)। जतूकास्थि = Sphenoid. १६ Ethmoid. १७ Malar Bones. १८ Superior Maxillary. १९ Inferior Maxillary. २० Palate Bones २१ Nasal Bones. २२ Inferior Turbinated. २३ Vomer. २४ Lachrymal Bones. २५ Ossicles of the Ear. २६ कण्डराचणकास्थीनि = Sesamoid Bones. २७ तरुणास्थि = Cartilage.

# द्वितीयचित्रम् ।

## नरकङ्कालम् ( पार्श्वतो दृष्टम् । )



विशन्ते । तानि यथा पृष्ठवंशे, कशेरुकान्तरालेषु, सन्ध्यन्तरालेषु, पर्शुकान्तेषु, नासाप्राचीरयोः, कर्णपाल्योः, श्वासपथे तच्छाखाप्रशाखासु चेति ।

दशनास्तु द्वात्रिंशत् । तेषु चतुर्णां पश्चिमानां यौवने समुद्भेदः कदाचिच्चिरेण वा । त्वग्विपरिणाममात्रत्वाद्दशनानामिह नास्थित्वमित्युक्तपूर्वम् ।

सोऽयं सर्वास्थिप्रविभागः संक्षेपेण व्याख्यातः । विशेषोऽत ऊर्द्ध्वम् ।

---

# चतुर्थोऽध्यायः ।

## अथातोऽस्थिविशेषवर्णनीयाध्यायं व्याख्यास्यामः ।

इह खलु सामान्यतः परिज्ञानेऽप्यस्थ्नां विशेषा अवश्यं ज्ञातव्या भवन्ति सूक्ष्मप्रतिपत्तये पेशीक्रियाविज्ञानार्थं[1] भग्नादिप्रतिसन्धानार्थञ्च[2] । तानिवेदानीं विशेषान् प्रविभज्य समाचक्ष्महे ।

आदौ चेह तावत् पुरुषस्योत्तानकरयुगलस्यालम्बितहस्तपादस्य ग्रहणम् । तदपेक्षया च ऊर्द्ध्वमधः-पुरः-पश्चादिति व्यवहारः सर्व्वावयवेषु । तस्य च नाभेरनुक्रमेण कल्प्यते ऊर्द्ध्वाधोगामिनी रेखा—सेयं **मध्यरेखा** नाम । तस्याः सन्निकृष्टः सीमा—**अन्तःसीमा**, विप्रकृष्टश्च **बहिःसीमा** नाम ।

### अथ प्रथमः

## शाखास्थिविज्ञानीयः परिच्छेदः ।

तत्र ग्रहणधारणस्थूणनचलनादिसहायाः शाखाश्चतस्रो—द्वौ बाहू द्वे च सक्थिनी । तत्र प्रतिसक्थि त्रिंशदस्थीनि । तद्यथा—पादाङ्गुलीषु चतुर्दश, पादमध्ये मूलशलाकाः पञ्च, पादमूले पादकूर्च्चास्थीनि सप्तेति प्रतिपादं षड्विंशतिः, जङ्घयोर्द्वे, जानुन्येकमेकमूराविति ।

---

१ पेश्यो हि अस्थिनिबद्धाः प्रान्तभागे रित्युक्तपूर्व्वं, पेशीक्रियाश्च करचरणादिसञ्चालनानेकविशेषरूपाः, अस्थिसन्निवेशविशेषतश्च पेशीनां क्रियाविशेषाः । ते तु पेश्यध्याये वक्तव्याः । २ पेशीसन्निवेशज्ञानादस्थिविशेषज्ञानाच्च विना भग्नास्थ्नां यथायथं सन्निवेशनं दुष्करमिति भावः ।

## तत्रादौ पादास्थीनि ब्रूमः।

[ चतुर्थं चित्रम् ]



चतुर्थचित्र-व्याख्या। १—७ कूर्चास्थीनि। पे—शल्यङ्कितेषुस्थानेषु निविशन्ते पेश्यः तद् यथा—पे १ पे २ पे ३ पे ४, पादपृष्ठान्तराला:। पे ५—पादाङ्गुलिप्रसारणी दीर्घा:। पे ६—पादाङ्गुष्ठप्रसारणी दीर्घा, पे ७ पे १०—पादाङ्गुलिप्रसारणी ह्रस्वा (प्रान्तद्वयम्) पे ८ पे ९ पादविवर्त्तन्यौ पेश्यौ। पे ११, पिण्डिकाकण्डरा।

### पादाङ्गुल्यस्थीनि—

एकैकस्यां पादाङ्गुल्यां त्रीणि त्रीणि द्वे अङ्गुष्ठे; तान्यङ्गुलीनलकानि[1] नाम प्रतिपादं चतुर्दश[2]। तानि तिसृषु श्रेणीषु विभक्तानि। तत्र अग्रिमश्रेण्यां पञ्च, मध्यमश्रेण्यां चत्वारि, पश्चिमश्रेण्यां पञ्च। तेष्वग्रिमाणि पञ्च पुरतो मुक्तवितताग्राणि नखधारणाय; सन्धीयन्ते चैतानि पश्चिमतोऽङ्गुलीनलकै-र्मध्यश्रेणीस्थैरन्यत्राङ्गुष्ठात्[3], अङ्गुष्ठे तु पश्चिमनलकाग्रेण सन्धिः मध्यनलकाभावात्। मध्यश्रेणीस्थानि चत्वारि तूभयतः[4] सन्धिमन्ति। पश्चिमश्रेणीस्थानि पञ्च, तान्यप्येवम्।

### पादाङ्गुलीमूलशलाकाः—

अङ्गुलीनां मूलतः प्रतिपादं पञ्च नलकास्थीनि पादाङ्गुलीमूलशलाका[5] नाम, तैरालम्ब्यते प्रपदम्। मूलतश्च तानि यथायथं कूर्चास्थिभिः सन्धीयन्ते, अग्रतश्च पश्चिमाङ्गुलीनलकैः। (अतएव कूर्चास्थ्नां शलाकाधिष्ठानसंज्ञा) तत्रेमे विशेषाः।

### प्रथमा—अङ्गुष्ठमूल-

शलाका नाम, सा स्थूलतमा ह्रस्वतमा च पाद-शलाकास्थ्नाम्। तया

१ अङ्गुलीनलकानि = Phalanges. २ अङ्गुष्ठे मध्यश्रेणीस्थनलकाभावात्। ३ पुरोऽग्रिमनलकैः पश्चात् पश्चिमनलकैः। ४ उभयतः सन्धिमन्तीत्यर्थः। सन्धिश्च कनिष्ठाद्यङ्गुलीचतुष्टये पुरो मध्यनलकैरङ्गुष्ठे पुरोऽग्रिमनलकेन, पश्चात्तु पञ्चस्वपि अङ्गुलीमूलशलाकाभिः। ५ पादाङ्गुलीमूलशलाकाः = Metatarsals.

निर्मीयते प्रपदस्यान्तःसीमा, सन्धीयते चासौ मूलतः आन्तरकोणकाख्येन कूर्चास्थ्ना। अस्याश्च मुण्डं स्थूलं पादतलप्रदेशे मध्यतः खातद्वयाङ्कितञ्च—अनयोश्च खातयोर्विवर्त्तेते ह्रस्वायाः पादाङ्गुष्ठसङ्कोचन्याख्यपेश्याः कण्डरान्तरीये चणकास्थिनी। सन्धीयते चेदमङ्गुष्ठपश्चिमनलकेन।

द्वितीया—तर्जनीमूलशलाका नाम—सा पादाङ्गुलिशलाकासु दीर्घतमा मूलतश्च त्रिभिः सन्धिलक्ष्मभिरङ्किता कोणकाख्यकूर्चास्थित्रयेण सन्धिसूचकैः। मुण्डञ्चास्याः संधीयते तर्जनीपश्चिमशलाकामूलेन।

तृतीया—मध्यमामूलशलाका नाम—तस्या मुण्डं मध्यमाङ्गुलीपश्चिमनलकमूलेन संधिमत्, मूलतश्चासौ चतुर्भिः संधिलक्ष्मभिरङ्किता। तेषु आन्तरसीम्नि संधिलक्ष्मद्वयं तर्जनीमूलशलाकापार्श्वेन सन्धिसूचकम्, बाह्यसीम्नि त्वेकं सन्धिलक्ष्म अनामिकामूलशलाकापार्श्वेन सन्धानाय, मध्यतश्चैकं महत्तरं बाह्यकोणकाख्येन कूर्चास्थ्ना सन्ध्यर्थम्।

चतुर्थी—अनामिकामूलशलाका नाम—सा मूलतः सन्धीयते घनाख्येन बाह्यकोणकाख्येन चेति द्वाभ्यां कूर्चास्थिभ्यां, तत्रैव बाह्याभ्यन्तरपार्श्वयोश्च यथाक्रमं कनिष्ठातर्ज्जनीमूलशलाकयोर्मूलपार्श्वाभ्याम्।

पञ्चमी—कनिष्ठामूलशलाका—नाम, सा मूलतो बहिःसीम्नि स्थूलार्बुदेनोपलक्षिता। द्वे चास्या मूलतः सन्धिलक्ष्मणी, एकं त्रिकोणं घनाख्येन कूर्चास्थ्ना सन्ध्यर्थमपरमनामिकामूलशलाकापार्श्वेन।

तदेवं पञ्च पादाङ्गुलीमूलशलाका व्याख्याताः। [तासां नानास्थिभिः सन्धिप्रकारस्मरणार्थमिमे श्लोकाः—

सन्धीयन्ते पादमूलशलाका मुण्डतः पुरः।
अङ्गुलीपश्चिमनलैरथ कूर्चास्थिभिः क्रमात्॥
प्रथमा संहितैकेन द्वितीया संहिता त्रिभिः।
तृतीयैकेन तुर्य्या तु द्वाभ्यामेकेन पञ्चमी॥
अन्योन्यमथ मूले तु सन्धिस्त्रिषु पार्श्वयोः।
एकतस्तु कनिष्ठायामङ्गुष्ठे क्वचिदेव तु॥]

१ Flexor Hallucis Brevis २ चणकास्थि—Sesamoid Bone. ३ सन्धिलक्ष्म सन्धेश्चिह्नं मसृणप्रदेशरूपम् ( Facet ). ४ क्वचित् कङ्काले अङ्गुष्ठमूलशलाकापि मूलतस्तर्जनीमूलशलाकया सन्धिमती, नत्वेवं प्राय इत्यर्थः।

**अथ कूर्चास्थीनि**[1]—कूर्चास्थीनि नाम पादपश्चिमभागनिर्म्मापकाणि स्थूलह्रस्वविषमाणि प्रतिपादं सप्त। तान्येव मूलशलाकाधिष्ठानानि नाम।

तानि क्रमेण कूर्चशिरः—पार्ष्णि—नौनिभ—घन—आन्तरकोणक—मध्यकोणक—बाह्यकोणक—संज्ञानि। तत्र—

**कूर्चशिरो**[2] नाम—(४र्थ चित्रे ७) सर्व्वेषां कूर्चास्थ्नामुपरिस्थितं वृत्तप्रायमस्थि जंघापादयोः संयोजकम्। [अस्य मुण्डं वर्त्तुलाकारं न्युब्जपृष्ठं सन्धिलाञ्छनयुतञ्चोपरिष्टात् जङ्घास्थ्नोऽधःप्रान्तेन सन्ध्यर्थम्। अधःप्रदेशे चास्य गम्भीरा सीता[3] सन्धि-स्नायुरज्जुप्रवेशाय, द्वे च सन्धिलक्ष्मणी पार्ष्णिशिरसा सन्ध्यर्थम्। आन्तरबाह्यसीम्नोस्तु सन्धिलक्ष्मणी गुल्फाभ्यां सन्धानार्थम्। पुरोमुखेऽप्यस्यैकं सन्धिलक्ष्म, तत् नौनिभेन कूर्चास्थ्ना सन्धानार्थम्]।

**पार्ष्णि**[4] नाम—(४र्थ चित्रे ६) वृहत्तमं कूर्चास्थि। तत् पार्ष्णिनिर्म्मापकं सर्व्वदेहभारसहञ्च। [अस्योर्द्ध्वप्रदेशे सन्धिलक्ष्मणोर्मध्ये गम्भीरा सीता सन्धिस्नायुरज्जुप्रवेशाय, सन्धिलक्ष्मणी च कूर्चशिरसा सन्ध्यर्थम्। अस्य पुरोमुखं विषमं ह्रस्वञ्च। पश्चाद्भागस्त्वीषद्विषमो दीर्घश्च, स एव पार्ष्णिमूलं निष्पादयति। अस्यान्तरसीम्नि ओष्ठाकारं प्रवर्द्धनकं[5] पार्ष्ण्योष्ठं नाम; तस्योपरि स्फुटं सन्धिलक्ष्म कूर्चशिरसा सन्ध्यर्थम्। अधश्चास्य प्रवर्द्धनकस्य गम्भीरा सीता पादतलस्थ-शिरा-धमनी-नाड़ी-कण्डरामुखानां धारणाय। अष्टौ तु पेश्योऽस्मिन् कूर्चास्थ्नि संयुक्तास्तासु सप्त तलदेशे, एका पृष्ठतः पिण्डिकाकण्डरा नाम। ता यथास्थानं वर्णयिष्यन्ते।]

**नौनिभं नाम**[6]—(४र्थ चित्रे ५) पादान्तरसीम्नि नावाकारं कूर्चास्थि। [तस्य पुरोभागः खातोदरः, त्रिभिः सन्धिलक्ष्मभिरुपलक्षितश्च क्रमेण कोणकाख्य-कूर्चास्थित्रयेण (४र्थ चित्रे १, २, ३) सन्ध्यर्थम्। अस्य पश्चिमभागोऽपि ईषत्खातोदरः कूर्चशिरसो मुखेन सन्ध्यर्थम्। अस्य बहिःसीम्नि एकं सन्धिलक्ष्म घनाख्येन कूर्चास्थ्ना संधानाय। अन्तःसीम्नि चास्य क्षुद्रमर्व्वुदम्, तत्र जङ्घानुगा[7] स्यपेशीनिवेशः।]

---

१ कूर्चास्थीनि=Tarsal Bones. २ Astragalus. ३ सीता नाम गभीरखातम्। अस्मिन् शास्त्रे सीतादिशब्दाः पारिभाषिकार्थेषु निरूढाः ज्ञेयाः। ४ Calcaneum or Os Calcis. ५ प्रवर्द्धनकं नाम प्रवृद्धाग्रोऽस्थ्यवयवः। ६ Navicular. ७ Tibialis Posticus muscle.

घनं[1] नाम—( ४र्थ चित्रे ४ ) घनाकारं[2] पादबहिःसीम्नि स्थितं कनिष्ठानामिकामूलशलाकयोरधिष्ठानभूतं कूर्चास्थि। [ अस्य पुरोभागे द्विभागविभक्तं सन्धिलाञ्छनं कनिष्ठानामिकामूलशलाकामूलाभ्यां सन्ध्यर्थम्। अस्य पश्चिमो भागः सन्धीयते पार्ष्णिमुखेन, तदर्थं चात्र स्फुटं सन्धिलक्ष्म। अस्यैवान्तःसीम्नि सन्धिलक्ष्म बहिःकोणकाख्येन कूर्चास्थ्ना सन्धानार्थम्। प्रायशस्तत्रैवापरमपि सन्धिलक्ष्म दृश्यते पश्चिमतः, तत् नौनिभेन सन्ध्यर्थम्। अधःप्रदेशे चास्य स्फुटा सीता दीर्घायाः पादविवर्त्तन्याः[3]ख्यपेश्याः कण्डरान्तधारणाय। ]

अन्तःकोणकं[4] नाम—( ४र्थ चित्रे १ ) अङ्गुष्ठमूलशलाकामूलस्थं कूर्चास्थि त्रिकोणप्रायम् [ अस्य चान्तरसीमा त्वङ्मात्रावरणा, बहिःसीम्नि चास्य द्वे सन्धिलक्ष्मणी तर्जनी-मूलशलाकामूलेन मध्यकोणकपार्श्वेन च सन्ध्यर्थम्। अस्य पुरोमुखस्थं सन्धिलक्ष्म शिम्बीवीजाकारं अङ्गुष्ठमूलशलाकामूलेन सन्धानाय। अस्य तलदेशे क्षुद्रमर्ब्बुदम् जङ्घा[5]पुरोगा-जङ्घानु[6]गाख्यपेशीद्वयस्य कण्डरान्तसंयोगाय। ]

मध्यकोणकं[7] नाम –(४र्थ चित्रे २) तर्ज्जनीमूलस्थं क्षुद्रतमं कूर्चास्थि त्रिकोणप्रायम्। [ अस्य पुरोभागे सन्धिलक्ष्म तर्ज्जनीमूलशलाकया सन्ध्यर्थम्। पार्श्वयोः सन्धिलक्ष्मणी क्रमेण अन्तःकोणकबहिःकोणकाभ्यां सन्धानाय। पश्चिमतश्च क्षुद्रं सन्धिलक्ष्म नौनिभेन सन्ध्यर्थम्। ]

बहिःकोणकं[8] नाम—( ४र्थ चित्रे ३ ) मध्यमामूलशलाकामूलस्थं त्रिकोणप्रायं कूर्चास्थि [ तत् सन्धीयते पुरो मध्यमामूलशलाकामूलेन तर्जन्यनामिकामूलशलाकामूलाभ्याञ्च, यदर्थं तथा तथा सन्धिलक्ष्माणि। पार्श्वाभ्याञ्चेदं सन्धीयते मध्यकोणकेन घनेन च यदर्थं स्फुटे सन्धिलाञ्छने। पश्चिमतस्तु सन्धिलक्ष्मैकं नौनिभेन सन्धानाय। ]

चरमोक्तानां त्रयाणां कूर्चास्थ्नां कोणकत्रयसंज्ञया निर्द्देशः।

तदेवं पादास्थीनि व्याख्यातानि। [ पादास्थिपृष्ठे पेशीसन्निवेशास्तु चित्राधो व्याख्यायां द्रष्टव्यः, विस्तरः पुनः पेश्यध्याये। ]

---

१ Cuboid. २ घनं=कूटम् ( Anvil ). ३ Peroneus Longus muscle. ४ Internal Cuneiform. ५ Tibialis Anticus. ६ Tibialis Posticus. ७ Middle Cuneiform. ८ External Cuneiform.

[ पञ्चम चित्रम्—जंघास्थिनी ]




[ अधः ]

५म चित्रव्याख्या। अत्रैता: निविशन्ते पेश्यः। पे १ दीर्घायामा (Sartorius). पे २ ऊर्वन्त:पार्श्विका (Gracilis). पे ३ कलाकल्पा ( Semimembranosus). पे ४ जंघापुरोगा (Tibialis Anticus). पे ५ द्विशिरस्का (Biceps). पे ६ पादाङ्गुली प्रसारणी दीर्घा (Ext. Long Digitorum). पे ७ पादविवर्त्तनी दीर्घा, पे ८ सैव ह्रस्वा पे १० सैव कनिष्ठा (Peroneus Longus, Brevis and Tertius) पे ९ पादाङ्गुष्ठप्रसारिणी दीर्घा (Ext. Hallucis Longus). ९ इत्यङ्कितेऽवकाश जङ्घान्तराला कला।

## अथ जङ्घास्थिनी।

**जङ्घास्थिनी—तु द्वे,** जङ्घास्थि अनुजङ्घास्थि चेति। जान्वस्थि चैकं क्षुद्रकपालाकारं जङ्घास्थ्नोरुपरि जानुसन्धेः पुरस्तात्।

**तत्र जङ्घास्थि[1] नाम—** ( ५म चित्रे ) ऊर्वस्थ्नः परं दीर्घतमं नलकास्थि। तस्य द्वौ प्रान्तौ मध्यनलकञ्चेति त्रयो भागाः।

तस्योर्द्ध्वप्रान्तो—द्वाभ्यामुत्सेधाभ्यामुपलक्षितः पार्श्वयोः (५म चित्रे १, २), तयोरुपरिष्टात् स्फुटे सन्धिलक्ष्मणी ऊर्वस्थ्नोऽधःप्रान्तस्थिताभ्यां कन्दा[2]भ्याम् सन्ध्यर्थम् (५म चित्रे सं सं)। अनयोश्च सन्धिचिह्नयो र्मध्यस्थं (तत्रैव क) द्विमुखं कण्टकम्—येन संयुज्यते सन्ध्यन्तरस्थमर्द्धचन्द्राकारं तरुणास्थिद्वयम्[3], यस्य च पुरः पश्चाच्चाधीयते सन्ध्यन्तरस्थस्वस्तिकस्नाय्वोः प्रान्तद्वयम्। पुरस्थोर्द्ध्वप्रान्तस्य स्फुटमर्बुदं ( ५म चित्रे ३ ) यत्र संयुज्यते ( ३ अङ्कं परितः) जानुकपालबन्धनी स्नायुः। अस्यैव चोपरि पुरः सन्धिलक्ष्म जान्वस्थ्ना सन्धानाय। पश्चात्तूर्द्ध्वप्रान्तस्य जानुपश्चिमः खातः, तत्र

---

१ जङ्घास्थि = Tibia. २ कन्दाकाराभ्यामस्थ्यंशाभ्याम्। ३ स्वकीयकोटिचतुष्टयेनेति शेषः।

सन्धीयते पश्चिमः स्वस्तिकस्नायुः। तस्यैवोर्द्ध्वप्रान्तस्यान्तःसीम्नि पश्चात् लक्ष्यते सीता, तत्राधीयते कलाकल्पाख्य[1]पेश्याः कण्डरामुखम्। अस्य बाह्यसीम्नि पश्चाद्भागे च सन्धिलक्ष्म क्षुद्रं (५म चित्रे ४) तदनुजङ्घास्थ्नः शिरसा सन्ध्यर्थम्।

अधःप्रान्तस्तु जङ्घास्थ्नः—ऊर्द्ध्वप्रान्तात् ह्रस्वाकारः। अस्य पश्चात् दृश्यते सीता दीर्घाङ्गुष्ठसंकोचन्याः पेश्याः कण्डरान्तसंयोगाय। बहिःसीम्नि चास्य त्रिकोणप्रायं सन्धिलक्ष्म ( ५म चित्रे ५ ) अनुजङ्घास्थ्नोऽधःप्रान्तेन सन्ध्यर्थम्। अस्य चाधःप्रान्तस्य निम्नप्रदेशे खातोदरं सन्धिलक्ष्म (५म चित्रे ६ ) कूर्चशिरसा सन्ध्यर्थम्। अस्यैव पुनरधःप्रान्तस्यान्तःसीम्नि प्रवर्द्धनकमन्तर्गुल्फभूतम्, तदन्तःस्थञ्च सन्धिलक्ष्म कूर्चशिरसो बहिःसीम्ना सन्ध्यर्थम्। अस्य चान्तर्गुल्फप्रवर्द्धनकस्य पश्चात् दृश्यते सीताजङ्घानुगायाः पादाङ्गुलिसंकोचन्या दीर्घायाश्च पेश्याः कण्डरान्तविवर्त्तनाय। अत्र च प्रवर्द्धनके संयुज्यते गुल्फसन्धिबन्धनी स्नायुः।

मध्यनलकं (काण्डं) तु जङ्घास्थ्नः—ईषद्वक्राकारं बहिःसीम्नि खातोदरञ्च। तिस्रश्चास्मिन् परिस्फुटाः धारा[2]ः, तासां पुरोवर्त्तिनी त्वचोऽधस्तादनुभवनीया। बहिःसीमस्थायां धारायां संयुज्यते अस्थिद्वयमध्यवर्त्तिनी जङ्घान्तरालाख्या[3] कला ( ५म चित्रे ८ अङ्किते ऽवकाशे )। पश्चिमायां पुनर्धारायां जंघापश्चिमपेशीनां निवेशः।

**अनुजङ्घास्थि** नाम—( ५मं चित्रम् ) दीर्घयष्ट्याकारं जङ्घास्थ्नोऽनुगतं द्वितीयं जङ्घानिष्पादकमस्थि। अस्यापि द्वौ प्रान्तौ मध्यनलकञ्चेति त्रयो भागाः।

तस्योर्द्ध्वप्रान्तः—जङ्घास्थ्न ऊर्द्ध्वप्रान्तेन सन्धीयते तद्बहिः पश्चिमतः ( ५म चित्रे ४)। बहिः सीम्नि चास्योत्सेधो (५म चित्रे ८) जानुसन्धिबन्धन्या दीर्घस्नायोः संयोगाय। अस्यैव पश्चिमतश्चूड़ाकारं प्रवर्द्धनकं द्विशिरस्का[4]ख्यपेश्याः, जानुसन्धिबन्धन्या ह्रस्वस्नायोश्च संयोगाय।

अधःप्रान्तस्तु—अनुजङ्घास्थ्नः बहिर्गुल्फनिष्पादकम्। तस्यान्तःप्रदेशस्त्रिकोणेन सन्धिलक्ष्मणाऽङ्कितः कूर्चशिरसा सन्धानार्थम्। अन्यच्चात्रैव सन्धि-

---

१ Semimembranosus. २ Borders. ३ Interossesus Membrane. ४ Biceps Muscle.

लक्ष्म जङ्घास्थ्नोऽधःप्रान्तस्य बहिःपार्श्वेण सन्धानाय। पश्चिमतश्चास्य सीता पादविवर्त्तन्याख्यपेशीद्वयस्य कण्डरान्तविवर्त्तनाय। परितश्चास्य प्रान्तस्य सम्बध्यते बहिःसौमरथा गुल्फसन्धिबन्धनो स्नायुः।

मध्यनलकम्—पुनरनुजङ्घास्थ्नः किञ्चिद्‌विवृत्तकायं, धारात्रयाङ्कितञ्च, तत्रान्तःसीम्नि या रेखा तस्यां सम्बध्यते जंघान्तरालाख्या कला। अत्र संयुज्यन्ते अष्टौ जङ्घापेश्यः। तद्विस्तरः पेश्यध्याये द्रष्टव्यः।

जान्वस्थि नाम—(षष्ठं चित्रम्) वृत्तप्रायं जानोः पुरःस्थं कपालास्थि। तदिदं सक्थिप्रसारणीपेशीनां सम्मिलितायाःकण्डरायाः प्रान्तस्थं हृदाकारं चणकास्थीति केचित्।

## [ षष्ठ चित्रम् ]



( पश्चिमभागः )



( पुरोभागः )

अस्य च जान्वस्थ्नः पुरोदेशः ईषदुच्चावचः, तत्र संयुज्यते सक्थिप्रसारणीपेशीनां कण्डरा सम्मिलिता (षष्ठचित्रे पे)। पश्चिमप्रदेशस्तु मध्योन्नतः सन्धिलक्ष्मणोपलक्षितश्च ( षष्ठचित्रे सं )। तस्य च ऊर्द्धार्द्धः सन्धिलक्ष्मण ऊर्वस्थ्नो निम्नप्रान्तपुरोभागेन सन्धानार्थम्, अधोऽर्द्धः पुनर्जङ्घास्थ्न ऊर्द्धप्रान्तपुरोभागेन सन्धानाय। समन्तात् पुनरस्य जानुकपालस्य सम्बध्यते जानुसन्धेः पुरश्छादकः स्नायुप्रच्छदः।

---

१ Patella.

[ ७म चित्रम् ]
ऊर्व्वस्थि ।




**ऊर्व्वस्थि[1] नाम**—( ७म चित्रम् ) दृढ़-दीर्घ्वृहत्तमं शरीरास्थ्नाम् बहुभारसहञ्च । तत् प्रायःसुवृत्तवंशाकारमीषद्वक्रञ्च कङ्काले श्रोणि-पार्श्वाज्जानुसन्धिं यावत् तिर्य्यगभिगतम् । इतर-नलकास्थिवदस्यापि त्रयो भागाः—ऊर्द्ध प्रान्तोऽधः-प्रान्तो मध्यनलकश्चेति ।

तत्रोर्द्ध प्रान्ते लक्षणीयानि—वर्त्तुलप्रायं मुण्डं ( ७म चित्रे १ ), तदधःस्था ग्रीवा ( तत्रैव २ ), तदधःस्थे शिखराकारे प्रवर्द्धनके पश्चान्मुखे महाशिखरकं लघुशिखरकञ्च नामतः (तत्रैव ३,४) ।

तत्र **मुण्डं नाम**—( ७म चित्रे १ ) वर्त्तुलार्द्ध-व्यापिना सन्धिलक्ष्मणोपलक्षितम्, विवर्त्तते च तद् वंक्षणसन्धावुलूखलाख्ये । मध्यतो गर्त्तयुतञ्च तत् वंक्षणसन्धिमध्यस्थायाः स्नायुरज्ज्वाः प्रवेशाय ।

**ग्रीवा नाम** (७म चित्रे २)— ऊर्व्वस्थ्न ऊर्द्धप्रान्त-पार्श्वात् वक्रं समुद्गतमूर्द्धान्तर्मुखं प्रवर्द्धनकम् । सेयं वयःपरिणामेण क्रमादृजुप्राया भवति भङ्गुरा च । अत्र च दृश्यन्ते अस्थिधमनीद्वाराणि[2] बहुशः ।

**महाशिखरकन्तु[3]** (७म चित्रे ३)— मध्यनलकस्य शिखरभूतं चतुष्कोणकल्पं विषमवहिःपार्श्वं प्रव-र्द्धनकम् । तस्य च विषमपार्श्वैकदेशाश्रयेण विवर्त्तते महती नितम्बपिण्डिकाख्या[4] पेशी श्लेषधरकलापुट-क[5]व्यवधानेन । संयुज्यन्ते चात्रैव षट् नितम्बपेश्यः ।

**७म चित्रव्याख्या** । १ मुण्डं, २ ग्रीवा, ३ महाशिखरकं, ४ लघुशिखरकम् । ३—४ मध्यतो रेखा पुरःस्था शिखरान्तराला नाम । ५ महाशिखरायस्थं कोटरम् । ६, ७ उपार्व्वुदद्वयम् । सं—जानुसन्धिलक्ष्म ८,९—महार्व्वुदद्वयम् । पेशीनिवेशास्तु—पे १ द्व्यन्त गुण्डिका, अस्यैवाधः श्रोणिगवाक्षिणी अन्तःस्था यमलाद्वयञ्च । पे २ मध्यमा श्रोणिपिण्डिका । पे ३ ऊरुप्रसारणी अन्तःस्था । पे ४ ऊरुप्रसारणी मध्यस्था । १० गरिष्ठा ऊरुव्यूहिनी ।

---

१ Femur. २ Nutrient foramina. ३ Trochanter major. ४ Gluteus Maximus
५ Synovial Bursa.

अन्त:सीम्नि पुनर्महाशिखरस्याङ्गुल्यग्रप्रवेशार्हं कोटरम् (७म चित्रे ५) तत्र वहि:स्थाया: श्रोणिगवाक्षिणी[१] पेश्या: निवेश:।

लघुशिखरकं[२] नाम—(७म चित्रे ४) ऊर्वस्थिग्रीवाया अधो मूलत: पश्चिमस्थं ह्रस्वं प्रवर्द्धनकम्। तत्र निविशते (तत्रैव ४ अङ्कं परित:) दीर्घा कटिलम्बिनी[३] नाम पेशी। अधश्चास्य शिखरकस्य श्रोणिपक्षिणी[४] नाम पेशी।

अनयोश्च शिखरकयोर्मध्ये पुर: पश्चाच्च द्वे रेखे शिखरान्तराले नाम। तयो: सम्बध्येते वंक्षण-सन्धिच्छादनस्य स्नायुकोषस्य पूर्व्वपश्चिमौ भागौ। पश्चिमशिखरान्तराला तु रेखा निम्नतो मध्यनलकं समनुगता, तत्र सम्बध्यते ऊरुचतुरस्रा[५] नाम पेशी।

मध्यनलकन्तु ऊर्वस्थ्न:—पुरस्तादनुवक्रमुभयोरन्तयोरायतं मध्ये त्रिधारप्रायञ्च। अस्य पुरोभागादुद्भवति (७म चित्रे पे ४) मध्यस्था ऊरुप्रसारणी[६] नाम पेशी। मध्यभागे पश्चिमतो दृश्यते प्राकारिका[७] नाम रेखा ऊर्द्ध्वमधश्च द्विधारा। तत्रोर्द्ध्ववर्त्ति यद् धाराद्वयं तत् प्रसरति महाशिखरकं लघुशिखरकञ्च यावत्। अधोवर्त्ति रेखाद्वितयं तावदूर्व्वस्थ्न: अध:प्रान्तस्थाभ्यां महार्व्वुदाभ्यां सङ्गतम्। अस्या एव चतुर्भुजाया: प्राकारिकाख्यरेखाया: प्रान्तभागेष्वन्तरालेषु च सम्बध्यन्ते निखिला ऊरुपश्चिमस्था: पेश्य:। तद्विवरणं पेश्यध्याये।

अध:प्रान्ते—पुनरूर्व्वस्थ्नो लक्षणीयानि—द्वे महार्व्वुदे (कन्दद्वयम्) (७म चित्रे ८, ८), अर्व्वुदान्तरालं, द्वे उपार्व्वुदे (तत्रैव ६, ७) चेति।

तत्र महार्व्वुदे[८] द्वे कन्दापरपर्य्याये वाह्यमाभ्यन्तरञ्च जानुसन्धिनिर्म्माणाय। तयो: पृष्ठत: कोटरं जानुसन्धिमध्यस्थाया: स्वस्तिकाख्यस्नायो: प्रवेशाय। तत्रैवोर्द्ध्वमुभयत: सम्बध्यते जंघापिण्डिकाख्य[९]पेश्या: शीर्षद्वयम्। तन्मध्यतो जानुपृष्ठस्थधमन्या: स्थानम्। वाह्यार्व्वुदस्य तु पार्श्वत: सम्बध्यते जानुपृष्ठिकाख्या[१०] पेशी। अर्व्वुदयोर्मध्यत: पुरस्त्रिकोणप्रायं सन्धिलक्ष्म (७म चित्रे सं) तदाश्रित्य सन्धीयते जानुकपालम्।

उपार्व्वुदे[११] द्वे, तयो: संयुज्येते जानुसन्धिवन्धन्यौ स्नायुरज्जू। तत्रान्तरमुपार्व्वुदं कलायकाकारेणोत्सेधेनोपलक्षितं तत्र (७म चित्रे १०) निविशते गरिष्ठा ऊरुव्यूहिनी[१२] नाम पेशी। त्रिंशदेवमेकस्मिन् सक्थ्नि वर्णितान्यस्थीनि। एवमपरेऽपि।

---

१ Obturator Externus. २ Trochanter minor. ३ Psoas Magnus ४ Iliacus ५ Qadratus Femoris. ६ Crureus or Vastus Intermidis. ७ Linea Aspera. ८ Condyles. ९ Gastrocnimius. १० Poplitieus. ११ Tuberosities. १२ Adductor Magnus.

## अथ बाह्वस्थीनि ।

अथेदानीं बाह्वस्थीनि ब्रूमः। तत्र प्रतिबाहु त्रिंशदस्थीनि। तद्यथा—

( अष्टमचित्रम्—पाणि-पुरोभागः । )



कराङ्गुलीषु चतुर्दश, करमध्ये मूलशलाकाः पञ्च, करमूले कूर्चास्थीन्यष्टौ—( इति प्रतिकरं सप्तविंशतिः ), प्रकोष्ठे द्वे, प्रगण्डे चैकमिति ।

तत्रादौ करास्थीनि ।

### कराङ्गुल्यस्थीनि—

एकैकस्यां कराङ्गुल्यां त्रीणि त्रीणि द्वे अङ्गुष्ठे ; तानि कराङ्गुलीनलकानि[1] नाम प्रतिकरं चतुर्दश । तानि तिसृषु श्रेणीषु विभक्तानि । तत्र अग्रिमश्रेण्यां पञ्च, मध्यमश्रेण्यां चत्वारि[2], पश्चिमश्रेण्यां पञ्च । तेष्वग्रिमाणि पञ्च पुरतो मुक्तावितताग्राणि नखधारणाय ; सन्धीयन्ते चैतानि पश्चिमतोऽङ्गुलीनलकैर्मध्यश्रेणीस्थैरन्य-

**अष्टमचित्र-व्याख्या**—१ नौनिभम् २ अर्द्धचन्द्रम् ३ उपलकं ४ वर्त्तुलकं ५ पर्य्याणकं ६ कूटकं ७ मध्यकूटं ८ फणधरम्—इत्यष्टौ करकूर्चास्थीनि। अथ पेशीनिवेशाः—पे १ पे २ पे ३—इत्यत्र अङ्गुलीसंवृद्धिन्यः पेश्यः। पे ४ अङ्गुलीसंकोचन्यः मध्यपर्व्विकाः। पे ५ अङ्गुलीसंकोचन्यः अग्रपर्विकाः। पे ६ कनिष्ठापकर्षिणी, ह्रस्वा कनिष्ठासंकोचनी च। पे ७ कनिष्ठामूलकर्षिणी। पे ८ अङ्गुष्ठमूलकर्षिणी पे ९ अङ्गुष्ठसंकोचनी दीर्घा। पे १० अङ्गुष्ठसंकोचनी ह्रस्वा। पे ११ अङ्गुष्ठमूलकर्षिणी। पे १२ पे १६ अङ्गुष्ठापकर्षिणी। पे १३ पे १५ अङ्गुष्ठजापिनी। पे १४ अङ्गुष्ठविस्तारिणी। पे १७ पाणिसंकोचनी अन्तःस्था। पे १८ कनिष्ठापकर्षिणी ।

---

१ अङ्गुलीनलकानि = Phalanges. २ अङ्गुष्ठे मध्यमनलकाभावात् ।

वाङ्गुष्ठात्, अङ्गुष्ठे[१] तु पश्चिमनलकाग्रेण सन्धिः मध्यमनलकाभावात्। मध्यश्रेणीस्थानि चत्वारि तूभयतः[२] सन्धिमन्ति। पश्चिमश्रेणीस्थानि पञ्च तान्यप्येवम्।

**कराङ्गुलीमूलशलाकाः[३]**—कराङ्गुलीनां मूलतः प्रतिकरं पञ्च शलाकास्ताः कराङ्गुलीमूलशलाका नाम, ताभिरालम्ब्यते करतलम्। मूलतश्च तानि यथायथं कूर्च्चास्थिभिः सन्धीयन्ते, अग्रतश्च पश्चिमाङ्गुलीनलकैः। अतएव कूर्च्चास्थ्नां "शलाकाधिष्ठान"-संज्ञा। तत्रेमे विशेषाः।

**प्रथमा—अङ्गुष्ठमूलशलाका** नाम, सा मूलशलाकासु ह्रस्वतमा मूलतश्चैकेन सन्धिलक्ष्मणोपलक्षिता पर्य्याणकाख्येन कूर्च्चास्थ्ना सन्ध्यर्थम्।

**द्वितीया तर्ज्जनीमूलशलाका** नाम, सा मूलतश्चतुर्भिः सन्धिलक्ष्मभिरुपलक्षिता पर्य्याणक-कूटक-मध्यकूटाख्यैस्त्रिभिः कूर्च्चास्थिभिः मध्यमामूलशलाका-मूलपार्श्वेन च सन्धानाय।

**तृतीया—मध्यमामूलशलाका** नाम, सा त्रिभिः सन्धिलक्ष्मभिरङ्किता मूलतः, मध्ये मध्यकूटाख्येन कूर्च्चास्थ्ना, उभयतश्च तर्ज्जन्यनामिकयोः मूलशलाकामूलपार्श्वाभ्यां सन्ध्यर्थम्।

**चतुर्थी—अनामिकामूलशलाका** नाम, सा सन्धिलक्ष्मचतुष्टयेणाङ्किता मूलतः। तत्र मध्यस्थे सन्धिलक्ष्मणी मध्यकूट-फणधर-संज्ञाभ्यां कूर्च्चास्थिभ्यां सन्धानाय। पार्श्वगे तु सन्धिलक्ष्मणी तर्ज्जनीकनिष्ठयोः मूलशलाकामूलपार्श्वाभ्यां सन्धिसूचनाय।

**पञ्चमी—कनिष्ठामूलशलाका** नाम, तस्याः मूलतो द्वे सन्धिलक्ष्मणी, तत्रैकं फणधरेणापरमनामिकामूलशलाकामूलपार्श्वेन सन्ध्यर्थम्।

ता एताः कर-मूलशलाका व्याख्याताः। तासां नानास्थिभिः सन्धिप्रकारस्मरणार्थं श्लोकास्तु पादास्थिवदेव, केवलं तत्रैव "पादमूलशलाका" इत्यत्र "करे मूलशलाका" इति पाठ-परिवृत्तिः।

---

१ पुरोऽङ्गुलीनलकैः पश्चात् पश्चिमनलकैः। २ उभयतः सन्धिमन्तीत्यर्थः। सन्धिश्च कनिष्ठाद्यङ्गुलीचतुष्टये पुरो मध्यनलकैरङ्गुष्ठे पुरोऽग्रिमनलकेन, पश्चात्तु पञ्चस्वपि अङ्गुलीमूलशलाकाग्रैः। ३ कराङ्गुलीमूलशलाकाः = Metacarpals. ४ १९ पृष्ठे।

**अथ करकूर्चास्थीनि**[1]—कर-कूर्चास्थीनि नाम मणिवन्धनिर्मापकाणि तनुह्रस्वविषमाणि प्रतिकरमष्टौ। तान्येव कर-"शलाकाधिष्ठानानि" नाम। तानि श्रेणीद्वयविन्यस्तानि। तत्रोर्द्ध्वश्रेण्यां चत्वारि, क्रमेण नौनिभार्द्धचन्द्रोपलक वर्त्तुलकाख्यानि। अधःश्रेण्यां चत्वारि, पर्य्याणक-कूटक-मध्यकूट-फणधर संज्ञानि। तत्रोर्द्ध्वश्रेणीस्थानां चतुर्णां मध्ये प्रथमानि त्रीणि मणिबन्धसन्धौ प्रविष्टानि। वर्त्तुलकाख्यन्तु वहिः सन्धितः, तत् कण्डरान्तरीयं चणकास्थीति केचित्। तत्र—

**नौनिभं**[2] नाम—(८म चित्रे १) नावाकारं कूर्चास्थि, तुल्यसंज्ञेन पाद-कूर्चास्थ्ना सदृशम्। तद्वहिःस्थेन क्षुद्रार्वुदेनोपलक्षितं, ऊर्द्ध्वं सन्धिलक्ष्मयुतञ्च प्रकोष्ठास्थ्नः अधःप्रान्तेन सम्यर्थम्। अस्य पार्श्वतः खातोदरं सन्धिलक्ष्म अर्द्ध-चन्द्रमध्यकूटकयोः पार्श्वाभ्यां सन्धानाय। निम्नसीम्नि च सन्धिलक्ष्म पर्य्याणक-कूटकयोरूर्द्ध्वप्रान्ताभ्यां सम्यर्थम्। पश्चिमतश्च नौनिभस्य उच्चावचा रेखा मणि-वन्धस्नायुसूत्राणां संयोगाय।

**अर्द्धचन्द्रं**[3] नाम—(८म चित्रे २) तादृशाकारेण सन्धिलक्ष्मणा वहिरुप-लक्षितं कूर्चास्थि, तत्रार्द्धचन्द्रलक्ष्मणा नौनिभेन सह सन्धिः। अपरञ्चास्य शिरसि सन्धिलक्ष्म वहिःप्रकोष्ठास्थिप्रान्तेन सम्यर्थम्, इतराणि तु सन्धिलक्ष्माणि उपलक-फणधर-मध्यकूट-संज्ञैः कूर्चास्थिभिः सन्धिसूचकानि।

**उपलकं**[4] नाम—तृतीयं कूर्चास्थि न्युब्जपृष्ठं सन्धिलक्ष्माङ्कितञ्चोपरिष्टात् मणिवन्ध-सन्धि-मध्यवर्त्तिना त्रिकोणतरुणास्थ्ना सन्धानाय। त्रीण्यत्र चापराणि सन्धिलक्ष्माणि क्रमेण अर्द्धचन्द्र-फणधर-वर्त्तुलकाख्यैः कूर्चास्थिभिः सम्यर्थम्।

**वर्त्तुलकं**[5] नाम—प्रायेण वर्त्तुलाकारं क्षुद्रतमं कूर्चास्थि। सन्धिलक्ष्म चात्रैकमुपलकेन सन्धिव्यञ्जनाय।

---

१ Carpal Bones. २ नौनिभं = Scaphoid. ३ अर्द्धचन्द्रम् = Semilunar. ४ उपलकं = Cuneiform. ५ वर्त्तुलकं = Pisiform.

पर्य्याणकं[1] नाम—पृष्ठतः पर्य्याणकाकारेण सन्धिलक्ष्मणा चिह्नितमङ्गुष्ठ-मूलशलाकामूलेन सन्धानाय। त्रीणि चात्रापराणि सन्धिलक्ष्माणि क्रमेण नौनिभ-कूटक-तर्ज्जनीमूलशलाकामूलैः सन्ध्यर्थम्। गभीरा चास्य मध्यतः स्रोता बहिस्थायाः पाणिसङ्कोचन्यौ[2]ख्यपेश्याः कण्डरान्तविवर्त्तनाय।

कूटकं[3] नाम—कूटाकारं क्षुद्रं कूर्चास्थि। तत्र चत्वारि सन्धिलक्ष्माणि। तेषामूर्द्ध्वतनं नौनिभेन, बहिःस्रोमस्थं पर्य्याणकेन, अन्तःस्रोमस्थं मध्यकूटकेन, अधःस्रोमस्थं तर्ज्जनीमूलशलाकामूलेन सन्धिमत्।

मध्यकूटं[4] नाम—बृहत्तमं कूर्चास्थि, तद् ऊर्द्ध्वतः सन्धिलक्ष्माङ्कितेन मुण्डेनोपलक्षितमर्द्धचन्द्राख्यकूर्चास्थ्ना सन्ध्यर्थम्। बहिःस्रोम्नि चास्य द्विभाग-विभक्तं सन्धिलाञ्छनं क्रमेण नौनिभ-कूटकाभ्यां सन्धिसूचकम्, अन्तःस्रोम्नि चात्रैकं सन्धिलक्ष्म फणधरपार्श्वेण सन्ध्यर्थम्। अधस्तु सन्धिलाञ्छनं तर्ज्जनीमध्य-मानामिकानां मूलशलाकामूलैः सन्धानाय।

फणधरं[5] नाम—सर्पफणाकारेण प्रवर्द्धनकेनोपलक्षितं त्रिकोणप्रायं कूर्चास्थि। तद् ऊर्द्ध्वतः कोणाकारं मध्यकूटकोपलकयोरन्तरालप्रविष्टम्, पार्श्व-योश्च ताभ्यामेव सन्धिमत्। निम्नतश्चात्र द्विभागविभक्तं सन्धिलक्ष्म अनामिका-कनिष्ठामूलशलाकामूलाभ्यां सन्ध्यर्थम्। अस्य च फणोदरे विवर्त्तन्ते अङ्गुलो-सङ्कोचनीपेशीनां कण्डराः।

सर्व्वाणि च कूर्चास्थीनि सन्धिलक्ष्मवर्ज्जमन्यत्र उच्चावचानि मणिबन्धस्नायु-सूत्राणां संयोगाय। तदेवं करास्थीनि व्याख्यातानि।

---

१ पर्य्याणकं = Trapezium. २ Fexor Carpi Radialis. ३ कूटकं = Trapezoid. ४ मध्यकूटं = Os magnum. ५ फणधरं = Unciform.

[ ८म चित्रम्—प्रकोष्ठास्थिनी ]




## अथ प्रकोष्ठास्थिनी।

प्रकोष्ठास्थिनी तु द्वे प्रायस्तुल्यपरिणाहे। तत्रैकं बहिःसीमस्थमङ्गुष्ठानुपूर्व्या स्थितं, तद् **बहिःप्रकोष्ठास्थि** नाम। अपरमन्तःसीमस्थं कनिष्ठानुपूर्व्या स्थितं तद् **अन्तःप्रकोष्ठास्थि** नाम। तयोः प्रथमं प्रधानतो मणिवन्धसन्धिधारकमधःप्रान्तेन। द्वितीयं कूर्परसन्धिनिष्पादक मूर्द्धप्रान्तेन। उभयोरपि क्वचित् 'अरत्नि'-संज्ञयापि व्यपदेशः।[1]

तत्र—**बहिःप्रकोष्ठास्थि**[2] नाम प्रकोष्ठबहिर्भागनिष्पादकं नलकास्थि। तस्य त्रयो भागाः—ऊर्द्धप्रान्तोऽधःप्रान्तो मध्यनलकश्च।

तस्योर्द्ध्वप्रान्तस्तावत् चक्राकारेण कोरमध्येन मुण्डेनोपलक्षितः (८म चित्रे १)। कोरे चात्र (तत्रैव १ सं)विवर्त्तते प्रगण्डास्थ्नोऽधःप्रान्तीया कन्दली। अन्तःसीम्नि च मुण्डस्यार्द्धचन्द्राकारं सन्धिलक्ष्म (तत्रैव सं२) तद् अन्तःप्रकोष्ठास्थ्न ऊर्द्धप्रान्तेन (तत्रैव ८ सं) सम्बध्यम्। तदाश्रित्य च विवर्त्तते तदस्थिमुण्डं कूर्परसन्धिमध्यतः।

**८मचित्र-व्याख्या**—<u>बहिःप्रकोष्ठास्थ्नः</u>—१ चक्रमुण्डं, २ ग्रीवा, १ सं ऊर्ध्वस्थिकन्दल्या सन्धिमत् कोरं, २ सं अन्तःप्रकोष्ठास्थि-पार्श्वेन सन्धिमत् ३ अर्बुदोत्सेधः—द्विशिरस्काख्यपेशीनिवेशाय। बहिर्मणिकः ४ सं अन्तःप्रकोष्ठास्थ्ना सन्धिसूचकम् ३ सं मणिवन्धसन्धिलक्ष्म। ५ सीता ( कण्डराविवर्त्तनाय। ) <u>अन्तःप्रकोष्ठास्थ्नः</u>—६ कूर्परकूटम् ७ चञ्चुप्रवर्द्धनम् ८ मणिमुण्डं ९ अन्तर्मणिकः। ५ सं बहिःप्रकोष्ठास्थ्ना सन्धिसूचकं ८ सं, चक्रनेमिखातस्थं सन्धिलक्ष्म। ७ सं, प्रगण्डास्थ्नो डमरुप्रवर्द्धनकेन सन्धिमत्। अत्रैतयं निविशन्ते पेश्यः—पे १ पे ५ इत्यनयोः—करोत्तानिनी। पे २ अङ्गुलीसंकोचनी दीर्घा। पे ३ करविवर्त्तनी उत्तरा (कङ्कणिका)। पे ४ अङ्गुलीसंकोचनी अग्रपर्व्विका। पे ६ कूर्परदारिका। पे ७ अङ्गुलीसंकोचनी मध्यपर्व्विका। पे ८ करविवर्त्तनी अधरा। ३ इत्यङ्कं परितः, द्विशिरस्का। क—प्रकोष्ठान्तराला कला।

---

१ प्राचां ग्रन्थेषु ( यथा च० शा० ७ अ. ) २ बहिःप्रकोष्ठास्थि = Radius.

मूलतश्चास्य मुण्डस्य ग्रीवेव ग्रीवा, तदधश्चार्बुदाकार उत्सेधः (तत्रैव क्रमात् २, ३) द्विशिरस्काख्यपेश्याः[1] कण्डरान्तसंयोगाय।

अधःप्रान्तस्तु वहिःप्रकोष्ठास्थ्न—स्त्रिकोणेन कोरोदरेण च सन्धिलक्ष्मणोपलक्षितो निम्नतः अर्द्धचन्द्र-नौनिभाख्यकूर्चास्थिद्वयेन सन्ध्यर्थम्। अन्तःसीम्नि चात्रापरं सन्धिलक्ष्म (८म चित्रे ४ सं०) तदन्तःप्रकोष्ठास्थ्नः अधःप्रान्तपार्श्वेन सन्धिं सूचयति। वहिःसीम्नि चात्र त्रिकोणकं प्रवर्द्धनकं बहिर्मणिको नाम (८म चित्रे ४) मणिवन्धसन्धेर्बाह्यस्नायुरज्जुसंयोगाय। तदेतत् त्वचोऽधस्तादनुभवनीयम्। अस्य बहिः पश्चिमतश्च दृश्यन्ते स्रोताः (८म चित्रे ५) अङ्गुष्ठप्रसारणीनां पेशीनां कण्डरान्त गतागताय।

मध्यनलकं पुनर्वहिःप्रकोष्ठास्थ्न—स्त्रिधारमीषद्वक्रमन्तःसीम्नि खरधारञ्च। खरधारायाञ्च संयुज्यते प्रकोष्ठास्थ्नोरन्तरालस्था कला (८म चित्रे क)।

पुरश्च मध्यनलकस्य दृश्यते स्फुटमस्थिधमनीविवरम्।

मध्यनलके चेह निविष्टाः प्रकोष्ठास्थिपेशीनां द्वादशानां मध्ये अष्टौ यथास्थानम्। तद्विवरणमग्रे।

**अन्तःप्रकोष्ठास्थि[2]** नाम—प्रकोष्ठस्यान्तःसीम्नि स्थितं नलकास्थि। तस्य त्रयो भागाः—ऊर्द्ध्वप्रान्तोऽधःप्रान्तो मध्यनलकश्चेति।

तत्रोर्द्ध्वप्रान्तः—स्थूलतरः प्रवर्द्धनकाभ्यामुपलक्षितश्च। तयोरूर्द्ध्वप्रवर्द्धनकं कूर्परकूटं नाम (तत्रैव ६)। तदिदं सर्पफणाकारं पुरःस्थितेनोन्नतमध्येन सन्धिलक्ष्मणोपलक्षितञ्च। तस्य च चूड़ाग्रं निविशते प्रगण्डास्थ्नोऽधःप्रान्तस्य पश्चिमस्थे खाते, सन्धिलक्ष्म तु प्रगण्डास्थ्नोऽधःप्रान्तवर्त्तिना डमरुकाकारेण सन्धिलक्ष्मणा सन्धिं सूचयति। पश्चिमतः पुनरस्य प्रवर्द्धनकस्योत्सेधः कूर्परनिष्पादकः त्वचोऽधस्तादनुभवनीयश्च। अस्यैव प्रवर्द्धनकस्य पार्श्ववर्त्तिन्योः रेखयोः संयुज्यते त्रिशिरस्काख्या[3] पेशी। कूर्परकूटमेव जानुकपालसादृश्यात् कूर्परकपालिकेति प्राच्चः।

अत्रैवाधःस्तनं प्रवर्द्धनकं चञ्च्वाकारम् चञ्चुप्रवर्द्धनं नाम। तदिदं पुरस्त्रिकोणाग्रं शिरसि सन्धिलक्ष्मयुतञ्च। विवर्त्तते चैतत् प्रगण्डास्थ्नोऽधःप्रान्तीयं डमरुकाकारं सन्धिलक्ष्म समाश्रित्य। अग्रञ्चास्य प्रवर्द्धनकस्य निविशते तस्यैव डमरु-

---

१ Biceps. २ Ulna. ३ Triceps.

सन्धिलक्ष्मणः पुरःस्थे खाते (८म-१०म चित्रयोर्द्रष्टव्यम्)। अधश्चास्य विषमः प्रदेशः, तत्र संयुज्यते कूर्परदारिकाख्या पेशी (८म चित्रे पे ६)।

बहिःसीम्नि पुनरन्तःप्रकोष्ठास्थ्न ऊर्द्ध प्रान्तस्य दृश्यते कोरमध्यमपरं सन्धिलक्ष्म (तत्रैव सं ८) यदाश्रित्य विवर्त्तते बहिःप्रकोष्ठास्थ्न ऊर्द्धप्रान्तीया चक्रनेमिः स्वेन सन्धिलक्ष्मणा (तत्रैव सं २)। तदिदं चक्रनेमिखातं नाम।

अनयोश्च प्रवर्द्धनकयोश्चक्रनेमिखातस्य च परिधौ संयुज्यते कूर्परसन्धिबन्धनः स्नायुकोषः। ओष्ठप्रवर्द्धनकस्यान्तःसीम्नि चोत्सेधो मूलतश्च रेखा, क्रमेण 'अङ्गुलीसंकोचनी अग्रपर्विका', 'करोत्तानिनी' च—इत्याख्ययोः पेश्योः[२] कण्डरानिवेशाय।

मध्यनलकस्तु तावदन्तःप्रकोष्ठास्थ्नस्त्रिधारं बहिःसीम्नि तीक्ष्णधारश्च, तस्य पुरोभागे मध्यतः अस्थिधमनीविवरद्वारम्। तत्र बाह्यसीमस्थायां तीक्ष्णधारायां संयुज्यते प्रकोष्ठान्तरालस्था कला (नवम चित्रे क)।

अत्र च मध्यनलके संयुज्यन्ते द्वादशानां प्रकोष्ठपेशीनां मध्ये नव पेश्यो यथास्थानम्। [तद्विवरणं चित्रे पेश्यध्याये च द्रष्टव्यम्]।

अधःप्रान्तस्तु अन्तःप्रकोष्ठास्थ्नो— वर्त्तुलप्रायेणान्तःसीम्नि प्रवर्द्धनकवता मणिमुण्ड[३]ाख्येन वर्त्तुलेनोपलक्षितः (नवम चित्रे २)। तच्च प्रवर्द्धनकमन्तर्मणिको[४] नाम (तत्रैव ८), तत्र संयुज्यते मणिवन्धसन्धेरन्तःसीमस्था स्नायुरज्जुः। तस्य च पश्चिमस्थायां सीतायां विवर्त्तते 'अन्तःस्थायाः करप्रसारणी' पेश्याः[५] कण्डरा। मणिमुण्डश्च सन्धिलाञ्छनाङ्कितं पार्श्वतः बहिःप्रकोष्ठास्थ्नोऽधःप्रान्तेन सन्ध्यर्थं (तत्रैव ४सं), तदधश्च सन्धीयते मणिवन्धसन्ध्यन्तरालस्थं त्रिकोणं तरुणास्थि (तत्रैव ५सं इत्यत्र)।

---

१ Brachialis. २ Flexor Sublimis Digitorum & Prnotaor Radi Teres. ३ मणिकाख्यप्रवर्द्धनधारणात् मणिमुण्ड-संज्ञा। मणिकसंज्ञा तु चरककृता (च० शा०७ अ०)। ४ Styloid Process. ५ Extensor Carpi Ulnaris.

[ १०म चित्रं—प्रगण्डास्थि ]

( ऊर्द्धम् )




( अधः )

# अथ प्रगण्डास्थि।

**प्रगण्डास्थि[1] नाम**—(१०म चित्रम्) बाह्वस्थ्नां स्थूलतमं नलकास्थि। तस्य त्रयो भागाः—ऊर्द्ध प्रान्तोऽधःप्रान्तो मध्य-नलकश्चेति।

तत्रोर्द्ध प्रान्तः—अर्द्धवर्त्तुलाकारेणान्तर्मुखेन मुण्डेनोपलक्षितः (१०म चित्रे १)। तदिदं मुण्डमंसपीठस्थे[2] खाते सन्धीयते श्लक्ष्णेन सन्धिलक्ष्मणा, तत्परितश्च निबध्यते अंससन्धिबन्धनः स्नायुकोषः।

अधश्चास्य मुण्डस्य द्वावुत्सेधौ बाह्यसीम्नि पुरःसीम्नि च क्रमात् महापिण्डक लघुपिण्डक—संज्ञौ (१०म चित्रे २, ३)। तत्र महापिण्डकस्य शिखरतःपृष्ठतश्चोद्भवन्ति तिस्रः पेश्यः क्रमेण 'अंसपृष्ठिका उत्तरा[3]' (तत्रैव पे १) 'अंसपृष्ठिका अधरा[4]', 'अंसाधरिका लघ्वी[5]' च। लघुपिण्डके तु निविशते 'अंसान्तरिका[6]' नाम पेशी (तत्रैव पे २)। मध्ये च

**१०म-चित्रव्याख्या—**

१ मुण्डं २ महापिण्डकं ३ लघुपिण्डकं ४ पिण्डकद्वयमध्यगा परिखा। ५ बाह्यार्ब्बुदम् ६ आन्तरार्ब्बुदं ७ कन्दली ८ डमरुकं ९, १० ,पुरःखातद्वयम्। अथात्रैता निविशन्ते पेश्यः।—

पे १ अंसपृष्ठिका उत्तरा। पे २ अंसान्तरिका। पे ३ उरःप्रच्छदा गरिष्ठा। पे ४ कटिपार्श्वप्रच्छदा। पे ५ अंसाधरिका वृहती। पे ६ अंसपिण्डिका। पे ७ काकोष्ठिका। पे ८ कूर्परद्वारिका। पे ९ दीर्घा बाहुसंकोचनी। पे १० दीर्घा करप्रसारणी। पे ११ करप्रसारणी-पेशीचतुष्टयं, करोत्तानिनी च। पे १२ दीर्घा करविवर्त्तनी। पे १३ पाणिसंकोचनीपेशीद्वयम्, अङ्गुलीसंकोचनी मध्यपर्व्विका, करतलप्रसारणी च।

---

१ प्रगण्डास्थि=Humerus. २ अंसपीठं नाम अंसकपालस्य प्रदेशविशेषः। तद्विवरणं यथास्थानं द्रष्टव्यम्। ३ Supraspinatus. ४ Infraspinatus. ५ Teres minor. ६ Subscapularis.

पिण्डकयोः परिखा (तत्रैव ४) 'द्विशिरस्का'[१]ख्य-पेश्याः कण्डराधारणाय। तद्बहिस्तटे निविशते 'गरिष्ठा उरःप्रच्छदा'[२]ख्या पेशी (तत्रैव पे ३), तदन्तस्तटे च 'कटिपार्श्वप्रच्छदा'[३] (तत्रैव पे ४), तदधस्तात् 'अंसधारिका[४] बृहती' च (तत्रैव पे ५)।

मध्यनलकन्तु—प्रगण्डास्थ्न उपरिष्टाद्दण्डाकारमधस्तात् त्रिधारप्रायञ्च। तत्र मध्यतो बहिःसीम्नि ईषदुन्नतः प्रदेशः (१०म चित्रे पे ६) 'अंसपिण्डिका'[५]ख्यपेश्या निवेशाय। अस्याधो पश्चिमतो नातिगभीरा सीता गम्भीराख्यधमन्यादि[६]धारणाय। तस्याश्च तटयोः 'त्रिशिरस्का'[७]ख्यपेश्याः प्रभवस्थानम्। अन्तःसीम्नि च मध्यतः 'काकोष्ठिका'[८]ख्यपेश्या निवेशः (तत्रैव पे ७)। निम्नार्द्धपुरस्तलात्तु मध्यनलकस्य 'कूर्परदारिका'[९]ख्य-पेश्याः (तत्रैव पे ८) समुद्भवः।

अधोभागे पुनर्मध्यनलकस्य बाह्यान्तःसीम्नोर्द्वे धारे। तयोर्बाह्यधारायां क्रमात् 'दीर्घाया बाहुसंकोचन्यां[१०]:' (तत्रैव पे ९) 'दीर्घायाः करप्रसारण्यां[११]श्च' पेश्याः (तत्रैव पे १०) संयोगः। अमू च बाह्यान्तरीये धारे क्रमेण बाह्यान्तरीयाभ्यामर्व्वुदाभ्यां सङ्गते अधस्तात्।

अधःप्रान्ते—पुनः प्रगण्डास्थ्नो लक्षणीयानि क्रमादेतानि नाम। अर्व्वुदे द्वे बाह्यमाभ्यन्तरञ्च, कन्दली, डमरुकं, कूर्परखातं, पुरःखातद्वयञ्च। तत्र—

बाह्यार्व्वुदं—नाम (१०म चित्रे ५) बहिःसीमस्थ उत्सेधः। तत्र सम्बध्यते बहिःस्था कूर्परसन्धिबन्धनी स्नायुः। प्रभवश्चा[१२]यं चतसृणां 'करप्रसारणी'-पेशीनां सम्मिलितमूलानां, 'करोत्तानिन्यां[१३]श्च' पेश्याः (तत्रैव पे ११)। अस्यैव पृष्ठतः 'कूर्परपृष्ठिका[१४]ख्य'-पेश्याः समुद्भवः।

आन्तरार्व्वुदं—नाम (१०म चित्रे ६) अन्तःसीमस्थं स्फुटतरं त्रिकोणप्रायमर्व्वुदम्। तत्र सम्बध्यते कूर्परसन्धेरन्तःसीमस्था स्नायुरज्जुः। प्रभव-

१ Biceps. २ Pectoralis major. ३ Latissimus Dorsi. ४ Teres major. ५ Deltoid. ६ Superior Profunda Artery & Musculo-spiral Nerve. ७ Triceps. ८ Coraco-Brachialis. ९ Brachialis. १० Supinator Longus. ११ Extensor Carpi Radials Longior. १२ Common origin of Extensor Carpi Rad. Brev., Ext. Communis Digit., Ext. Minimi Digiti& Ext. Carpi Ulnaris. १३ Supinator Brevis. १४ Anconeus.

श्चायमुपरिष्टात् ( तत्रैव पे १२ ) 'दीर्घाया: करविवर्त्तन्या[1]ख्य'-पेश्या: ; तदधश्च ( तत्रैव पे १३ ) 'पाणिसंकोचन्या[2]ख्य'-पेशीद्वयस्य, 'मध्यपर्व्विकाया अङ्गुलीसंकोचन्या[3]:' 'करतलप्रसार[4]ख्या'श्च पेश्या:।

कन्दली—नाम ( १०म चित्रे ७ ) बाह्यार्व्वुदस्य पुरोवर्त्ती सन्धिलक्ष्माङ्कितो भाग:, यमाश्रित्य विवर्त्तते कुर्परसन्धिमध्यगं बहि:प्रकोष्ठास्थ्न: कोरमध्यं मुण्डम् ( ८म चित्रे १ )।

डमरुकं—नाम ( १०म चित्रे ८ ) डमरुसमाकारो निम्नमध्य: सन्धिलक्ष्मयुतो भाग:। सन्धीयते चेदमन्त:प्रकोष्ठास्थ्न ऊर्द्धप्रान्तस्थाभ्यां प्रवर्द्धनकाभ्याम् ( ८ म चित्रे ६, ७ )।

पुर:खातद्वयं—( १०म चित्रे ८, १० ) नाम सन्धिलक्ष्माङ्कितभागस्योर्द्धं पुरस्तादन्तर्बहि:सीम्नो: स्फुटं गर्त्तद्वितयं, तयो: क्रमान्निविशेते ( बाहुसंकोचे सति ) अन्त:प्रकोष्ठास्थ्न ऊर्द्धप्रान्तस्थं चञ्चुप्रवर्द्धनं ( ८म चित्रे ७) बहि:प्रकोष्ठास्थ्नो मुण्डाग्रञ्च।

कूर्परखातं—नाम प्रगण्डास्थ्नोऽध:प्रान्तस्थं पश्चिमखातं, तत्र धार्य्यते प्रसारितबाहो: कूर्परकूटाग्रम्[5]।

त्रिंशदेवमेकस्मिन् बाहावस्थीनि व्याख्यातानि एवमपरेऽपि। तदेतत् सविंशमस्थिशतं शाखासु व्याख्यातम्।

[ इति शाखास्थिविज्ञानीय: प्रथम: परिच्छेद: ]

---

१ Pronator Radil Teres. २ Flexor Carpi Radialis & Ulnaris. ३ Flexor Sublimis Digitorum. ४ Palmaris Longus. ५ कूर्परकूटं नाम अन्त:प्रकोष्ठास्थ्न ऊर्द्ध्वतनं प्रवर्द्धनकमित्युक्तपूर्व्वम् ( ८म चित्रे ६ )।

[ ११श चित्रम्—पृष्ठवंश: ]




# अथ द्वितीयो

## मध्यकायास्थिविज्ञानीय: परिच्छेद: ।

## तत्रादौ पृष्ठवंशं ब्रूम: ।

**पृष्ठवंशो**[१] हि मध्यालम्बनं कायस्य यमाश्रित्य वर्त्तन्ते शाखाश्चतस्र: शिरश्च । स च कशेरुका संज्ञैरुपर्य्युपरिसंहितैरीषच्चलैश्चतुर्व्विंशति-संख्यकैरस्थि-वलयै--र्निर्म्मित: पर्व्वभिरिव वंशदण्डोऽन्त:शुषिर: स्थूलश्चाधोऽध: ।

स चायं सन्धीयते ऊर्द्ध्वं शिरसा अधस्त्रिकास्थ्ना । [दृश्यतां द्वितीय-कङ्काल चित्रम् १६ पृष्ठस्य पुर: ] सम्मुखतो दृष्टश्च कंकाले प्रतिभाति त्रिधा धनुर्वक्र:, तत्र ग्रीवायां कट्याञ्च कूर्मपृष्ठवदुत्सङ्ग:, पृष्ठे तु खातोदरता (११ श चित्रम्) ।

तत्र ग्रीवायां कशेरुका: सप्त, पृष्ठे द्वादश, कट्यां पञ्चेति साकल्येन चतुर्व्विंशति: । त्रिकास्थि चानुत्रिकास्थि चेति द्वयमानुपूर्व्या स्थितमपि पृथगेव व्याख्यास्यते ।

**कशेरुका:**[२] नाम पृष्ठवंशनिर्म्मापकान्यस्थिवलयानि । तत्र सामान्यत: प्रतिकशेरुकं द्वौ भागौ प्रधानभूतौ—कशेरुपिण्डं, कशेरुचक्रञ्च सह प्रवर्द्धनकै: ( १२श चित्रम् ) ।

---

१ Vertebral Column or Spine.

२ Vertebiæ.

[ १२ श चित्रं—पृष्ठकशेरुका ]

[ पुरः ]




[ पश्चात् ]

तत्र **कशेरुपिण्डं**[१]—नाम पिण्डाकारो नातिघनसंघातः कशेरुपुरोभागः।

**कशेरुचक्रं**[२]—नाम स्वनामव्याख्यातः कशेरुकापरार्द्धः पश्चिमस्थः। तन्मध्ये सुषुम्नाविवरम्। तदिदं कशेरुचक्रं संसज्यते कशेरुपिण्डेनोभयतो चक्रमूलाभ्याम्, निर्मीयते च पत्रकाभ्याम्[३]। उपर्य्यधश्च प्रतिचक्रमूलमेकैकं छिद्रार्द्धं, तथा च प्रतिकशेरुचक्रं चत्वारि छिद्रार्द्धानि। तानि ऊर्द्धमधश्च संहितयोः कशेरुकयोश्छिद्रार्द्धैर्मिलित्वा सम्पद्यन्ते तावन्ति पूर्णच्छिद्राणि सुषुम्नाप्रताननिर्गमाय। अथात्र कशेरुचक्रे संगतानि सप्त प्रवर्द्धनकानि, तद्यथा—

**पृष्ठकण्टकं**[४]—नामैकं पश्चिमस्थं प्रवर्द्धनं त्वचोऽधस्तादनुभवनीयम्।

**कशेरुबाहु**[५]-संज्ञे द्वे पार्श्वयोः, त एव बाहुप्रवर्द्धन-संज्ञे।

**सन्धिप्रवर्द्धनकानि**[६]—चत्वारि, द्वे उपरिष्टात् द्वे चाधस्तात् सन्धिलक्ष्माङ्कितानि, तानि ऊर्द्धाधःकशेरुकासंयोजकानि। (तदेतदखिलं १२शचित्रे स्फुटम्)। तान्येतानि सर्व्वकशेरुका-साधारणानि[७] लिङ्गानि। विशेषोऽत ऊर्द्धम्।

---

१ कशेरुपिण्डम् = Body of a Vertebra, २ कशेरुचक्रम् = Arch. ३ पत्रकौ = Laminae. ४ पृष्ठकण्टकम् = Spinous process. ५ कशेरुबाहुः (बाहुप्रवर्द्धनकम्वा) = Transverse Process. ६ सन्धिप्रवर्द्धनकानि = Articular Processes. ७ सर्व्वकशेरुका-साधारणत्वेऽपि लिङ्गानां पृष्ठकशेरुकासु स्फुटतमत्वात् चित्रे पृष्ठकशेरुकैव प्रदर्शिता।

[ १३श चित्र—ग्रीवाकशेरुका ]

[ पुरः ]




[ पश्चात् ]

**१३श चित्रव्याख्या**—कम, कशेरुपिण्डं १, १, तस्यैव ओष्ठद्वयम्। २, २ बाहुप्रवर्द्धनके। ३,३ मातृकाच्छिद्रद्वयं ४, ४ सन्धिप्रवर्द्धनकद्वयमूर्द्धतलं, ५,५ तदेवाधस्तलम्। ६ सुषुम्नाविवरं, क—पृष्ठकण्टकम्।

## अथ ग्रीवाकशेरुकाः[1]—

ग्रीवाकशेरुकाः सप्त। तास्वेतान्यवच्छेदकलिङ्गानि—

(१) कशेरुपिण्डानि ह्रस्वानि घनायतपार्श्वान्योष्ठवन्ति च (१३श-चित्रे कम)।

(२) पत्रकाणि तनुह्रस्वानि अधोऽधः पत्रक-च्छादीनि च, सुषुम्नाविवरञ्च त्रिकोणप्रायम् (तत्रैव ६)।

(३) पृष्ठकण्टकानि द्विधाभिन्नाग्राणि, दीर्घतराणि च क्रमादधोऽधः (तत्रैव क)।

(४) बाहुप्रवर्द्धनकानि ह्रस्वानि द्विधाभिन्नानि (तत्रैव २. २), सच्छिद्राणि च 'मस्तिष्क-मातृका'[2]ख्ययोर्धमन्योरनुप्रवेशाय। अत एवैषां छिद्राणां (तत्रैव ३,३) 'मातृकाच्छिद्र' संज्ञा।

(५) सन्धिप्रवर्द्धनकानि ह्रस्वतमानि उत्तानानि च। (तत्रैव ४,४ ; ५,५)

[ १४श चित्र—प्रथमा ग्रीवाकशेरुका—चूडावलया नाम ]

[ पुरः ]




[ पश्चात् ]

**१४श-चित्र-व्याख्या**—१ कशेरुपिण्ड २ दन्तप्रवर्द्धनकेन सन्धिसूचकं ३ मध्यरज्जुकाख्यस्नायोः संस्थानसूचकं ४,४, पश्चात्कपालमूलकोटिभ्यां सन्धानाय सन्धिलाञ्छने ५ सुषुम्नाविवरम् ६ पृष्ठकण्टकम् ७,७ बाहुप्रवर्द्धनकद्वयम् ८,८ मातृकाच्छिद्रद्वयम्।

सप्तसु च ग्रीवाकशेरुकासु, प्रथमा द्वितीया सप्तमी चेति तिस्रः पृथक् लक्षणीयाः इतरवैलक्षण्यात्। तत्र—

### प्रथमा ग्रीवाकशेरुका चूडावलया[3]

नाम। सा पृष्ठवंशचूडायां वलयाकारेति तथासंज्ञा। संहिता चेयमूर्द्ध्वं पश्चिमकपालेनाधश्च दन्तचूडाख्यया द्वितीय-ग्रीवाकशेरुकया। तत्र विशेषाः—

---

१ Cervical Vertebrae २ मस्तिष्कमातृके धमन्यौ = Vertebral Arteries. ३ Atlas.

(१) कशेरुपिण्डं ह्रस्वं गुटिकाकारञ्च (१४श चित्रे १), तत् पृष्ठतश्च सन्धिलक्ष्म दन्तचूडाख्याया कशेरुकाया दन्तप्रवर्द्धनेन (तत्रैव २—इत्यङ्किताःवकाशस्थितेन) सन्ध्यर्थम्।

(२) चक्रमूलयोरुपरिष्टात् शिम्बीवीजाकारे सन्धिलक्ष्मणी (तत्रैव ४, ४) पश्चिमशिरःकपालस्य मूलकोटिभ्यां सन्धानाय। अभ्यन्तरतश्चानयोः कलायके मध्यरज्जुकाख्यायाः स्नायोः (तत्रैव ३ इत्यङ्कितस्थानस्थायाः) कोटिद्वय-संयोगाय।

(३) पृष्ठकण्टकञ्च तनुगुटिकाकारम् (तत्रैव ६)।

## द्वितीया ग्रीवाकशेरुका—

दन्तचूड़ा नाम। सा चूड़ायां दन्ताकारेण प्रवर्द्धनकेनोपलक्षितेति तथासंज्ञा (१५श चित्रम्)। अस्य पुनः दन्त-प्रवर्द्धनकस्य (तत्रैव १) चूड़ावलयायाः सुषुम्नाविवरं प्रविष्टस्य (१४ चित्रे २) पुरः पश्चाच्च द्वे खातोदरे लक्ष्मणी (तत्रैव २, ३) तयोः पुरःस्थं चूड़ावलयायाः कशेरुपिण्डपश्चिमेन सन्धिलक्ष्मणा (१५श-चित्रे २) सन्धीयते; पश्चिमन्तु समाश्रित्य तिष्ठति मध्यरज्जुकाख्या स्नायुः। पार्श्वयोश्च दन्त-प्रवनर्द्धस्य संयुज्येते स्नायुसूत्रे। शिखरे च स्नायुसूत्रं पश्चिमकपाल-मूल-योजनाय। शिरो हि सह चूड़ावलयाख्य-कशेरुकया विपरिवर्त्तते दन्तप्रवर्द्धनकमेव मध्यकील भूतमाश्रित्य पृष्ठवंशोपरिष्टात्।

[१५ श चित्रम्—द्वितीया ग्रीवाकशेरुका दन्तचूड़ा नाम]

(पार्श्वतो दृष्टा।)




### १५श चित्र-व्याख्या—

१ दन्तप्रवर्द्धनकम्। २ चुड़ावलयाख्यकशेरुकायाः पिण्डपश्चिमस्थेन सन्धिलक्ष्मणा सन्धानचिह्नम्। ३ मध्यरज्जुकस्नायोः विवर्त्तनखातम्। क, पृष्ठकण्टकम्। सं १ ऊर्द्धतनं सन्धिप्रवर्द्धनम्। सं २ अधस्तनं सन्धिप्रवर्द्धनम्।

---

१ Axis.

[ १६श चित्रम्—सप्तमी ग्रीवाकशेरुका महाकण्टकिनी नाम ]

(पुरः)




**१६श चित्र-व्याख्या—**

कम, कशेरुपिण्डम्। सू, सुषुम्नाविवरम्। क, पृष्ठकण्टकम्। १,१, ऊर्द्ध्वतनं सन्धिप्रवर्द्धनकद्वयम् २,२ मातृकाछिद्रद्वयम् ३,३ बाहुप्रवर्द्धनके।

## सप्तमी ग्रीवाकशेरुका महाकण्टकिनी[1]—नाम (१६श चित्रम्)।

सा दीर्घतम-पृष्ठकण्टकेनोपलक्षितेति तथा-संज्ञा। तत्र च महाकण्टके सम्बध्यते ग्रीवाधरा नाम स्नायुरज्जुः[2]। महाकण्टकञ्चैतत् न द्विधा भिन्नाग्रमितरास्विव ग्रीवाकशेरुकासु। तथापि मातृकाच्छिद्रादि-ग्रीवाकशेरु-साधारणलिङ्ग-दर्शनात् शक्यमस्याः परिज्ञानम्।

[ १७श चित्रम्—पृष्ठकशेरुका (पार्श्वतो दृष्टा) ]




**१७श चित्र-व्याख्या—**कम, कशेरुपिण्डम्। १, १, सन्धिप्रवर्द्धनके ऊर्द्ध्वतने। २,२, कशेरुपिण्डपार्श्वस्थं स्थालकद्वयम्। ४, अधस्तनं सन्धिप्रवर्द्धनकम् (दक्षिणम्)। ५, बाहुप्रवर्द्धनकस्थं स्थालकम्। क, पृष्ठकण्टकम्।

## अथ पृष्ठकशेरुकाः—

पृष्ठे[3]ऽकशेरुकाः द्वादश। तास्विमे विशेषाः। (१७श-चित्रम्, १२श चित्रञ्च)।

(१) कशेरुपिण्डानि मध्याकृतीनि वृत्तार्द्धप्रायाणि च। प्रतिकशेरुपिण्डञ्च द्वे सन्धिलक्ष्मणी स्थालकाख्ये (तत्रैव २, ३) पश्चादुभयतः पर्शुकामूलसन्धानाय।

(२) बाहुप्रवर्द्धनकानि प्रायो वर्त्तुलाग्राणि स्थालकाख्यैः सन्धिलक्ष्मभिरङ्कितानि च (तत्रैव ५) पर्शुकार्वुदैः सन्ध्यर्थम्। अतएव प्राचां बाहुप्रवर्द्धनकेष्वेव स्थालक-संज्ञा।

(३) पृष्ठकण्टकानि अधोऽधश्छादीनि दीर्घवृत्तमुखानि च (११श चित्रम्)।

१ महाकण्टकिनी = Vertebra Prominens. २ Ligamentum Nuchae. ३ यथा चरके (शा० ७ अ०)।

[१८श चित्रम्—विशिष्टाः पृष्ठकशेरुकाः ]




१८श चित्र व्याख्या ।—

१म—पृष्ठकशेरुका प्रथमा। ९म—नवमी। १०म—दशमी ११श—एकादशी। १२श—द्वादशी। १, २, ३—कशेरुबाहुस्थानि स्थालकानि पर्शुकासन्धानाय। ५, ६, ७, ८, ९—सन्धिप्रवर्द्धनकानि। सं, पूर्णचक्राकारं स्थालकम्। सं १—अर्द्धचक्राकार तद्देव।

तत्रापि प्रथमा, नवमी, दशमी, एकादशी, द्वादशी चेति पञ्च पृष्ठकशेरुकाः विशेषतो लक्ष्याः (१८श चित्रम्)। तद्यथा—

<u>प्रथमा पृष्ठकशेरुका</u> (तत्रैव १म)—अस्या एकैकस्मिन् पार्श्वे द्वे द्वे स्थालके पूर्णचक्राकारे,—तत्रैकं कशेरुपिण्डपार्श्वत ऊर्द्ध्वसीम्नि, अपरं बाहुप्रवर्द्धनके। अधःसीम्नि पुनः कशेरुपिण्डपार्श्वतश्चक्रार्द्धाकारं स्थालकमपरम्।

<u>द्वितीयान्तु पृष्ठकशेरुका</u>मारभ्य अष्टमीं यावत् प्रतिकशेरुपार्श्वं त्रीणि त्रीणि स्थालकानि (यथा १७श चित्रे)। तेषु पूर्णचक्राकारमेकं बाहुप्रवर्द्धनके, अर्द्धचक्राकारे द्वे कशेरुपिण्डपार्श्वत ऊर्द्ध्वाधःसीम्नोः।

<u>नवम्यां पुनः पृष्ठकशेरुकाया</u>मर्द्धचक्राकारमेकमेव स्थालकमेकैकस्मिन् कशेरुपिण्डपार्श्वे ऊर्द्ध्वसीम्नि, अपरं बाहुप्रवर्द्धनके (१८श चित्रे ९म)।

<u>दशम्यान्तु पूर्णचक्राकारं कशेरु</u>पिण्डस्यैकैकस्मिन् पार्श्वे स्थालकमेकमेव, अपरं बाहुप्रवर्द्धनके (तत्रैव १०म)।

<u>एकादश्यां द्वादश्याञ्च</u> (तत्रैव ११श, १२श) कशेरुपिण्डस्यैकैकस्मिन् पार्श्वे पूर्णचक्राकारमेकैकमेव स्थालकं, बाहुप्रवर्द्धनके तु सर्व्वथा स्थालकाभावः। तत्रापि द्वादशी विशेषतः कटिकशेरुकातुल्या त्रिमुखेन बाहुप्रवर्द्धनकेनोपलक्षिता चेति विशेषः।

**कटिकशेरुकाः**—पुनः पञ्च। तास्विमे विशेषाः (११श चित्रम्)।

(१) कशेरुपिण्डानि बृहत्तमानि पार्श्वायतानि च।

(२) पार्श्वप्रवर्द्धनकानि ह्रस्वानि त्रिमुखानि पञ्चवदीषदायतानि च।

(३) पृष्ठकण्टकानि स्थूलह्रस्वानि परशुमुखाकाराणि च।

तत्रापि पञ्चमी कटिकशेरुका विशेषेण परिच्छिद्यते ऊर्द्धमुखाभ्यां बाहु-प्रवर्द्धनकाभ्यां तन्वग्रेण पृष्ठकण्टकेन च।

तदेवं चतुर्विंशतिः कशेरुका व्याख्याताः।

## अथ त्रिकास्थि।

[१८श चित्रम्—त्रिकास्थि]




### १८श चित्र व्याख्या।—

१,२,३,४,५—त्रिकास्थि निर्म्मापिकाणां कशेरुकाणां सूचकानि। अन्तराले च रेखाचतुष्टयं कशेरुपिण्ड संघात सूचकम्। ६, ६,—त्रिकपक्षद्वयम्। ७,७ श्रोणिसन्धि-लक्ष्मणी। ८,८, अनुत्रिकास्थ्ना सन्धानाय पादद्वयम्। ९,९ त्रिकशृङ्गाख्ये सन्धिप्रवर्द्धनके, पञ्चमकटिकशेरुकया सन्धा-नाय। पुरस्तादन्तराले च त्रिकोष्ठम्। १० त्रिकमूलम् ११, गुल्फिकाख्यपेश्याः प्रभवः।

**त्रिकास्थि[1] नाम**—पृष्ठवंशानुबन्धेन स्थितं श्रोणि-फलकयोरन्तरालस्थं न्युब्जपृष्ठं त्रिकोणप्रायमस्थिफलकम्—(दृश्यतां प्रथमं कङ्काल चित्रम्)। तदिदं स्थानभेदात् संहत-स्वरूपं कशेरुकापञ्चकमिति सूक्ष्मदृशः (१८श चित्रे १, २, ३,४, ५)। लिङ्गञ्चाङ्गुरत्र कशेरु-पिण्ड संघातसूचकं रेखाचतुष्टयं पुरतः।

अत्रैतानि विशेषतो लक्ष-णीयानि—

(१) अष्टौ पुरोवर्त्तिच्छिद्राणि (एकैकतश्चत्वारि) रेखाचतुष्टयानुबन्धेन, त्रिकपुरो-गामिनीनां नाडीनां निर्गमाय।

(२) अष्टौ पश्चिमच्छिद्राणि (एकैकतश्चत्वारि),त्रिक-पश्चिम-गामिनीनां नाडीनां निर्गमाय।

---

१ त्रिकास्थि=Sacrum.

(३) त्रिकौष्ठं त्रिकशिरसि पुरःस्थम्। तदुभयतश्च त्रिकशृङ्गद्वयं पञ्चमकटिकशेरुकायाः सन्धिप्रवर्द्धनकाभ्यामधःस्थाभ्यां सन्धानाय (तत्रैव ८,८)।

(४) कण्टकानि पञ्च पृष्ठतः।

(५) उभयतश्च त्रिकपक्षौ १७श चित्रे ६, ६), श्रोणिसन्धिलक्ष्मणी तत्पार्श्वयोः श्रोणिफलकाभ्यां सन्ध्यर्थम् (तत्रैव ७, ७)।

(६) त्रिकमूलं त्रिकाधःप्रान्तरूपं तेन सन्धीयते अनुत्रिकास्थिचूडा (तत्रैव १०)। अस्यैवोभयतः त्रिकपादद्वयम् (तत्रैव ८, ८)।

(७) त्रिकगुहा त्रिकाभ्यन्तरस्था, तद्द्वारञ्च पश्चिमतः "सुषुम्ना-चामर[१]" धारणार्थम्।

अष्टौ चात्र युग्माः पेश्यस्त्रिकास्थ्नि संलग्नाः तासु पुरस्तिस्रः पञ्च पश्चात्। तद्विवरणं पेश्यध्याये वक्ष्यते।

# अथ अनुत्रिकास्थि।

[ २०श चित्रम् ]

अनुत्रिकास्थि।




२०श चित्र व्याख्या—

१, १,—शृङ्गद्वयम्। म, अनुत्रिकपिण्डम्। २,२—स्नायुरज्जुसंयोगाय प्रवर्द्धनके। ३ अनुत्रिकाग्रम्।

अनुत्रिकं[२] नाम (२०श चित्रम्) त्रिकास्थ्नोऽधस्तनस्त्रिकोणः काकचञ्चुप्रायोऽस्थिसंघातः, तद्धि क्षुद्रकशेरुकाचतुष्टयेन[३] मिलितेन निष्पन्नमिति सूक्ष्मदृशः। अस्योर्द्धभागे शृङ्गद्वयं त्रिकास्थिमूलस्थाभ्यां शृङ्गाभ्यां सन्धिमत् (तत्रैव १, १)। मध्येच तयोः (तत्रैव म) सन्धिलक्ष्माङ्कितं पिण्डं त्रिकमूलस्थपिण्डेन सन्ध्यर्हम्। पार्श्वयोश्चाधः प्रवर्द्धनके (तत्रैव २,२) स्नायुरज्जुसंयोगाय।

इदञ्च गुदपश्चिमत्वात् गुदास्थीति प्राच्यः। तदेव बह्वस्थिगुटिकामयं कल्पते गवादीनां पुच्छास्थिमालानिर्म्माणायेति प्राणितत्त्वविदः!

पञ्च चात्र निविशन्ते पेश्यः। तत्र चतस्रो युग्माः, एकात्वेकाकिनी। तद्विवरणं पेश्यध्याये वक्ष्यते।

१ Cauda Equina. ;२ अनुत्रिकम्=Coccyx. ३ कशेरुकापञ्चकसंघातमयं वा कदाचित्। कशेरुगुटिकाश्च रेखाभिरन्तरिताः पृथगुन्नेयाः।

# अथ श्रोणिफलकम्।

**श्रोणिफलकं**[1] नाम (२१श चित्रम्)—त्रिकनितम्ब-सक्थिधारणं बृहदस्थिफलकं कपालभूयिष्ठम्। तयोरेकमेकैकस्मिन् पार्श्वे तिर्य्यगवस्थितं कटिपार्श्वात् सक्थिशिरो यावत्। सन्धिस्थोभयोः पुरः परस्परं, पश्चात् त्रिकास्थिव्यवधानेन (दृश्यतां कङ्कालचित्रद्वयम्)। एवं संहितयोश्च तयोः **श्रोणिचक्र**[2]मिति संज्ञा, तन्मध्यस्थगह्वरस्य च **वस्तिगुहे**[3]ति। सेयं वस्तिगुहा पुंसो गभीरा स्वल्पायता च, नार्य्यास्तु उत्ताना विशालायता च, निर्म्माणविशेषात् श्रोणिफलकयोः। (श्रोणिचक्रचित्रं प्रथमे कङ्कालचित्रे द्रष्टव्यम्।)

यौवने पुनः सर्व्वस्यैव दृश्यते प्रतिश्रोणिफलकमस्थित्रितयं परस्परसंयुज्यमानं वंक्षणोदूखलस्थेन रेखात्रितयेन सूचितसन्धानम्। तथाच तदानीमिवं विभागः—**जघनकपालं**[4] नाम तदूर्द्ध्वतनोऽंशः विस्तृतपक्षाकारः। **कुकुन्दरास्थीति**[5] अधस्तनोऽंशः कुकुन्दरपिण्डोपलक्षितः। **भगास्थि**[6] नाम पुरस्तनोऽंशो भगाधिष्ठानभूतः। प्रौढ़स्य तु श्रोणिफलके त्रयाणामंशानां संयोगादेकीभावो रेखात्रयलोपश्च। तथापीह वर्णनासौकर्य्याय त्रयाणामंशानां पृथग् ग्रहणम्। (अंशत्रयञ्च २१श चित्रे रेखात्रयेण स्पष्टं सूचितम्)।

समग्रे पुनरेकैकस्मिन् श्रोणिफलके द्वयं विशेषतो लक्ष्यम्—वंक्षणोलूखलं श्रोणिगवाक्षञ्च। तत्र—

वंक्षणोलूखलं[7] नाम—श्रोणिफलकस्य बहिर्भागे मध्यतः स्थितं गभीरं कोटरमुलूखलाकारम् (२१श चित्रे १,२,३,४)। तत्र सन्धीयते ऊर्व्वस्थ्नो मुण्डं स्नायुरज्जुनिबद्धं मध्यतः, कोटरपरिधौ च संसज्यते तत्सन्धिबन्धनः स्नायुकोषः। कोटरमध्यतश्च दृश्यते यौवने रेखात्रयमंशत्रयसंघातसूचकम्।

श्रोणिगवाक्षं[8] नाम भगास्थिकुकुन्दरास्थिभ्यां मण्डलीकृतमन्तरालं गवाक्षाकारम् (तत्रैव चित्रे ८)। तत् जीवद्दशायां कलावृतं, पुंसि बृहत्तरं, स्त्रियान्तु नात्यायतं त्रिकोणप्रायञ्च।

अंशतः पुनरेकैकस्मिन् श्रोणिफलके प्रत्यंशं विशेषाः बहवः। तत्र,

---

१ श्रोणिफलकम्=Os Innominate. २ श्रोणिचक्रम्=Pelvis. ३ वस्तिगुहा=Pelvic Cavity. ४ जघनकपालम्=Ileum. ५ कुकुन्दरास्थि=Ischium. ६ भगास्थि=Pubes. ७ वंक्षणोदूखलं वा = Acetabulum or Cotyloid Cavity. ८ Obturator foramen.

# २१श चित्रम्—

# श्रोणिफलकम्।

( ऊर्द्ध्वम् )

जघनकपालम्




कुकुन्दरास्थि। भगास्थि।

( अधः )

## २१श चित्र-व्याख्या।—

१, २, ३, ४, वंक्षणोलूखलम्। तत्र १, भगास्थ्यंशः, २, जघनकपालांशः, ३, कुकुन्दरास्थ्यंशः, ४, अस्थ्यंशत्रयसंयोगकेन्द्रम्। तत्र त्रिधा गता रेखाः—सं, सं, सं—इति पर्य्यन्तम्। ताः सन्धानसूचनाय। ५, जघनकपालसीमा। ६, भगास्थि (उत्तरशृङ्गम्)। ७, कुकुन्दरास्थि। ८, श्रोणिगवाक्षम्। ९, १०, जघनकपालस्य पुरःकूटमधस्तन मूर्द्ध तनञ्च ११, १२, भगास्थ्नो मुण्डम्, भगपीठम् वा। १० इत्यतः मूर्द्धाक्ष्च्या १५, पर्य्यन्तं जघनपक्षः, तद्धारा जघनधारा नाम। १३, जघनचूड़ा। १४, १५, जघनकूटं पश्चिममूर्द्ध तनमधस्तनञ्च। १६, गृध्रसीद्वारम्। १७, कुकुन्दरकण्टकम्। १८, कुकुन्दरद्वारम्। १९, कुकुन्दरपिण्डम्। २०, भगास्थ्नः अधरशृङ्गम्।

पेशी-निवेशास्तु—पे १, पे २, तिरश्चीने उदरच्छदे। पे ३, कटिप्रच्छदा। पे४, गरिष्ठा नितम्बपिण्डिका। पे ५, गुण्डिका। पे ६, मध्यमा नितम्बपिण्डिका। पे ७, कनिष्ठा नितम्बपिण्डिका। रे१, पेशी प्रभव स्थान-व्यवधायिनी रेखा प्रथमा, रे२ सैव द्वितीया, रे३ सैव तृतीया। पे ८, पे९, सक्थिदण्डिका (मूलद्वयम्)। पे१०, कण्डतिका। पे११, पे१२, उदरदण्डिका। पे१३, ऊरुसंव्यूहनी दीर्घा। पे १४, सैव ह्रस्वा। पे१५, ऊर्ध्वन्तःपार्श्विका। पे१६, ऊरुसंवूहनी गरिष्ठा पे१७, ऊरुचतुरस्रा। पे १८, श्रोणिगवाक्षिणी वहिःस्था। पे१९ कण्डराकल्पा, ऊरुद्विशिरस्का च। पे२०, कलाकल्पा। पे२१, पे२२, यमलाख्यम्।

(१) **जघनकपालं** नामोर्द्धतनोऽंशः प्रधानभूतः (२१श चित्रे ८ अङ्कात् ५ अङ्कावधि ऊर्द्धावृत्त्या)। तस्य द्वौ भागौ—जघनपक्षो, वंक्षणोलूखलांशश्च। तत्र जघनपक्षो नाम पक्षवदायतो जघनकपालस्य प्रशस्तो भाग उपरितनः। तस्य द्वे तले, बाह्यमाभ्यन्तरञ्च। तयोर्बाह्यतलं जघनपृष्ठं नाम तत्र नितम्बपिण्डिका[१]ख्यपेशीत्रयस्य प्रभवः (तत्रैव पे ४, पे ६, पे ७)। तिस्रश्च तत्र रेखास्तत्प्रभवस्थान-विभाजिकाः (तत्रैव रे १, रे २, रे ३)। आभ्यन्तरतलं जघनोदरं नामेषत्खातगर्भं, तत्र कोष्ठभूमिका[२]ख्यपेश्याः प्रभवः। तदधः-सीम्नि च वस्तिकुहरस्योर्द्धसीमभूता रेखा स्थूलोन्नता, सा वस्तिकण्ठिका[३] नाम। तदानुपूर्व्या च पश्चिमतः कर्णपालिसदृशाकारं त्रिकसन्धिस्थानं त्रिकस्थालकं नाम, तस्यापि पश्चात् पृष्ठवंशधरायाः कटिचतुरस्रा[४]याश्च पेश्याः प्रभवः।

जघनपक्षपरिधिभूता च धारा जघनधारा नाम। तस्याः पुरःसीम्नि द्वावुत्सेधौ पुरःकूटौ[५] नाम, तयोरूर्द्धतनाधस्तनभेदेन संज्ञाद्वयव्यवहारः। पश्चिमसीम्नि च द्वावुत्सेधौ पश्चिमकूटौ[६] नाम, तयोरपि पूर्व्ववत् संज्ञाद्वयम्। मध्ये च जघनधारायास्तुङ्गप्रदेशो जघनचूडा नाम। तत्पुरस्ताज्जघनधारायां तिरश्चीनयोरुदरच्छदा[७]ख्यपेश्योर्निवेशः। तत् पश्चिमतश्च कटिप्रच्छदा[८]ख्यपेश्याः।

पश्चिमतः पुनर्जघनपक्षस्य तोरणाकारं द्वारं गृध्रसीद्वारं[९] नाम। तेन गृध्रस्याख्यना[१०]ड्याः तदनुवर्त्तिनीनां सिराधमन्यादीनां शुण्डिका[११]ख्यपेश्याश्च निर्गमः।

वंक्षणोदूखलांशस्तु जघनकपालस्य पादभूतो वंक्षणोदूखलवर्णनया वर्णितपूर्व्वः।

(२) कुकुन्दरास्थि नाम (२१श चित्रम्) नितम्बमूलाश्रयः श्रोणिफलकस्याधस्तनोऽंशः अर्द्धचन्द्रप्रायः श्रोणिगवाक्षस्य अधोऽर्द्धपरिधिभूतः। तस्य त्रयो भागाः—वंक्षणोलूखलांशः, कुकुन्दरपिण्डं, कुकुन्दरकूटञ्चेति। तत्र—

वंक्षणोदूखलांशस्तदूखलवर्णनादुक्तपूर्व्वः। तत्पश्चात् त्रिकोणप्रायं प्रवर्द्धनकं कुकुन्दरकण्टकं[१२] नाम (२१श चित्रे १७), तत्परितो यमला[१३]ख्यपेश्याः प्रभवः।

---

१ Gluteus Maximus, Medius and Minimus. २ Iliacus. ३ Ile-opectineal Line. ४ Erector Shinæ & Quadratus Lumborum. ५ Anterior Iliac Spine—Superior and nferior. ६ Posterior Iliac Spine—Superior and Inferior. ७ Ext. Oblique and Int. Oblique Muscles. ८ Latissiness Dorsi. ९ Great Sacro-sciatic Notch. १० Sciatic Nerve. ११ Pyrifirmis. १२ Spine of Ischium. १३ Gemelli.

तदधस्तात् क्षुद्रतोरणाकारं खातं कुकुन्दरद्वारम्[१] ( २१श चित्रे १८ ) नाम, तेन अन्तःस्थायाः श्रोणिगवाक्षिणी[२] पेश्याः तदनुचरीणां सिराधमनीनाडीनाञ्च वस्तिगुहायां प्रवेशः ।

कुकुन्दरपिण्डं[३] (२१श चित्रे १८) स्वनामव्याख्यातमुपविशतः पुरुषस्य भारधारणमूलम् । तत्र ऊरुजानुगामिनीनां चतसृणां पेशीनां प्रभवः ।

कुकुन्दरकूटं[४] नाम कुकुन्दरपिण्डादूर्द्धं पुरःसङ्गतं शृङ्गं भगास्थ्नोऽधरशृङ्गेण मिलितं श्रोणिगवाक्षपरिधेरंशभूतम् ( तत्रैव १९ इत्यतः २० पर्य्यन्तम् )। तद्बहिःप्रदेशो बहिःस्थायाःश्रोणिगवाक्षिण्याः[५], ( तत्रैव पे १८ ) गरिष्ठाया ऊरुसंव्यूहन्याश्च[६] पेश्याः ( तत्रैव पे १९ ) प्रभवः । तदन्तःप्रदेशस्तु अन्तःस्थायाः श्रोणिगवाक्षिण्याः ।

(३) भगास्थि नाम भगाद्यधिष्ठानभूतः श्रोणिफलकस्य पुरस्तनोऽंशः (२१श-चित्रम्)। तस्य त्रयो भागाः—मुण्डमुत्तरशृङ्गमधरशृङ्गञ्च ।

तत्र मध्यपिण्डभूतं मुण्डं[७], क्वचिद्भगपीठं लिङ्गपीठमिति वा व्यपदिष्टम् (तत्रैव ११, १२)। अन्तःसीम्नि च तस्य इतर-भगास्थिसन्धानाय स्थालकमुच्चावचं, पुरश्च उत्सेधे उदरदण्डिका[८]ख्यपेश्या ( तत्रैव पे ११, पे २२ ) निवेशः तत् परितश्च स्नाय्वादीनाम् ।

उत्तरशृङ्गं[९] (तत्रैव ९) मुण्डात् पश्चिमतो वंक्षणोदूखलं प्राप्तं परार्द्धेन तदंशनिष्पादकञ्च। तदेव श्रोणिगवाक्षस्य ऊर्द्ध्वपरिधिभूतञ्च, तदूर्द्धसीमा चाभ्यन्तरतलस्थवस्तिकण्ठिकाख्यरेखया सङ्गता वस्तिगुहाया ऊर्द्धसीमभूता ।

अधरशृङ्गं[१०] (तत्रैव २०) पुनर्भगास्थिमुण्डादधो बहिर्गत्य कुकुन्दरकूटेन सङ्गतं श्रोणिगवाक्षस्य पुरःपरिधिभूतम् । अस्य बहिस्तले ऊरुसंव्यूहन्य[११]ाख्य-पेशीत्रयस्य, बाह्यायाः श्रोणिगवाक्षिण्याख्यपेश्याश्च प्रभवः, अन्तःप्रदेशे तु अन्तःस्थायाः श्रोणिगवाक्षिण्याख्यपेश्याः । पुरोवर्त्तिधारायाञ्चास्य शिश्नप्रहर्षिण्य[१२]ाख्यपेश्याः शिश्नमूलादेश्च संयोगः ।

तदेतत् सावयवं श्रोणिफलकं समासतो व्याख्यातम् । तत् सूक्ष्मानुसूक्ष्मविशेषास्तु चित्रादिषु स्नायुपेशीवर्णनावसरे च परिज्ञेयाः ।

१ Lesser Sacro-Sciatic Notch. २ Obturator Internus. ३ Tuberosity of Ischium. ४ Ascending Ramus of Ischium. ५ Obturator Externus. ६ Adductor Magnus. ७ Body of Pubes. ८ Rectus Abdominis. ९ Ascending Ramus of Pubes. १० Descending Ramus of Pubes. ११ Adductor Magnus, Longus & Brevis. १२ Erector Penis.

# अथ अंसफलकम्।

**अंसफलकं**[१] नाम (२२श चित्रम्) त्रिकोणप्रायं पत्रवदायतमस्थिफलकं कपालभूयिष्ठमेकमेकैकतः अंसपृष्ठे। तच्च तिर्य्यगवस्थितं संच्छाद्य पृष्ठार्द्धमा सप्तमपर्शुकामूलात्। सन्धीयते चैतत् बहिःसीम्नैव पुरस्तात् अक्षक प्रगण्डास्थिभ्याम्, विपरिवर्त्तते च स्वच्छन्दमन्तःसीम्नि पश्चिमतः पेशीमात्रप्रतिबद्धम्।

अक्षकसंहितस्य चांसफलकस्य **अंसचक्र**[२]मिति संज्ञा। एकैकञ्चांसचक्रमेकैकतः अंससन्धेरुपरि पटल[३]भूतं, सन्धिसंरक्षणाय पेशीस्नायुसंयोजनाय च। (दृश्यतां प्रथमकङ्कालचित्रम्)।

एकैकस्य पुनरंसफलकस्य पञ्च भागाः—अंसप्राचीरकम्, अंसकूटम्, अंसतुण्डम्, अंसपीठम्, अंसकपालिका चेति। तत्र—

<u>अंसप्राचीरकं</u>[४] नाम (२२श चित्रे १—६) अंसकपालिकापृष्ठात्तिर्य्यक् समुद्गतं बहिर्मुखमस्थिफलकं खड्गसदृशाकारम् त्वगधोऽनुभवनीयम्। तेनांसकपालिकापृष्ठतलस्य द्विधा विभागः। भागद्वयस्य चांसपृष्ठमुत्तरमधरञ्चे[५]ति संज्ञे।

<u>अंसकूटं</u>[६] नाम (तत्रैव १) अंसप्राचीरकस्याग्रं सर्पफणायतमुच्चावचञ्च, तत्र सम्बध्यते अंसतुण्डसंयोजनी[७] स्नायुः। प्रभवश्चायमंसच्छदायाः पृष्ठप्रच्छदा[८]यायाश्च पेश्याः (तत्रैव पे १, पे २)।

<u>अंसतुण्डं</u>[९] नाम (२२श चित्रे २) अंसफलकस्य चूड़ायां वायसतुण्डाकारं बहिर्मुखं प्रवर्द्धनकम्। अग्रे चास्य पृष्ठतो द्विशिरस्का[१०]याः काकोष्ठिका[११]यायाश्च पेश्याः प्रभवः (तत्रैव पे ३), पुरश्च लघ्वा उरःप्रच्छ[१२]दाख्यपेश्याः। सम्बध्यते चात्र तुण्डाक्षकसंयोजनी[१३], तुण्डांसकसंयोजनी[१४] च स्नायुः (तत्रैव ३—इत्यत्र)।

---

१ अंसफलकम् = Scapula. प्राचां सम्मतेयं संज्ञा (च० शा० ७ अ०)। २ अंसचक्रम् = Shoulder-girdle. ३ पटलं छदिः (Roof). ४ Spine of Scapula. ५ Supraspinous & Infruspinous fossæ ६ Acromion process. ७ Coraco-acromial ligament. ८ Deltoid & Trapazeus. ९ Coracoid process. १० Biceps. ११ Coraco-brachia alis. १२ Pectoralis Minor. १३ Coraco-clavicular Ligament. १४ Coraco-acromiai Ligament.

[ २२ग चित्रम् ]

## अंसफलकं ( वामम् )




**२२ग·चित्र-व्याख्या**—१ अङ्कात् ६ पर्य्यन्तम्—अंसप्राचीरकम्। १, अंसकूटम्। २, अंस-तुण्डम्। ३, अंसाचकसंयोजन्या तुण्डांसक-संयोजन्याश्च स्नायोः प्रभवः। ४, अंसशिरःकोटरम्। ५, अन्तः-कोटिः। ६, अंसप्राचीरमूलदेशः। अत्र च विपरिवर्त्तते पृष्ठप्रच्छदाख्या पेशी श्लेष्मधरकलापुटकव्यवधानेन ७, अधःकोटिः। ८, वहिःकोटिस्थं स्थालकमंसपीठं नाम।

अत्र चैता निविशन्ते पेश्यः—पे १, अंसच्छदा। पे २, पृष्ठप्रच्छदा। पे ३, द्विशिरस्काया ह्रस्वमूलं, काकोष्ठिका च। पे ४, द्विशिरस्काया दीर्घमूलम्। पे ५, अंसपृष्ठिका उत्तरा। पे ६, सैव अधरा। पे ७, अंसोन्नमनी। पे ८, अंसापकर्णी लघ्वी। पे ९, सैव बृहती। पे १०, अंसाधरिका बृहती। पे ११ सैव लघ्वी। पे १२, त्रिशिरस्का।

<u>अंसपीठं</u>[1] नाम (२२श चित्रे ८) अंसकूटादधःस्थमंसफलकस्य बहिःकोटिस्थितं स्थालकं, तत्र सन्धीयते प्रगण्डास्थ्नो मुण्डं तत्परिधिसंयुक्तेन स्नायुकोषेण प्रतिबद्धम्। तदूर्द्ध्वसीम्नि संयुज्यते द्विशिरस्काख्यपेश्याः दीर्घमूलम्[2] (तत्रैव पे ४), तदधःसीम्नि च त्रिशिरस्काख्यपेश्या[3] मूलम् (तत्रैव पे १२)।

<u>अंसकपालिका</u>[4] नाम (२२श चित्रे त्रिकोणावृत्त्या ८—७–५) अंसफलकस्य प्रधानोऽंशस्त्रिकोणकपालिकाकारः। तस्य द्वे तले, पुरस्तलं पश्चिमतलञ्च। तत्र पुरस्तलमंसान्तरिकाख्य-पेश्याः[5] प्रभवः। पश्चिमतलं पुनरंसप्राचीरकेण भागद्वयविभक्तम्; तत्रोर्द्ध्वतनो भाग उत्तराया अंसपृष्ठिकाख्य पेश्याः[6] (तत्रैव पे ५) प्रभवः, अधोभागस्तस्या एवाधरायाः[7] (तत्रैव पे ६)। तिस्रश्चांसकपालिकाया धारास्तावत्यश्च कोट्यः[8]। तत्र ऊर्द्ध्वधारा, अन्तर्धारा, बहिर्धारा चेति तिस्रो धाराः क्रमेण ऊर्द्ध्वान्तर्बहिःसीमरूपाः। बहिःकोटिरन्तःकोटिरधःकोटिश्चेति तिस्रः कोट्यस्तत्तत्कोणरूपाः (तत्रैव ८, ५, ७)। तत्र बहिः-कोटिरंसपीठे परिणता, अन्यत् कोटिद्वयं त्वगधोऽनुभवनीयम्।

तत्र ऊर्द्ध्वधारायाम् (२२श चित्रे ४—५) अंसतुण्डमूले कोटरम् <u>अंसशिरःकोटरं</u>[10] नाम (तत्रैव ४)। द्वारञ्च तदंसारोहिण्यै[11] नाड्याः पृष्ठतो निर्गमाय। बहिर्धारा तावदंसकपालिकाया बहिःसीमा (तत्रैव ८—७), कक्षायाः पश्चिमसीमभूता च, सेयं <u>कक्षानुगा</u>[12] नाम धारा। प्रभवश्चासौ पुरस्तादंसपीठाधःप्रदेशेन, त्रिशिरस्काख्यपेश्याः तदधश्च अंसाधरिकायै[13] लघ्व्या बृहत्याश्च (तत्रैव पे १२, पे ११, पे १०)। अन्तर्धारा पुनः (तत्रैव ५—७) धनुर्वक्रा पृष्ठवंशमनुगता च, सेयं <u>वंशानुगा</u>[14] नाम। प्रभवश्चासौ पुरस्ताद् अरित्राख्य[15] पेश्याः, पश्चिमतश्च अंसोन्नमन्याः[16], अंसापकर्षण्यो[17] लघ्व्या बृहत्याश्च (तत्रैव पे ७, ८, ९)।

---

१ Glenoid Cavity. २ Long Head of Biceps ३ Triceps. ४ Flat part of Scapula. ५ Sub-scapularis. ६ Supraspinatus. ७ Infraspinatus. ८ Borders. ९ Angles. १० Suprascapular Notch. ११ Suprascapular Nerve. १२ Axillary border. १३ Teres Minor & Major. १४ Vertebral border. १५ Serratus Magnus. १६ Levator Angulæ Scapulæ. १७ Rhomboideus Minor & Major.

# अथ अक्षकास्थि।

**अक्षकं**[1] नाम अंसमूलादुरःफलकसङ्गतं धनुर्वक्रं नलकास्थि, एकमेकैकतः। सन्धीयते च तद् अन्तःसीम्नि उरःफलकेन, बहिश्चांसकूटेन[2]। अंसफलकसहितस्य च तस्य संहितस्य **अंसचक्र**-संज्ञेति प्रागवोचाम।

इतरनलकास्थिवदस्यापि त्रयो भागाः—द्वौ प्रान्तौ मध्यनलकञ्चेति। अस्य च कङ्काले परिघवदवस्थान-दर्शनात् (दृश्यतां प्रथमं कङ्कालचित्रम्), प्रान्तद्वयस्य अन्तःप्रान्तो बहिःप्रान्तश्चेति संज्ञाद्वयम्। तत्र—

[ २३श चित्रम्—अक्षकास्थि (वामम्) ]

[ पुरस्ताद् दृष्टम् ]




**२३श चित्र व्याख्या**—चित्रद्वये ऊर्ध्वतनम् ऊर्ध्वतलस्य द्रष्टव्यम्, अधस्तनमधस्तलस्य। तत्र १, अन्तःप्रान्तः (उरःफलकाभिमुखः)। २ बहिःप्रान्तः (अंसाभिमुखः)। ३, त्रिकोणिकाख्यस्नायु-संयोगार्थमर्बुदम्। ४, तिरश्चीना रेखा चतुरस्रिकाख्यस्नायुसंयोगाय। ५, अंसकूटेन सन्ध्यर्थं लाञ्छनम्। ६, पर्शुकाचकसंयोजन्याः स्नायोः संयोगाय बन्धुरः प्रदेशः। ७ प्रथमोपपर्शुकोपरिभागेन सन्ध्यर्थं लाञ्छनम्। पेशी निवेशास्तु—पे १, उरःकर्णमूलिका। पे २, उरःप्रच्छदा गुर्वी। पे ३, अक्षकाधरा। पे ४, अंसच्छदा। पे ५, पृष्ठ-प्रच्छदा। पे ६, उरो-जिह्वामूलिका।

---

[1] अक्षकं—Clavicle. [2] अंसकूटं नाम अंसफलकस्यैवांऽश इत्युक्तपूर्व्वं स।

अन्तःप्रान्ते द्वे सन्धिलाञ्छने। तयोरुपरितनमुरःफलकपार्श्वस्थेन अधस्तनं (२३श चित्रे ७) च प्रथमाया उपपर्शुकायाः शीर्षभागेन सन्धानाय। अधस्तले चास्य वन्धुरः प्रदेशः पर्शुकाक्षकसंयोजन्याः[1] स्नायोः संयोगाय ( तत्रैव ६ )।

बहिःप्रान्ते पुनरेकं सन्धिलक्ष्म, तदंसकूटेन सन्ध्यर्थम् ( तत्रैव ५ )। संयुज्यते चात्र अंसाक्षकसंयोजनी[2] स्नायुः।

मध्यनलकं पुनर्द्वेधा धनुर्वक्रं, बहिरर्द्धे उत्तानमन्तरर्द्धे च न्युब्जम् पुरस्तात्। अन्तरर्द्धश्चास्य दण्डवद्वृत्तपरिणाहः, बहिरर्द्धस्तु चिपिटायतः। तत्र बहिरर्द्धस्याधस्तलमर्व्बुदोपलक्षितं त्रिकोणिका[3]ख्यस्नायुसंयोगाय ( २३श चित्रे ३ )। अर्व्बुदादुद्गता च तिरश्चीना रेखा ( तत्रैव ४ ) चतुरस्त्रिका[4]ख्यस्नायुसंयोगाय। बहिरर्द्धश्चायमूर्द्ध्वतलेऽंसच्छदायाः[5] पृष्ठप्रच्छदायाश्च[5] पेश्याः प्रभवः ( २३श चित्रे पे ४, पे ५ ), अधस्तले च अक्षकाधरीयायाः[6] पेश्याः ( तत्रैव पे ३ )।

अन्तरर्द्धः पुनः प्रभवस्तिसृणां पेशीनां, क्रमेण उरः-कर्णमूलिकायाः[7], गुर्व्या उरःप्रच्छदायाः[8], उरोजिह्वामूलिकायाश्च[9] ( २३श चित्रे पे १, पे २, पे ६ )।

## अथ उरःफलकम्।

उरःफलकं[10] नाम ( २४श चित्रम् ) फलकाकारमस्थिखण्डमुरोमध्यतः पुरस्तात् ( दृश्यतां प्रथमकङ्कालचित्रम् )। तच्च खण्डत्रयात्मकम्। तत्र प्रथमं खण्डं शिखरस्थं षट्कोणं, द्वितीयं मध्यस्थं फलकाकारं, तृतीयमन्तस्थं त्रिकोणं प्रथम वयसि तरुणास्थिमयम्। खण्डत्रयात्मकस्य चास्य उभयतः संयुज्यन्ते तरुणास्थीनि पर्शुकासंयोजकानि उपपर्शुकाख्यानि।

तत्र प्रथमं खण्डं कण्ठमूलेऽवस्थितं ग्रैवेयकं[11] नाम ( तत्रैव १म )। तत्र षट् स्थालकानि तद्यथा—द्वे स्थालके अक्षकाभ्यां सन्धानाय (तत्रैव अं० सं०), द्वे प्रथमाभ्यामुपपर्शुकाभ्यां, द्वे च द्वितीयाभ्याम्। शिखरे चास्य खातं कण्ठकूपं[12] नाम ( तत्रैव क )।

निम्नतश्चास्य द्वितीयखण्डेन संयोगः। निविशते चात्र पुरस्तादुरःकर्णमूलिकाख्या पेशी ( तत्रैव पे १ ), पृष्ठतश्च उरोजिह्वामूलिका।

---

१ Costo-clavicular Ligament. २ Acromio-clavicular Ligament. ३ Conoid Ligament. ४ Trapezoid Ligament- स्नायुद्वयमेतत् शैषोक्तमंसतुण्डाक्षकसंयोजनमिति स्नायुध्याये वक्ष्यते। ५ Deltoid & Trapezium ६ Subclavius ७ Sterno-mastoid. ८ Pectoralis Major. ९ Sterno-hyoid. १० Sternnm. ११ Manubrium. १२ Supra-sternal Notch.

[ २४श चित्रम् ]

## [ उरःफलकमुपपर्शुकाश्च ]

( ऊर्ध्वम् )




( अधः )

### २४श चित्र व्याख्या।

१म, २य, ३य,—उरःफलकम्। तत्र १म, प्रथमखण्डं ग्रैवेयकं नाम। २य, द्वितीयखण्डं मध्यफलकं नाम। ३य, तृतीयखण्डमग्रपत्रं नाम। १, २, ३, ४, ५, ६, ७, ८, ९, १०, ११, १२—पर्शुकाग्राणि उपपर्शुकासहितानि। दक्षिणतस्तु केवलमुपपर्शुकाः पृथग् दर्शिताः। अं० सं०, अक्षकसन्धिस्थलम्। क, कण्ठकूपम्। पेशी निवेशास्तु पे १,—उरःकर्णमूलिका। पे २, अक्षकाधरा। पे ३, उरःप्रच्छदा गुर्व्वी। पे ४, उरःप्रच्छदा लघ्वी।

मध्यफलकं[१] नाम द्वितीयं खण्डमुरःफलकस्य उपरिष्टाद् ग्रैवेयकेन संहितम् (२४श चित्रे २य)। तच्च खण्डचतुष्टयसंघातजं, खण्डचतुष्टयस्य बाल्ये पृथगवस्थानात्। षट् चात्र एकैकतः स्थालकानि उपपर्शुकाभिः सन्धानाय। पुरस्तलं च ग्रैवेयक-मध्यफलकयोः गुर्व्या उरःप्रच्छदाख्यापेश्याः[२] प्रभवः, वामार्द्धे वामायाः दक्षिणार्द्धे च दक्षिणायाः (तत्रैव पे ३)।

अग्रपत्रं[३] नाम तरुणास्थिभूयिष्ठं तृतीयं खण्डमुपरिष्टान्मध्यफलकेन संयुक्तम् (२४श चित्रे ३य)। तदेतत् यकृद्विवृद्धौ समुन्नताग्रमुच्यते अग्रमांसमिति लोके। संयुज्यते चात्र पुरस्तात् समाया उदरच्छदाख्यां[४] पेश्या मध्यकण्डरा, पश्चिमतश्च म[५]हाप्राचीराया अग्रभागः। वार्द्धके चास्य सर्व्वथा कठिनीभावः।

## अथ पर्शुकाः।

पर्शुकाः[६] पार्श्वकानि वा नाम उरःपञ्जर[७]वृतिभूतानि धनुर्वक्राणि स्थितिस्थापकानि चास्थिफलकानि। तेषां द्वादश एकैकस्मिन् पार्श्वे इति चतुर्व्विंशतिः पर्शुकाः। ताः सर्व्वा एव पश्चिमतः पृष्ठकशेरुकापिण्डैः पुरश्च तरुणास्थिभिरुपपर्शुकाख्यैः संहिताः। तासां सप्त ऊर्द्ध्वतन्यः क्रमेणाधोऽधः दीर्घतराः, पुरस्तादुपपर्शुकाभिः स्वीयाभिरुरःफलकेन संयुक्ताः। ता एताः मुख्या[८] नाम, ताभिरेव मुख्यतया उरःपञ्जरनिर्म्माणात्। अधस्तन्यः पुनः पञ्च पर्शुकाः क्रमेणाधोऽधः ह्रस्वतराः, असम्बद्धाश्चोरःफलकेन। ताः गौण्यो[९] नाम। तासामपि अष्टमी नवमी दशमी चेति तिस्रः स्वैः स्वैरुपपर्शुकाग्रैर्यथापूर्व्वमुपपर्शुकाभिरेव सम्बद्धाः, एकादशी द्वादशी चेति द्वे सर्व्वथा विमुक्ताग्रे[१०]।

---

१ Gladiolus. २ Pectoralis Major. ३ Xiphiod or Ensiform. ४ Transveralis Abdominis. ५ Diaphragm. ६ Ribs. ७ उरःपञ्जरमुरोगुहाधारभूतं पञ्जराकारं वक्ष्यमाणम्। तस्य वृतिभूतानि वेष्टनभूतानि। ८ मुख्याः पर्शुकाः = True Ribs. ९ गौण्यः = False ribs. १० Floating Ribs.

[२५श चित्रम्—पर्शुका]

[ पुरःप्रान्तः ]




[ पश्चिमप्रान्तः ]

इयञ्च षष्ठी सप्तमी वा पर्शुका। १, मुण्डस्थं द्विधा विभक्तं स्थालकम्। २, अर्व्वुदम्। क, पर्शुकाकोणः। ग, ग्रीवा। प, पर्शुकानुगा परिखा, तदाख्य सिराधमनीनाड़ीधारणाय। ३, ४, परिखायास्तटद्वयमूर्द्ध तनमधस्तनञ्च, पर्शुकान्तरिकाख्यपेशीद्वयसंयोगाय। ५, अग्रकोटिस्थं खातमुपपर्शुकासंयोगाय।

अथ षडिमानि प्रतिपर्शुकं लक्षणीयानि साधारणलिङ्गानि—मुण्डमर्व्वुदं ग्रीवा कोणः काण्डमग्रकोटिश्चेति। तत्र—

मुण्डं[1] नाम पर्शुकायाः पश्चिमप्रान्तो वर्त्तुलाकारः। तत्र च युग्मं स्थालकं (२५श चित्रे १) पृष्ठकशेरुकाद्वय-पिण्डस्थाभ्यामर्द्धस्थालकाभ्यां सन्धानाय।

अर्व्वुदं[3] नाम (२५श चित्रे २) तत् समीपस्थं पिण्डं स्थालकाङ्कितम्। तस्य कशेरुबाहुस्थेन स्थालकेन सन्धिः।

ग्रीवा[4] नाम (२५श चित्रे ग) मुण्डार्व्वुदयोर्मध्यभागः।

कोणो[5] नाम (२५श चित्रे क) अर्व्वुदपुरोवर्त्ती कोणाकारः प्रदेशः। तत्र दृश्यते भग्नसंहितमिव पर्शुकाकाण्डम्।

काण्डं[6] नाम धनुर्वक्रः पर्शुकामध्यभागः। तस्य द्वे धारे, ऊर्द्धधारा अधोधारा चेति। तत्र अधोधारायां परिखा (२५श चित्रे प) पर्शुकानुगाख्या तदाख्य सिराधमनीनाड़ीधारणाय। अस्यास्तटद्वये (तत्रैव ३, ४) संयुज्यते पर्शुकान्तरिकाख्यं पेशीद्वयम्।

अग्रकोटिर्नाम (२५श चित्रे ५) पुरःप्रान्तः उपपर्शुकासंयोगाय उच्चावचखातयुतः।

तान्येतानि साधारणलिङ्गानि तृतीयादि-नवस्वन्तपर्शुकासु यथोक्तानि। प्रथम-द्वितीय-दशमैकादशद्वादशसंख्यासु तु तद्वैलक्षण्यमन्ये च विशेषाः। तद्यथा—

---

१ Head. २ Circular facet or Socket. ३ Tuberosity. ४ Neck. ५ Angle. ६ Shaft. ७ Groove for Intercostal Vessels and Nerves. ८ Intercostal Muscles,—External & Internal. ९ Sternal end.

## [ २६श चित्रम्। विशिष्टपर्शुकाः। ]




प्रथमा पर्शुका ह्रस्वतमा दात्रफलकाकारा च। अस्या मुण्डं तुङ्गमेकस्थालकञ्च। कोणमायतमूर्द्ध्वाधस्तलोपलक्षितञ्च। कोणस्तु नास्त्येव। ऊर्द्ध्वतले च खातद्वयमन्वाधरिकाख्यसिराधमन्योर्धारणाय ( २६श चित्रे १, २ )। निम्नयात्र निविशन्ते पेशयः क्रमेण अरित्रा, पर्शुकाकर्षणी पुरोगा मध्यमा चेति।

द्वितीया पर्शुका प्रथमावदेव दीर्घतरा च; तदूर्द्ध्वतले निविशते पेशीद्वयम् पर्शुका-कर्षणी पृष्ठगा, अरित्रा चेति।

२६श चित्र-व्याख्या—

(१म)—प्रथमा पर्शुका। (२य)—द्वितीया। (१०म)—दशमी। (११श)—एकादशी। (१२श)—द्वादशी। तत्र अ, अर्व्वुदम्। क, कोणः। सं, मुण्डस्थं स्थालकम्। विशेषतस्तु प्रथमायां—१, २, अन्वाधरिकाख्यसिराधमन्योर्धारणार्थं खातद्वयम्। पेशीनिवेशास्तु, प्रथमायां पे १, पर्शुकाकर्षणी मध्यमा। पे २, अरित्रा। पे ३, पर्शुकाकर्षणी पुरोगा। द्वितीयायां—पे १, पर्शुकाकर्षणी पृष्ठगा। पे २, पे ३, अरित्रा।

दशमी पर्शुका ह्रस्वा वडिशाकारा च। अस्या अपि मुण्डमेकस्थालकं, कोणस्तु काण्डमध्यस्थः। एकादश्यामप्येवमर्व्वुदाभावश्च। द्वादशी एकादशीवत्। तत्र कोणाभावश्च। ता एताश्चतुर्व्विंशतिः पर्शुका व्याख्याताः।

उपपर्शुकाः पुनः (२४शे चित्रे स्पष्टम्) पर्शुकावदेव संख्यया, पर्शुकाग्रसम्बद्धास्तरुणास्थिमय्यश्च। तासामुरोऽस्थिषु ग्रहणं प्राचां ग्रन्थेषु।

---

१ दात्रं शस्यकर्त्तनम् ( Sickle ). २ Subclavian Vein & Artery. ३ Serratus Magnus. ४ Scalenus Anticus & Medius. ५ Scalenus Posticus. ६ प्राचां समाधानमुपोद्घाते द्रष्टव्यम्।

## अथ उरःपञ्जरम् ।

उरः पञ्जरं[1] नाम उरोगुहाधारणं पञ्जरमस्थिमयम् ( दृश्यतां कङ्कालचित्रद्वयं तृतीयाध्याये )। निर्मीयते च तत् पश्चिमतः पृष्ठवंशेन, पार्श्वयोः पर्शुकाभिः, पुरस्तोरःफलकेनोपपर्शुकासहितेन। तच्चोपरिष्टादसंवृतमधस्तान्महाप्राचीराख्यपेश्या संवृतं पार्श्वयोरायतञ्च क्रमादधोऽधः। धार्य्यते च तेन तथासंवृतेन, फुस्फुसद्वयं श्वासपथसहितं, हृदयं स्थूलमहासिराधमन्यादिसहित मन्नपथश्च। तद्विवरणं यथास्थानम् वक्ष्यामः।

इति द्वितीयो मध्यकायास्थिविज्ञानीयः परिच्छेदः।

# ( चतुर्थाध्याये )

## अथ तृतीयः शिरोऽस्थिविज्ञानीयः परिच्छेदः ।

इह खलु षडङ्गेऽस्मिन् शरीरे सर्व्वेन्द्रियज्ञानप्राणायतनमुत्तमाङ्गं शिरस्तत्र चाष्टाविंशतिरस्थ्नामित्युक्तपूर्व्वम्। तच्च संहितमधस्तात् पृष्ठवंशेन धारणदण्डभूतेन।

शिरोऽस्थीनि चाष्टौ शिरःसम्पुटनिर्म्मापकानि चतुर्दश च मुखमण्डलस्थानीति द्वाविंशतिरत्र व्याख्येया।

## अथ शिरःसम्पुटास्थीनि ।

शिरःसम्पुटं[2] नाम साङ्गोपाङ्गमस्तिष्काधारभूतमस्थिसम्पुटमलाव्वर्धसदृशाकारम्। तस्य चाधःसीमाद्योतकं चक्रमीदृशम्—( २७श चित्रे स्पष्टम् )

भ्रुवौ चेत् कर्णमूलाभ्यां पश्चात् केशान्तसंगते।
तदासौ सूच्यते सीमा शिरःसम्पुटनिम्नगा॥

---

१ Throax. २ शिरःसम्पुटम् = Cranium

## [ २७श चित्रम्---करोटिः ]

( तत्र शिरःसम्पुटविभागः पृथग्वर्णैर्दर्शितः )




**२७श चित्र व्याख्या**—१, १, पुरःकपालम्। २, २, पार्श्वकपालम्। ३, ३, पश्चात्कपालम्। ४, ४, शङ्खास्थि (शुम्भाङ्काः सीमायोतनार्थाः)। ५, तस्यैव गोस्तनांशः। ६, ६, गण्डास्थि। रे १, शङ्खतोरणिका उत्तरा (रेखा)। रे २, शङ्खतोरणिका अधरा। मध्ये शङ्खच्छदपेश्याः प्रभवः।

शिरःसम्पुटनिर्म्मापकानि चाष्टावस्थीनि यथा—पुरःकपालं पश्चात्कपालं पार्श्वकपाले द्वे चेति चत्वारि शिरःकपालानि; द्वे शङ्खास्थिनी कर्णमूलसंसक्ते; जतूका झर्झरकं चेति द्वे शिरःसम्पुटभूमिभूते–इति। तत्र षड़ादिमानि स्फुटं बहिर्दृश्यानि, जतूकादिद्वयं तु नासाकण्ठादिच्छदिभूतं निगूढ़शरीरम्।

समग्रकरोटिदृश्या विशेषास्तु इहैव शेषतो वक्ष्यन्ते।

## अथ पश्चात्कपालम्।

चतुर्षु तावदिह शिरःकपालेषु पश्चिमकपालं[1] मादौ वर्णनीयम्, तद्धि मूलबन्धनं शिरसः पृष्ठवंशचूड़ासंहितमिति।

---

१ पश्चिमकपालम् = Occipital Bone.

तस्य च द्वौ भागौ, कपालभागो मूलभागश्चेति। तत्र कपालभागः सर्पफणायत ऊर्द्ध्वस्थः। मूलभागः सर्पग्रीवासदृशः अधःस्थः। संयोगे चानयोर्महाविवरं वृत्तप्रायं सशीर्षकसुषुम्नानिर्गमाय। (२८श-२९श चित्रयोः स्पष्टम्)

[ २८श चित्रम्—पश्चात्कपालं ( पुरस्तलम् ) ]




**२८श चित्र व्याख्या**—१, महावर्त्तः। २, २, पार्श्वकोणौ। २—१—२ पार्श्विकाख्या सिरापरिखा। ३, पुरोधारायाः मध्यबिन्दुः। ३—१—४ दीर्घिकाख्या सिरापरिखा। ५, ५, कलायकद्वयं हनुसंयोगाय। ६, ६, मन्याप्रवर्द्धनके। ७, ७, मन्याखाते। क, कलासंयोगसूचकं रेखाद्वयम्।

भागद्वयोपलक्षितस्य च पश्चिमकपालस्य स्फुटं तलद्वयं, पुरस्तलं पृष्ठतलञ्चेति। तत्र -

पुरस्तलं शिरःसम्पुटाभ्यन्तरस्थम्। ( २८श चित्रम् )

---

१ Foramen Magnum.

(१) तत्र कपालभागस्य, कोरोदरं तत्राधीयते मस्तिष्कपश्चार्द्धः अनुमस्तिष्कश्च ( २८श चित्रे म-म, अम-अम )। गभीरञ्च तत्र सिरापरिखाचतुष्टयं[१] स्वस्तिकाकारं, स्वस्तिकमध्ये च तत्केन्द्रभूतः प्रदेशो महावर्त्तो[२] नाम ( तत्रैव १)। सिरापरिखातटेषु च संयुज्यन्ते मस्तिष्कावरणाख्यकलागाः खण्डविशेषाः[३] ( यथा तत्रैव क )।

(२) मूलभागस्य[४] तु (२८श चित्रम्) पुरस्तलमीषत्खातप्रायम्,—तत्राधीयते सुषुम्नाशीर्षकम्[५]। कपालमूलभागयोश्च संयोगस्थले उभयतः अर्द्धचन्द्राकारे खाते मन्याखाते[६] नाम, ( तत्रैव ७, ७ ) ते मन्याख्य[७]स्थूलसिराधारणाय। तदुपकण्ठस्थे च प्रवर्द्धनके मन्याप्रवर्द्धनके[८] नाम ( २८श चित्रे ६, ६ )।

(३) धारा च कपालभागस्यातिदन्तुरा ( २८श चित्रे स्फुटं द्रष्टव्या ); तस्यामुभयतो मध्यवर्त्तिनौ कोणौ पार्श्वकोणौ[९] नाम ( तत्रैव २, २ )। तयोरूर्द्ध्वतनो धारार्द्धः पार्श्वकपालयोः पश्चिमधाराभ्यां सन्धेयः तयोरधस्तनौ तु धारांशौ उभयतः शङ्खास्थिभ्याम् सन्धेयौ, मध्ये च तयोर्मूलपिण्डं जतूकास्थि-संयोगि।

पृष्ठतलं पुनः पश्चिमकपालस्य शिरःसम्पुटबहिःस्थम्। तत्र

---

१ Two Longitudinal and Two Lateral Sinuses. २ Torcular Herophili. ३ Falx Cerebri and Tentorium Cerebelli. ४ मूलभागः = Basilar Portion. ५ सुषुम्नाशीर्षकम् = Medulla Oblongata. ६ Jugular Fossæ. ७ Jugular Veins. ८ Jugular Processes. ९ Lateral Angles.

## [ २८श चित्रम्—पश्चिमकपालं (पृष्ठतलम्) ]।




**२८श चित्र व्याख्या**—१, १, पृष्ठतलस्य न्युब्जमध्यगो भागः शिरश्छदाख्यपेश्या संवृतः। २, पश्चिमार्व्वुदम्। ३, ३, कलायकद्वयं स्नायुसंयोगि। ४, ४, मूलकोटिपश्चिमगं रन्ध्रद्वयम्। ५, ५, मूलकोटिद्वयम्। ६, ६, तत्पुरोगं रन्ध्रद्वयम्। ७, ७, मन्याप्रवर्द्धनकौ। ८ मूलपिण्डम्। रे १, उत्तरतोरणिका। रे २, अधरतोरणिका। रे ३, पश्चिमालिका। पेशीनिवेशास्तु—पे १, पृष्ठप्रच्छदा। पे २, शिरश्छदा। पे ३, उरःकर्णमूलिका। पे ४, शिरोग्रीवविवर्त्तनी। पे ५, शिरोग्रीवपृष्ठिका। पे ६, उत्तरतिरश्चीना। पे ७, पे, ८, शिरःपृष्ठदण्डिका गुर्व्वी, लघ्वी च। पे ९, सैव पार्श्वगा। पे १०, पे ११ शिरःपूर्व्वदण्डिका लघ्वी गुर्व्वी च। पे १२, उत्तरा कण्ठसंकोचनी।

(१) कपालभागस्य पृष्ठतलं कूर्म्मपृष्ठाकारं, उपरिष्टात् (२८श चित्रे १, १) शिरश्छदाख्यपेशीसंवृतञ्च। तस्य मध्यत उत्सेधः पश्चिमार्व्वुदं[1] नाम (तत्रैव २), तदानुपूर्व्या चाधोलम्बिनी समुन्नता रेखा (तत्रैव रे ३) पश्चिमालिका[2] नाम, तयोः संयुज्यते ग्रीवाधराख्या[3] स्नायुरज्जुः। उभयतश्च पश्चिमालिकाम् द्वे द्वे तोरणाकारे रेखे (तत्रैव रे १, रे२); तत्र ऊर्द्ध्वतन्यौ उत्तरतोरणिके[4] नाम, अधस्तन्यौ तु अधरतोरणिके[5] नाम।

---

१ Ext. Occipital Protuberence. २ Ext. Occipital Crest. ३ Ligamentum Nuchae.

४ Superior Curved lines. ५ Inferior Curved lines.

(२) मूलभागस्य पृष्ठतलमुभयतः शिम्बीबीजाकारौ उत्सेधौ मूलकोटि[1] संज्ञौ, (तत्रैव ५, ५) तयोश्चूड़ावलयाख्यकशेरुकाया उपरिस्थिताभ्यां स्थालकाभ्यां सन्धिः। तत् पार्श्वयोश्च कलायके[2] मध्यरज्जुकाख्यस्नायुसंयोगाय (तत्रैव ३, ३)। तदुपरिष्टाच्च द्वौ द्वौ रन्ध्रमार्गौ[4] मूलकोट्योः पुरःपश्चादवस्थितौ (तत्रैव ६,६; ४,४) नाड़ीप्रवेशाय।

एवञ्च पश्चिमकपालस्य सन्धानम् षड्भिरस्थिभिः परिज्ञेयम्। तद्यथा—ऊर्द्धतनार्द्धे पार्श्वकपालाभ्यां, अधस्तनेऽर्द्धे पार्श्वयोः शङ्खास्थिभ्यां, मूलाग्रे तु जतूकास्थ्ना, मूलकोट्योश्च चूड़ावलययेति। सन्धानस्मारकः श्लोकस्तु—

जतूक-चूड़ावलया-शङ्खपार्श्वकपालकैः।
पश्चिमस्य कपालस्य सन्धानं षड्भिरीरितम्॥

पेश्यश्च पश्चिमकपालपृष्ठतले संयुज्यन्ते द्वादश युग्माः। तद्यथा—उत्तरतोरणिकोपकण्ठे तिस्रः—शिरश्छदा[5] पृष्ठप्रच्छदा[6] उरःकर्णमूलिका[7] चेति; तोरणिकयोरन्तराले तिस्रः शिरोग्रीवपृष्ठिका[8], उत्तरतिरश्चीना[9], शिरोग्रीवविवर्त्तनी[10] चेति; अधरतोरणिकाधस्तिस्रः—शिरःपृष्ठदण्डिका लघ्वी, गुर्व्वी, पार्श्वगा[11] चेति; मूलभागे च तिस्रः—शिरःपूर्व्वदण्डिका[12] लघ्वी गुर्व्वी च, उत्तरा कण्ठसङ्कोचनी[13] चेति। (तत्संस्थानानि २८ चित्रे द्रष्टव्यानि)।

## अथ पार्श्वकपालास्थिनी।

पार्श्वकपाले[14] नाम शिरःपार्श्वयोः कपालास्थिनी चतुरस्रे पुरःपश्चिमकपालयोर्मध्यस्थे। ताभ्यां मध्यरेखासंहिताभ्यां निर्मीयते शिरःसम्पुटस्य छदिः पार्श्वौ च।

---

१ Occipital Condyles. २ Tubercles. ३ Check Ligaments. ४ Anterior & Posterior Condyloid Foramina. ५ Occipito-frontatis. ६ Trapezius. ७ Sternomastoid. ८ Complexus. ९ Obliqus Superior. १० Splenius Capitis. ११ Rectus Capitis Posticus —minor & major and Rectus Capitis Lateralis. १२ Rectus Capitis Anticus—minor and major. १३ Superior Constrictor of Pharynx. १४ Parietal Bones.

एकैकस्य च पार्श्वकपालस्य द्वे तले बहिस्तलमन्तस्तलञ्चेति । चतस्रश्च धाराश्चत्वारश्च कोणाः ।

तत्र **बहिस्तलं** कूर्म्मपृष्ठप्रायं ( २७श चित्रम् ). तत्र च पिण्डाकार उत्सेधः पार्श्वकुम्भाख्यः[1] । द्वे च धनुर्वक्रे रेखे शङ्खतोरणिके[2] उत्तरा अधरा चेति नामतः । तत्र अधरायाः शङ्खतोरणिकायाः क्रोड़देशः शङ्खच्छदाख्यपेश्याः[3] प्रभवः ।

[३०श चित्रं—पार्श्वकपालम् (आभ्यन्तरतलम्)] ।




[ १, १, १, अङ्किताः प्रदेशाः कलाग्रन्थिखातानि । ]

**अन्तस्तलं** कोरोदरमुच्चावचञ्च । तत्र स्फुटानि मस्तिष्ककलापोषण्या मध्यमधमन्याः[4] प्रतानलाञ्छनानि. खातानि चेतस्ततः कलाग्रन्थिनिवेशाय[5] ( ३०श चित्रे, १ ) ।

---

१ Partieal Eminences. २ Superior and Inferior Temporal Ridges. ३ Temporal muscle. ४ Middle Meningeal Artery. ५ Pacchionian Bodies.

**धाराः** पुनः पार्श्वकपालस्य चतस्रो दन्तुराग्राः,—क्रमादूर्द्धतनी, अधस्तनी, पुरोगा, पश्चिमगा चेति। तत्र ऊर्द्धतनी इतरेण पार्श्वकपालेन सन्धेया, अधस्तनी शङ्खास्थ्ना जतूकास्थ्ना च, पुरोगा पुरःकपालेन, पश्चिमगा पश्चिमकपालेन।

**कोणाश्चत्वारः** पुरःकोणद्वयमूर्द्धाधस्तनं क्रमादुत्तराधरसंज्ञं, पश्चिमकोणद्वयञ्च तथेति। तत्र पुरःपश्चिमौ कोणावूर्द्धतनौ[1] आजन्मनो वर्षं यावत् कलामयौ स्तः, ततश्च दृश्यम् स्तनन्धयशिशोः कोमलं तालुद्वयं शिरसि पुरः पश्चादवस्थितम्। अधरस्तु पुरःकोणो धमनीखाताङ्कितो जतूकास्थ्ना च सन्धिमान्। अधरश्च पश्चिमकोणः पार्श्विकाख्यसिरापरिखयाऽङ्कितः, सन्धिमांश्च शङ्खास्थ्ना।

**सन्धान**ञ्चैवमेकैकस्य पार्श्वकपालस्य पञ्चास्थिभिरेव द्रष्टव्यम्। तत्संग्रहार्थश्चायं श्लोकः—

पुरःपश्चात्कपालाभ्यां शङ्खास्थ्ना च जतूकया।
सन्धिः पार्श्वकपालस्य स्वनाम्ना[2] चेति पञ्चभिः॥

## अथ पुरःकपालम्।

**पुरःकपालम् अग्रकपालं**[3] वा नाम शिरःसम्पुटपुरोभागनिर्म्मापकं कपालास्थि बृहन्मुक्ताग्टहाकारम्। तस्य च द्वावंशौ, ललाटभागो नेत्रच्छदिभागश्चेति। तत्र—

(१) **ललाटभाग**[4]स्त्रिभिः फलकैर्निर्म्मितः,—मध्ये ललाटफलकेन पार्श्वयोश्च पार्श्वफलकाभ्यामिति। तेषु—

**ललाटफलकं**[5] बहिस्तले कूर्म्मपृष्ठाकारम्। उभयतश्च तत्रोत्सेधौ कूर्म्मपृष्ठाकारौ अग्रकूर्म्मौ[6] नाम (३१ चित्रे अ०कू०), मेधाविनामत्युन्नतावल्पमेधसान्तु स्तोकोन्नतौ। तयोर्मध्ये नासामूलगं स्थानं "कूर्चकं"[7] भ्रूमध्यं वा नाम, तत्र स्थपन्याख्यं मर्म्मेति प्राञ्चः। तदानुपूर्व्या चोर्द्धगता किञ्चिन्मात्रदृश्या रेखा पुरःकपालार्द्धयोराबाल्यं पृथगवस्थितयोः संयोगसूचिका, सेयं गूढ़सीमन्तिका[8] नाम

१ Anterior and Posterior Fontanelles. २ स्वनाम्ना इतरपार्श्वकपालेन। ३ Frontal Bone. ४ Frontal Portion. ५ Frontal Plate. ६ Frontal Eminences. ७ Glabella. "कूर्चमस्त्री भ्रुवोर्मध्य" मित्यमरः। ८ Metopic Suture. प्रौढ़स्य पुरःकपाले तु नेयं दृश्या।

(तत्रैव सी)। उभयतश्चात्र भ्रुवोरनुक्रमेण तोरणाकारावुत्सेधौ भ्रूतोरणिकाख्यौ[1]। तयोरेकैकस्या द्वे कोट्यौ बाह्यकोटि[2]रान्तरकोटि[3]श्च, मध्यतश्च च्छिद्रं कोटरं वा सूक्ष्मम् अधिभ्रुवं[4] नाम ( २१श चित्रे अ० भ्रु० )। तत्र बाह्यकोटिरपाङ्गदेशस्था गण्डास्थिसन्धायिनी, आन्तरकोटिर्नासामूलस्था नासास्थिसन्धायिनी। छिद्रं पुनरधिभ्रुवाख्यं तदाख्यसिराधमनीनाडीनां निर्गमाय। भ्रूतोरणिकयोश्च पश्चादस्थ्यन्तर्निगूढानि कोटराणि ललाटकोटराणि नाम, तेषां नासागुहाभ्यामनुबन्धः।

[ २१श चित्रं—पुरःकपालम् (बहिस्तलम्) ]।




अन्तस्तलं पुनर्ललाटफलकस्य (२२श चित्रम्) कोरोदरमुपलक्षितञ्च यतस्तत्र ग्रन्थिखातै[6]र्धमनीप्रतानाङ्कैश्च[7]। मध्ये चास्य सिरापरिखा, तस्यास्तटयोः संयुज्यते मस्तिष्कच्छदिकाख्यकलाया दात्रिकाख्यो[8] मध्यभागः।

१ Superciliary ridges. २ External Angular Process. ३ Internal Angular Process. ४ Supra-orbital Foramen. ५ Supra-orbital Vein, Artery and Nerve. ६ Depressions for Pacchionian bodies. ७ Markings of Anterior Meningeal Artery ( ramifications ). ८ Falx Cerebri.

**पार्श्वफलके**[1] नाम उभयतो ललाटफलकस्य ईषत्खातोदरे फलके शङ्खच्छदाख्यपेश्योर्धारणाय। तयोरूर्द्ध्वसीम्नोर्धनुर्वक्रे रेखे शङ्खतोरणिके[2] नाम तयोरेव पेश्योः प्रभवभूते।

## [ ३२श चित्रं—पुरःकपालम् (अन्तस्तलम्) ]

( प्रदर्शनसौकर्य्याय उत्तानमधोमुखञ्च )




**३२श चित्र व्याख्या**—१, कलाग्रन्थिखातानि। २, धमनीप्रतानाङ्काः। ३, ४, झर्झरकोटराणि। ५, महापरिखा। ६, तस्यास्तटद्वयम्। ७, अग्रग्रन्थिखातम्। ८, नासागुहाच्छदिनिर्म्माणकं क्षुद्रफलकम्। ९, सिरापरिखायास्तटद्वयम्। सं० १—जतूकास्थ्नो लघुपचल्या सन्धेर्योऽशः। सं० २, झर्झरकपार्श्वेन। सं० ३, अग्रपीठास्थ्ना। सं० ४, ऊर्द्ध्वहन्वस्थ्ना। सं० ५, नासास्थ्ना। सं० ६, झर्झरकस्य मध्यफलकेन।

(२) **नेत्रच्छदिभागस्तु** पुरःकपालस्य नेत्रगुहाच्छदिभूताभ्यां नेत्रच्छदिफलकाभ्यां, महापरिखया च तन्मध्यवर्त्तिन्या उपलक्षितः। तत्र—

---

१ Temporal Plates. २ Temporal Ridges.

**नेत्रच्छदिफलके**[१] नाम त्रिकोणप्राये मसृणे ईषत्कोरोदरे च फलके अक्षिगोलकच्छदिभूते। एकैकस्य च फलकस्य बहिरंशे ईषदालक्ष्यं खातम[२]श्रुग्रन्थिधारणाय।

मध्ये चानयोः फलकयोः परिखा **महापरिखा**[३] नाम। सा च तटद्वय-संहितस्य झर्झरकास्थ्नश्चालनीपटलाख्येन भागेनापूरणीया। तटद्वये चास्याः कोटराणि झर्झरास्थ्नोऽभ्यन्तरस्थैः कोटरैरनुषङ्गीणि। पुरस्ताच्च महापरिखायाः क्षुद्रमस्थिफलकमेकमेकैकतो नासागुहाच्छदिनिर्मापकम्। तन्मध्यतश्चाग्रकण्टकं[४], पुरोभागे नासास्थिभ्यां पश्चिमतश्च झर्झरास्थ्ना मध्यफलकेन सन्धेयम्। तदुभयतश्च ललाटकोटरद्वाराणि[५]।

**सन्धानं** पुनः पुरःकपालस्य एकैकार्द्धे सप्तभिरस्थिभि र्द्रष्टव्यम्। तद्यथा—महापरिखाया बहिःसीम्नि सन्धीयते अस्थिचतुष्टयं—पुरोऽर्द्धे नासास्थि ऊर्द्ध्वहन्वस्थि अश्रुपीठास्थि च, पश्चार्द्धे झर्झरकास्थि चेति। नेत्रच्छदिफलकस्य पश्चिमान्तःकोणे जतुकास्थ्नः क्षुद्रपक्षतिः। तद्बहिःसीम्नि पश्चार्द्धे बृहत्पक्षतिः, पुरोऽर्द्धे गण्डास्थि। ललाटफलकपश्चिमधारायां च पार्श्वकपालमिति (दृश्यतां ३२श चित्रव्याख्या)। तेषु जतुका झर्झरकश्चेति द्वे एकैके, अन्यानि तु युग्मानि। एवञ्च पुरःकपालस्य द्वादशभिः सन्धिः। तत्स्मारकः श्लोकस्तु—

युग्मै र्नासाश्रुशङ्खोर्द्ध्वहनुपार्श्वकपालकैः।
जतुका झर्झराभ्याञ्च बद्धमग्रकपालकम्॥

**पेश्य**श्चात्र निविशन्ते तिस्रो युग्माः। तद्यथा—भ्रूमध्यमुभयतो भ्रूसङ्कोचनी नेत्रनिमीलनी[६] च, शङ्खतोरणिकायां शङ्खच्छदा चेति।

## अथ शंखास्थिनी।

**शङ्खास्थिनी**[७] द्वे शङ्खपार्श्वगे पार्श्वकपालयोरधः सीमस्थे। तस्य त्रयो भागाः—शङ्खचक्रं, कर्णमूलपिण्डम्, अश्मकूटश्चेति। तत्र—

(१) **शङ्खचक्रं**[८] नाम (३३श चित्रम्) शङ्खदेशनिर्म्मापकं चक्रप्रायमस्थि-फलकम्। तस्य बहिस्तलं मसृणं धमनीखाताङ्कितञ्च। तत्र दीर्घमग्रतोमुखं प्रवर्द्धनकं गण्डास्थिसन्धायि गण्डप्रवर्द्धनकं[९] नाम। तस्य द्वे धारे, उत्तरा अधरा

१ Orbital Plates. २ Lachrymal Fossa. ३ Ethmoid Notch. ४ Nasal Spine. ५ Openings of Frontal Sinuses. ६ Corrugator Supercilii & Orbicularis Palpabrerum. ७ Temporal Bones. ८ Squamous Portion. ९ Zygomatic Process.

च। तत्रोत्तरधारायां संयुज्यते शङ्खावरणी कला[1]। अधरधारायाः पुनरधस्तात् पुरोभागे अर्ब्बुदं हनुसन्धिपुरःस्थं सन्ध्यर्ब्बुदं[2] नाम। तत्पश्चात् हनुसन्धिस्थालकं[3] हनुमुण्डधारणाय. ततश्च कर्णकुहरं[4] कर्णस्रोतसो बहिर्द्वारभूतम्। कर्णकुहरपरिधौ च कर्णशष्कुलीनिर्म्माणकारिणां तरुणास्थ्नां संयोगः। मध्ये च स्थालककुहरयोस्त्रिकोणमस्थिफलकं कर्णमूलफलकं[5] नाम, तत् कर्णमूलिकाख्यस्य लालाग्रन्थेरधिष्ठानभूतम्। गण्डप्रवर्द्धनञ्च पश्चादधरया शङ्खतोरणिकाख्यया समुन्नतरेखया सानुबन्धं, तस्याश्चाधस्तात् रेखा शङ्खकर्णमूलपिण्डयोः संयोगाङ्करूपा (३३श चित्रे सं० रे०)।

[ ३३श चित्रम्—शङ्खास्थि (बहिस्तलम्)। ]




अन्तस्तलन्तु शङ्खचक्रस्य मस्तिष्कमध्यपिण्डधारणाय किञ्चित्खातोदरं धमनीखाताङ्कं प्रतनुधारञ्च मीनशल्कवत् (३४श चित्रम्)।

---

१ Temoral Fascia. २ Articular Tubercle. ३ Glenoid Fossa ४ Ext. Auditory Meatus. ५ Tympanic Plate. ६ Parotid Gland. ७ Temporal Ridge

(२) कर्णमूलपिण्डं[1] नाम कर्णमूलस्थमस्थिपिण्डं गोस्तनकाख्येन[2] प्रवर्द्धनकेनोपलक्षितम्। प्रवर्द्धनकच्छेदमधोमुखम् अन्तःशुषिरञ्च, कोटराणि[3] च तदन्तःस्थानि कर्णान्तरीयस्रोतसा सानुबन्धानि। अन्तस्तले चास्य अर्द्धचन्द्रिका नाम सिरापरिखा[4] पार्श्विकाख्यसिरापरिखया सानुबन्धा, छिद्रञ्च गोस्तनच्छिद्रं[5] नाम सिरापरिखाप्रवेशिसिराधारणाय।

[ ३४श चित्रम्—शङ्खास्थि ( अन्तस्तलम् )। ]




(३) अश्मकूटं[6] नाम पाषाणवदतिघनसङ्घातं कूटवच्चतुर्धारमस्थिपिण्डं शिरःसम्पुटभूमेर्मध्यभागे तिर्य्यक्प्रविष्टम्। तस्य चोर्द्ध्वदेशः शैलसानुसदृशः शिरःसम्पुटभूमिनिर्म्मापकः मस्तिष्कधारणाय ; अधोदेशः कर्णपीठ-कण्ठच्छदि-निर्म्मापकः। निगूढानि चाश्मकूटाभ्यन्तरतस्त्रोणि कर्णास्थीनि सूक्ष्माणि श्रुतियन्त्रञ्च।

अथैतानि अश्मकूटे विशेषतो लक्षणीयानि—(३४श चित्रम्)

(क) शङ्खचक्राश्मकूटयोः संयोगाङ्करेखा[7] ऊर्द्ध्वसीमस्था। तदुपकण्ठे च कूटाग्र-

---

१ Mastoid Portion. २ Mastoid Process. ३ Mastoid cells. ४ Sigmoid Groove. ५ Mastoid Foramen. ६ Petrous Portion. ७ Petro-Squamous Suture.

भागसन्निधौ रन्ध्रमार्गद्वयं, तत्रोर्द्ध्वतनो मार्गः पटहोत्तंसिन्याख्यपेश्याः[१] प्रवेशाय, अधस्तनस्तु श्रुतिमध्यस्रोतसा सङ्गतः पटहपूरणिकाख्यनाड़िकाया[२] द्वारभूतः।

(ख) श्रोत्रच्छदिकूटं[३] नाम उत्सेधः श्रोत्रपथस्यच्छदिभूतः। तत्पश्चिमतश्च समुन्नता रेखा अश्मतटिका नाम।

(ग) कर्णान्तर्द्वारं[४] श्रुतिवक्त्राख्यनाड़ीद्वयप्रवेशाय।

(घ) कर्णिकारन्ध्रं[५] कर्णभूमिगामिसूक्ष्मनाड़ी-धमन्योः रन्ध्रपथप्रवेशाय।

(ङ) शिफाप्रवर्द्धनकं[६] शिफाकारमधोमुखं पेशीस्नायुसंयोगप्रयोजनम्। मूले चास्य च्छिद्रं शिफागोस्तनान्तरीयं[७] नाम, तद् वक्त्रनाड्या बहिर्निर्गमाय।

(च) मातृकासुरङ्गा[८]—मातृकाख्यधमन्या धारणाय रन्ध्रमार्गरूपा। सेयमश्म-कूटस्याग्रभागतो दृष्टैकद्वारा कूटान्तर्निगूढ़ा, अधोधारायाञ्च दृष्टान्यद्वारा।

**सन्धानं** पुनरेकैकस्य शङ्खास्थ्नः पञ्चभिरस्थिभिः परिज्ञेयम्। तद्यथा— गण्डप्रवर्द्धनाग्रे गण्डास्थ्ना। शङ्खचक्रधारायामागण्डप्रवर्द्धनं पार्श्वकपालेन। तत्रैव गण्डप्रवर्द्धनाधस्तादश्मकूटाग्रं यावत् पश्चिमकपालेन। अश्मकूटाग्रादागण्ड-प्रवर्द्धनकोपकण्ठं जतूकास्थ्ना। हनुसन्धिस्थालके चाधोहन्वस्थिमुण्डेनेति।

पार्श्वपश्चात्कपालाभ्यां गण्डास्थ्ना च जतूकया।
वद्धं, सृष्टमधोहन्वा, शङ्खं स्यात् पञ्चसन्धिकम्॥

**पेश्य**श्चात्र संयुज्यन्ते एकैकस्मिन् शङ्खास्थ्नि पञ्चदश। तद्यथा—शङ्खचक्र-बहिस्तले शंखच्छदा[९]। गण्डप्रवर्द्धने गण्डमूलिनी[१०]। कर्णमूलपिण्डस्य बहिस्तले ललाटसङ्गा[११] चनी, उरःकर्णमूलिका[१२] शिरोग्रीवविवर्त्तनी[१३], पृष्ठदण्डिका[१४] शिरो-युजा, द्विगुम्फिका[१५] कर्णपृष्ठिका[१६] चेति षट्। शिफाप्रवर्द्धनके शिफागलान्तरीया[१७], शिफाकण्ठिका[१८] शिफारसनिका[१९]चेति तिस्रः। अश्मकूटभागे तालूत्तोलनी[२०] पटहोत्तंसनी[२१], तालूत्तंसनी[२], कर्णान्तरिका[२२] चेति चतस्रः। इति साकल्येन पञ्चदश (तेषां संयोगस्थानानि यथासम्भवं चित्रेष्वङ्कितानि)।

---

१ Tensor Tympani. २ Eustachian tube. ३ Eminentia Arcuata. ४ Internal Auditory Meatus. ५ Hiatus Canalis Facialis. ६ Styloid Process. ७ Slylo-mastoid Foramen. ८ Carotid Canal. ९ Temporal. १० Masseter. ११ Occipito-frontalis. १२ Sterno-mastoid. १३ Splenins Capitis. १३ Longissimus Capitis (or Trache-lo-mastoid). १४ Digastric. १५ Retrahens Aurem. १६ Stylo-pharyngeus. १७ Stylo-hyoid. १८ Stylo-glossus, १९ Levator Palati. २० Tensor Tympani. २१ Tensor Palati. २२ Stapedius.

# अथ जतूकास्थि।

जतूकास्थि नाम[1] शिरःसम्पुटमध्यभूमिनिर्म्मापकं जतूकाकारमस्थिखण्डं सकलशिरःकपालकेन्द्रकीलभूतम् (३५श चित्रम्)। तस्य चत्वारो भागाः—मध्ये जतूकाशरीरम्, पार्श्वयोश्च वृहत्पक्षतिद्वयं लघुपक्षतिद्वयञ्च, अधस्ताच्चरणद्वयञ्चेति। तत्र—

(१) जतूकाशरीरं[2] नाम मध्यस्थं पिण्डमुच्चावचं शून्यगर्भञ्च। गर्भस्थानि चास्य कोटराणि जातूककोटराणि[3] नाम झर्झरास्थिकोटरैः सानुबन्धानि।

अथास्य चत्वारि तलानि द्रष्टव्यानि—पुरस्तलं, पश्चिमतलम्, ऊर्द्ध्वतलम्, अधस्तलञ्चेति। तत्र—

(क) पुरस्तलं झर्झरास्थ्नः पार्श्वपिण्डाभ्यामुभयतः सन्धिमत्, मध्यतश्च तस्य समुन्नता रेखा झर्झरास्थ्नो मध्यफलकेन सन्धायिनी। चूड़ायाञ्चास्य प्रवर्द्धनं त्रिकोणकण्टकं[4] नाम झर्झरास्थिच्छदिभूतेन फलकेन सन्धप्रर्थम्।

(ख) पश्चिमतलं चतुरस्रं पश्चिमकपालास्थ्नो मूलभागेन सन्धेयम्।

(ग) ऊर्द्ध्वतले[5] त्रिकोणकण्टकस्य पश्चात् परिखा, च्छिद्रद्वयञ्च परिखाप्रान्तयोः, क्रमाद्दृष्टिनाड़ीपरिखा[6] दृष्टिनाड़ीरन्ध्रे[7] च नामतः। तत्र परिखा दृष्टिनाड़ीयोजिकायाँ धारणाय, रन्ध्रद्वयन्तु दृष्टिनाड्योरक्षिकूटप्रवेशाय। तेषां पश्चात् पोषणिकाख्यग्रन्थि[8]धारणाय खातं पोषणिकाखातं[9] नाम।

तस्यापि पश्चादीषदुन्नतं कूटं सुषुम्नापीठं[10] नाम सुषुम्नाशीर्षकधारणाय। उभयतश्च तस्य गभीरे खाते मातृकापरिखे[11] नाम, ते मातृकाधमन्योर्धारणाय। एकैकतश्च तत्पुरोभागे पौर्व्वापर्य्येणस्थितास्तिस्रो गुलिकाः[12] पुरोमध्य-पश्चिमाख्याः।

---

१ Sphenoid Bone. २ Body of the Sphenoid. ३ Sphenoidal Sinuses ४ Ethmoidal Spine. ५ Sella Turcica. ६ Optic Foramina. ७ Optic Commissure. ८ Pituitary Body. ९ Pituitary Fossa. १० Dorsum Sella. ११ Carotid Groove १२ Clinoid processes (antrior, middle & postrior)




[ ३५श चित्रम्—जतूकास्थि ( ऊर्द्ध्व तलम् ) ]

( स्वाभाविकायतनम् )

अधस्तलन्तु जतूकाशरीरस्य नासागुहा-कण्ठविवरयोश्छदिभूतम्। तत्र स्थूलमूलासमुन्नता रेखा रसनिका[1] नाम, सेयं नासामध्यप्राचीरभूतस्य सीरिकास्थ्नः पश्चिमप्रान्तेन सन्धायिनी।

---

१ Rostrum.

(२) **बृहत्पक्षतिद्वयं**[१] (३५श चित्रं) जतूकाशरीरादुभयतः शङ्खदेश-पर्य्यन्तप्रसृतं त्रिकोणप्रायञ्च। एकैकस्य च पक्षस्य त्रीणि तलानि,—ऊर्द्ध्वतलं, पुरस्तलं, बहिस्तलञ्चेति। तत्र—

(क) ऊर्द्ध्वतले पक्षतिपृष्ठाख्ये मस्तिष्कमध्यभूमिभृते विवरद्वयं वृत्तविवरं[२] जाम्बवविवरञ्च[३] नाम, ताभ्यां पञ्चमनाड्या मध्यम-पश्चिमयोः शाखयोर्निर्गमः। मूले चास्य पश्चिमतश्छिद्रं कोणविवरं नाम कलापोषखाख्यधमन्याः प्रवेशाय।

(ख) पुरस्तलं चतुरस्रं नेत्रकूटबहिःप्राचीरभूतञ्च।

(ग) बहिस्तलं विशेषादुच्चावचं शङ्खाधरिका[५]ख्यया रेखया द्विभागविभक्तञ्च। तत्र रेखाया ऊर्द्ध्वतनो भागः शङ्खदेशनिर्म्मापकः शङ्खच्छदाख्यपेशीप्रभवश्च, अधस्तनस्तु भागो गण्डमूलखातस्थः।

(३) **लघुपक्षतिद्वयं**[६] जतूकाशरीरस्य पुरस्तादुभयतोऽवस्थितं, पुरः-कपालास्थ्नो नेत्रच्छदिफलकाभ्यां सन्धेयम्। मध्ये च तयोः संयोजकं त्रिकोणकण्टकम्, मूले चोभयतो दृष्टिनाड़ीरन्ध्रद्वयं वर्णितपूर्व्वम्।

एकैकतश्च लघुबृहत्पक्षत्योर्मध्यतोऽन्तरालं त्रिकोणप्रायम्—पक्षान्तरालं[७] नाम। तेन शिरःसम्पुटाद् बहिर्निर्गच्छन्ति तृतीया, चतुर्थी, षष्ठी च नाड़ी, पञ्चम्याश्च नाड्याः प्रथमा शाखा नेत्रगा, सिराधमन्यश्च नेत्रगामिन्यः।

(४) **चरणद्वयं**[८] पुनर्जतूकास्थ्नः शरीरपश्चिमप्रान्तादुभयतो नीचैर्निर्गतम्। एकैकस्मिंश्च चरणे द्वे द्वे अस्थिफलके[९], तयोः पुरोवर्त्तिफलकमायतपृष्ठम्। पश्चिमन्तु अङ्कुशाग्रम्, अङ्कुशं[१०] च तदाश्रित्य विवर्त्तते तालुत्तंसनी[११] नाम पेशी। मध्ये चानयोः खुटमन्तरा[१२]लं तत्र तात्वस्थ्नः सन्धानम्।

---

१ Greater wings. २ Foramen Rotundum. ३ Foramen Ovale. ४ Foramen Spinosum. ५ Pterygoid Ridge. ६ Lesser wings. ७ Superior Orbital Fissure ( Foramen Lacerum Ant ). ८ Pterygoid processes. ९ Pterygoid plates. १० Hamular Process. ११ Tenson Palati. १२ Pterygoid Notch.

**सन्धानं** पुनर्जतूकास्थ्नः अष्टाभिरपि शिरःसम्पुटनिर्म्माणकैरस्थिभिः पञ्चभिश्च मुखमण्डलास्थिभिर्विज्ञेयम् । एष च तत्सन्धिसंग्राहकः श्लोकः—

शिरःसम्पुटगैः सर्व्वैर्युगाभ्यां गण्डतालुनोः ।
सीरिकाख्येन चानद्धा जतूका मध्यसंस्थिता ॥

सन्धानप्रकाराश्च चित्रे द्रष्टव्याः ।

**पेश्यश्चात्र** संयुज्यन्ते एकैकत एकादश । तद्यथा—बृहत्पक्षतेर्बहिस्तले द्वे, शङ्खकं[१]दा हनुमूलकर्षणी[२] उत्तरा चेति । लघुपक्षतेः पुरोभागे अक्षिकूटगाः पेश्यः षट् । जतूकाचरणफलकयोः हनुमूलकर्षणी[३] अधरा ( उत्तरा च). तालूत्तंसनी[४], उत्तरा कण्ठसङ्कोचनी[५] चेति ।

## अथ झर्झरास्थि ।

**झर्झरास्थि[६]** नाम नासामूलगं शुषिरभूयिष्ठमस्थिपिण्डकमक्षिकोटरयोरन्तराले निगूढ़म् (३६श चित्रम् ) । तस्य त्रयो भागाः — मध्यफलकम्, चालनीपटलम्, पार्श्वपिण्डद्वयञ्चेति । तत्र—

(१) **मध्यफलकं[७]** नाम नासामूल-मध्यप्राचीरनिर्म्माणसहायभूतं फलकम् । तस्याग्रधारायां सन्धीयते पुरःकपालस्य अग्रकण्टकं, नासास्थ्नोश्च परस्परसंयोगधारा । पश्चिमधारायां जतूकास्थ्नः पुरस्तलस्था रसनिकाख्या मध्यरेखा, सीरिका च । अधोधारा त्वस्य त्रिकोणाकृतितरुणास्थ्ना[८] नासाग्र-मध्यप्राचीरभूतेन सन्धायिनी ।

( २ ) **चालनीपटलं[९]** नाम नासामूलपटल[१०]भूतम् मध्यफलकशिरसि संलग्नं चालनीवत् सूक्ष्मच्छिद्रबहुलं फलकम् मध्यफलकस्य शिरसि संलग्नम् । तस्य चूड़ायाम् प्रवर्द्धनं शिखरकण्ट[११]कं नाम, तत्र दात्रिकाख्य[१२]कलांशसंयोगः, छिद्रपथैश्च प्रसरन्ति गन्धग्राहिनाड्यो[१३]: प्रतानाः ।

( ३ ) **पार्श्वपिण्ड[१४]द्वयम्** मधुचक्रवत् शुषिरगर्भं प्रतनुपत्रकनिर्म्मितञ्च । तत्र एकैकस्य पार्श्वपिण्डस्य षट् तलानि । तत्रोर्द्ध्वतलं कोटरबहुलं पुरःकपालस्य महापरिखापरिधिसन्धायि । पुरस्तलम् अश्रुपीठास्थ्ना ऊर्द्ध्वहन्वस्थ्ना च

---

१ Temporal Muscle. २ Ext. Pterygoid Muscle. ३ Int. Pterygoid. ४ Tensor Palati. ५ Superior Constrictor of Pharynx. ६ Ethmoid Bone. ७ Perpendicular Plate. ८ Triangular Cartilage of Nasal Septum. ९ Cribriform Plate. १० पटलं छदिः (Roof). ११ Crista Galli. १२ Falx Cerebri. १३ Olfactory Nerves. १४ Lateral Masses.

## [ ३६श चित्रम्---झर्झरास्थि ]

( पश्चिमतो दृष्टं----स्वाभाविकायतनञ्च )




सन्धिमत्, कोटराणि च तदधो नासागुहया सानुबन्धानि। पश्चिमतलमपि शुषिरबहुलं तादृशेन जतूकास्थिपुरस्तलेन सन्धिमत्। अन्तस्तलं नासागुहायाः पार्श्वप्राचीरभूतं क्षुद्रशुक्तिकाकाराभ्यामस्थिफलकाभ्यामुपलक्षितञ्च, तयोः क्रमात् ऊर्द्ध्वशुक्तिका-मध्यशुक्तिके[1] चेति संज्ञे। तयोराद्या नासागुहायाः ऊर्द्ध्वसुरङ्गायाः, द्वितीया तु मध्यसुरङ्गायाश्चूड़ाभूता, सन्धीयते च तदधः अधःशुक्तिकास्थि[2]। बहिस्तलं श्लक्ष्णचतुष्कोणफलकमयं नेत्रकोटरस्य अन्तःपीठनिर्म्मापकम्, तस्य नेत्रान्तपीठ[3]संज्ञा। एकैकस्य च पार्श्वपिण्डस्यास्थिचतुष्टयेन सन्धिः। तद्यथा—ऊर्द्ध्वं पुरःकपालस्य नेत्रच्छदिफलकेन, अधः ऊर्द्ध्वहन्वस्थ्ना, पुरः अश्रुपीठास्थ्ना, पश्चात् तात्वस्थ्ना चेति।

**सन्धानं** चैवं झर्झरास्थ्नस्त्रयोदशभिः शिरोऽस्थिभिर्विज्ञेयम्। तद्यथा—

पुरःकपालञ्च तथा जतूका नासास्थिनी चोर्द्ध्वहनू च तालू।
सीराग्रिका चाश्रुधरे च शुक्ती त्रयोदशैतानि हि झर्झरास्थ्नः[4]॥

पेशी तु नात्र निविशते कापि।

तान्येतानि अष्टौ शिरःसम्पुटास्थीनि व्याख्यातानि।

---

१ Superior Turbinated Process & Middle Turbinated Process. २ Inferior Turbinated Bone. अस्यैव नैवलं शुक्तिकासंज्ञापि। ३ Os planum. ४ सन्धीयन्ते इति शेषः।

## अथ कपालचक्रकाणि।

**कपालचक्रकाणि**[1] नाम कपालास्थ्नां सीमन्तेषु स्थितानि समन्ततो दन्तुरधाराणि शकलानि। तानि प्रायशः पार्श्वकपालयोः सन्धाने दृश्यानि, विशेषतश्च ब्रह्म-शिवरन्ध्रयोः सविधे। सर्व्वथा अनिश्चितावस्थानान्नेह तेषां पृथक्संख्या।

## अथ मुखमण्डलास्थीनि।

**मुखमण्डलास्थीनि** चतुर्द्दश मुखमण्डलनिर्म्मापकाणि। तद्यथा—द्वे नासास्थिनी, द्वे ऊर्द्ध्वहन्वस्थिनी, द्वे अश्रुपीठे, द्वे गण्डास्थिनी, द्वे तात्वस्थिनी, द्वे शुक्तिके चेति षट् युग्मास्थीनि (इति द्वादश)। सीराग्रिका अधोहनुश्चेति एकाकिनी अस्थिनी द्वे इति। तत्र हन्वस्थ्नां प्रयोजनं भक्षणचर्व्वणादि, इतरेषान्तु इन्द्रियाधिष्ठाननिर्म्माणादि।

## अथ नासास्थिनी।

[३६श चित्रम्—नासास्थिनी]

(सम्मुखतो दृश्ये)




**नासास्थिनी**[2] द्वे नासामूलस्थे बहिर्न्युब्जपृष्ठे अन्तःकोरोदरे च। ते मध्यरेखायां परस्परसन्धायिनी। तयोरूर्द्ध्वप्रान्तयोः सन्धिः पुरःकपालास्थ्ना नासामूलखातेन, बहिःपार्श्वयोस्तु ऊर्द्ध्व-हन्वस्थ्नोर्नासाकूटाभ्याम्। अधःप्रान्तयोः पुनर्नासापार्श्विकाख्ययोस्तरुणास्थिभ्यां[3] संयोगः। पश्चिमतश्च परस्परसन्धानरेखायां सन्धीयेते पुरःकपालस्याग्रकण्टकं, झर्झरास्थि च। एकैकस्य च नासास्थ्नोर्बहिस्तले मध्यतश्छिद्रं सिराप्रवेशाय, अभ्यन्तरतश्च सूक्ष्मा परिखा नासानाड़ी[4] धारणाय।

**सन्धान**ञ्चैवमेकैकस्य नासास्थ्नोऽस्थिचतुष्टयेन द्रष्टव्यम्।

---

१ Wormian Bones. २ Nasal Bones. ३ Lateral Cartilages of the Nose.
४ Nasal Nerve ( Ext. Branch ). ५ तरुणास्थिवर्ज्जमिति बोध्यम्।

# अथ ऊर्द्ध्वहन्वस्थिनी।

**ऊर्द्ध्वहन्वस्थिनी**[१] द्वे मुखमण्डलास्थिषु प्रधानभूते। ताभ्यां हि परस्पर-संहिताभ्यां निर्म्मीयते ऊर्द्ध्वहनुमण्डलं सतालुपटलं सदन्तोदूखलञ्च। निर्म्माणोपकरणे च ते प्राधान्येन नासाकोटरयोर्नेत्रपीठयोः, मुखमण्डलपुरःपार्श्वभागयोश्च। आकारमहत्त्वेऽपि लघुतरे च ते शून्यगर्भत्वात्।

एकैकस्य च ऊर्द्ध्वहन्वस्थ्नः पञ्च भागाः—मध्ये हनुपिण्डम्, अभितश्च प्रवर्द्धन-चतुष्टयमिति। प्रवर्द्धनानि च उपरिष्टान्नासाकूटम्, बहिःपार्श्वतो गण्डधर-कूटम्, अन्तःसीम्नि तालुफलकम्, अधःसीम्नि च दन्तोदूखलिकमिति। तत्र—

[ ३७श चित्रम्—ऊर्द्ध्वहन्वस्थि (बहिस्तलम्) ]




(१) **हनुपिण्डं**[२] नाम शून्यगर्भमस्थिपिण्डं मध्यस्थम्। तस्य चत्वारि तलानि बहिस्तलं—मौखिकतलं नाम बहिर्मुखमण्डले दृश्यम्, गण्डोत्तरतलं गण्डधरकूटपश्चिमम्, नेत्रपीठतलं नेत्रकोटरभूमिभूतम्, आन्तरतलं नासास्य-विवरयोः पार्श्वप्राचीरभूतञ्चेति। तेषु—

---

१ Superior Maxillary Bones. सुश्रुते तु ऊर्द्ध्वहन्वस्थ्नोर्मिलितयोरैक्येन ग्रहणम्। तथाच तन्मते ऊर्द्ध्वहनुरधोहनुश्चेति द्वे एव हन्वस्थिनी (न तु तीणि) [सु० शा० ५ अ०]। २ Body.

## [ ३८श चित्रम्—ऊर्द्ध्वहन्वस्थि (अन्तस्तलम्) ]




(क) मौखिकतले[१] नेत्रकोटराधःसीम्नि च्छिद्रं नेत्राधरीयं[२] नाम, तदाख्य-नाड़ी-धमनीनिर्गमाय ।

(ख) गण्डोत्तरतलं[३] तदाख्यखातस्य प्राचीरनिर्म्मापकं शङ्खच्छदाख्यपेशी-संहृतम् । तत्र कानिचित् सूक्ष्माणि विवराणि पश्चिमदन्तिकाख्यानि[४] तदाख्य-नाड़ी-धमनीनां प्रवेशाय । तत्रोच्चावच उत्सेधः पश्चिममूले हनुपश्चिमार्ब्बुदं[५] नाम, तस्य ताल्वस्थ्ना सन्धानम् ।

(ग) नेत्रपीठतलं[६] नेत्रकोटरभूमिः पुरोभागनिष्पादकं तस्यान्तःसीम्नि खातम् अश्रुपीठखातं[७] नाम, तत्र सन्धीयते अश्रुपीठास्थि । बहिर्धारा चास्य क्रमात् झर्झरक-ताल्वस्थिभ्यां सन्धायिनी । सूक्ष्मा च तद्बहिःप्रान्ते सीता[८] नेत्राधरीय-पेशी-धमनीनां धारणाय, छिद्रञ्चात्रैवाग्रदन्तिकाख्यं[९]नाड़ी-धमनीप्रवेशाय ।

(घ) आन्तरतलं[१०] नासाख्यविवरपार्श्वस्थम्, तस्य पुरःसीम्नि महत् खातं नासाखातं[११] नाम । द्विभागविभक्तञ्च तत्, मध्यतस्तालुफलकेन । तस्योर्द्ध्वतनो भागो नासागुहांशः, अधस्तनस्तु मुखविवरांशः । दृश्यञ्च तत्रैव पार्श्वतो महत् कोटरं हनुगर्भकोटरं[१२] नाम, तत् सानुबन्धं नासागुहाया मध्यसुरङ्गापथेन[१३] । वर्त्तते च तत् संहतकरोटौ झर्झरक-शुक्तिका-ताल्वस्थिभिः पिहितम्, अन्तरा-वृतञ्च कलाविशेषेण जीवच्छरीरे । द्वारञ्चास्य[१४] तथापिहितस्य सूक्ष्मं दृश्यते शलाकामात्रप्रवेशार्हं नासागुहान्तः ।

---

१ Facial Surface. २ Infra-orbital Foramen. ३ Zygomatic Surface. ४ Posterior Dental Canals. ५ Tuberosity. ६ Orbital Surface. ७ Lachrymal Notch. ८ Infra-orbital Canal. ९ Opening of Antarior Dental Canal. १० Internal Surface. ११ Nosal Fossa. १२ Antrum of Highmore. १३ Middle Meatus of the Nose. १४ एतञ्च सर्व्वं घ्राणेन्द्रियवर्णनावसरे सम्यक् स्फुटीभविष्यति ।

(२) **नासाकूटं**[१] नाम नासामूल-पार्श्वगं प्रवर्द्धनम्। तस्य सन्धिरूर्द्ध्वं पुरःकपालेन, मध्यरेखायां नासास्थ्ना, बहिःसीम्नि च अश्रुपीठास्थ्ना। अन्तस्तलञ्चास्य खातोदरं नासामध्यसुरङ्गानिर्म्माणाय. तत्र च रेखाद्वयं क्रमात् झर्झरकास्थ्नो मध्यशुक्तिकाभागस्याधःशुक्तिकास्थ्नश्च सन्धानाय। पश्चिमतश्चास्य स्फुटा परिखा अश्रुवाहिकायाः[२] धारणाय।

(३) **गण्डधरकूटं**[३] नाम त्रिकोणाकार उत्सेधो बहिःपार्श्वगः। तस्य गण्डास्थ्ना सन्धानम्।

(४) **तालुफलकं**[४] नाम तालुपुरोभागनिर्म्मापकं फलकं हनुपिण्डस्यान्तरतलादुन्नतम्, तस्योर्द्ध्वतलं नासाभूमिः, अधस्तलञ्च तालुच्छदिभूतम्। सन्धीयते च तन्मध्यरेखायामितरस्योर्द्ध्वहन्वस्थ्नस्तालुफलकेन। एवंसंहितस्य च तालुफलकस्य पुरोभागे मध्यरेखायां दृश्यते खातमधस्तले तत् अग्रतालुखातं[५] नाम, तत्र चत्वारि छिद्राणि नासातालुगामिनीनां नाड़ी-धमनीनां[६] तालुप्रवेशाय। ऊर्द्ध्वतले च तालुफलकस्य मध्यरेखायाः पुरोऽर्द्धे समुन्नता रेखा सीरिकास्थ्नः सन्धानाय। पश्चिमधारायाञ्च तालुफलकस्य सन्धीयते ताल्वस्थ्नो ह्रस्वपत्रकम्।

(५) **दन्तोदूखलिकं**[७] नाम दन्तोदूखलधारणमर्द्धचन्द्राकारमधोमुखं प्रवर्द्धनकम्। तत्र बाल्ये पञ्च दन्तोदूखलानि, यौवने त्वष्टौ. तत्तत्संख्यकदन्तधारणाय। तद्बहिःपृष्ठे च खातं दन्तमूलविलाख्यं[८] पेशीसंयोगाय।

**सन्धान**ञ्चैवमेकैकस्योर्द्ध्वहन्वस्थ्नो नवभिरस्थिभिर्द्रष्टव्यम्। तस्य चायं संग्रहश्लोकः—

> स्वनाम्ना गण्डनासाश्रुसीरिकातालुशुक्तिभिः।
> झर्झराग्रकपालाभ्यां नवभिर्हनुरूर्द्ध्वगा॥

**पेश्य**श्चात्र संयुज्यन्ते एकैकस्मिन्नूर्द्ध्वहन्वस्थि, एकादश। ताः प्रायेण नेत्रोन्मीलन-निमीलन-नासाधरौष्ठसंकोचन-विस्फारण-चर्व्वणादिकार्य्याः। तासां विवरणं पेश्यध्याये वक्ष्यते।

---

१ Nasal Process. २ Lachrymal Duct. ३ Malar Process. गण्डकूटमिति तु गण्डास्थ्य उन्नतभागस्य संज्ञा। ४ Palate Process. ५ Anterior Palatine Fossa. ६ Naso-palatine Nerves and Anterior Palatine Vessels. ७ Alveolar Process. दन्तोदूखलानां धारणादियं संज्ञा। ८ Incisive Fossa.

## अथ अश्रुपीठास्थिनी ।

**अश्रुपीठे[1] अश्रुधरे वा** ( ३९श चित्रम् ) नाम द्वे क्षुद्रास्थिनी नासास्थ्नोर्नासाकूटयोश्च पश्चादक्षिकोटरपार्श्वान्तर्निगूढ़े तनुपत्रनिर्म्मिते अर्थ्यपात्र-सदृशाकारे च । अश्रुवाहिकाख्यप्रणालीधारणात्तयोरश्रुपीठसंज्ञा ।

**[३९श चित्रम्—अश्रुपीठास्थि]**

( बहिस्तलम् )




एकैकस्य चाश्रुपीठस्य द्वे तले—बहिस्तलमन्तस्तलञ्चेति । तत्र बहिस्तले अश्रुमार्गधारणाय प्रणाली—अश्रुवाहिका[2] नाम (चित्रे ब) । अन्तस्तलन्तु झर्झरास्थ्नः कोटरद्वारपिधानभूतम् ।

चतस्रश्चास्य धाराः,—तत्र ऊर्द्ध्वधारायां सन्धीयते पुरःकपालास्थि, अधोधारायामग्रतः अङ्कुशाकारप्रवर्द्धनेन शुक्तिका, पुरोधारायामूर्द्ध्वहन्वस्थ्नो नासाकूटम्, पश्चिमधारायां झर्झरकस्य नेत्रपार्श्वपीठम् ।

## अथ गण्डास्थिनी ।

**गण्डास्थिनी[3]** द्वे बाणाग्रफलकसदृशाकारे गण्डयोः ( ४०श चित्रम् ) । ताभ्यां निर्म्मीयेते गण्डोत्सेधौ, भूमौ च नेत्रकोटरयोरंशतः । तयोरेकैकस्य द्वे तले—बहिस्तलमन्तस्तलञ्चेति । तत्र—

---

१ Lachrymal Bones.　२ Nasal Duct.　३ Malar Bones.　गण्डास्थीति सुश्रुतकृताख्या । चरके तस्यैव गण्डकूटसंज्ञा ।

[ ४०अ चित्रम्—गण्डास्थि ( वामम् ) ]।



**बहिस्तलं** न्युब्जपृष्ठम् **गण्डकूट**[1] निर्म्मापकम्। तत्र छिद्रं गण्डच्छिद्रं[2] नाम नाड़ी-धमनीनिर्गमाय।

**अन्तस्तलं** कोटरोदरम्, तत्र बन्धुरत्रिकोणांशे ऊर्द्ध्वहन्वस्थ्नो गण्डधरकूटस्य सन्धानम्।

चत्वारि चैकैकस्मिन् गण्डास्थ्नि प्रवर्द्धनकानि, तेषु त्रीणि क्रमात् पुरः-पश्चिमोर्द्ध्वकोटिभूतानि, एकमक्षिकोटरभूमिप्रविष्टम्। तत्र—

(१) **पुरःप्रवर्द्धनं** सूच्याग्रं नेत्राधरीयं[3] नाम, ऊर्द्ध्वहन्वस्थ्ना सन्धेयम्।

(२) **पश्चिमप्रवर्द्धनं** शङ्खिकं[4] नाम शङ्खास्थ्नो गण्डप्रवर्द्धनेन सन्धायि।

(३) **ऊर्द्ध्वप्रवर्द्धनम्** अपाङ्गप्रवर्द्धनं[5] नाम अग्रकपालस्य बाह्यकोणेन सन्धिमत्।

(४) **अक्षिफलकम्**[6] अक्षिकोटरभूमेरंशभूतमीषत्खातोदरम् ऊर्द्ध्वपुरः-प्रवर्द्धनयोर्मध्यस्थम्। तत्र च शङ्खगण्डिकाख्यौ रन्ध्रमार्गौ[7] गण्डच्छिद्रान्तौ नाड़ीप्रवेशाय। धारा चास्य पश्चान्मुखी जतूकास्थ्ना सन्धायिनी।

अधःकोटिस्तु गण्डास्थ्नो न केनापि सन्धायिनी। अनुभूयते च सा सगण्डकूटा त्वचोऽधस्तात्।

**सन्धानञ्च** वमैकैकस्य गण्डास्थ्नश्चतुर्भिरस्थिभिर्द्रष्टव्यम्। श्लोकश्चायं तत्स्मरणार्थः—

शङ्खेनाग्रकपालेन चोर्द्ध्वहन्वा जतूकया।
एकैकमिह गण्डास्थि चतुर्भिर्दृढ़संहितम्॥

**पेश्यः** पुनरत्र निविशन्ते पञ्च। तद्यथा—बहिस्तले ओष्ठसमुत्कर्षणी[8], सृक्कणीकर्षणी[9] लघ्वी गुर्व्वी चेति तिस्रः। अन्तस्तले—शङ्खच्छदा[10], हनुकूटकर्षणी[11] चेति द्वे।

---

१ Malar Tuberosity. २ Malar Foramen. ३ Infra-orbital Process. ४ Zygomatic Process. ५ Frontal Process. ६ Orbital Process. ७ Tempro-Malar Canal. गण्डच्छिद्रञ्च क्वचिद् युग्मं दृश्यते। ८ Levator Labii Superioris. ९ Zygomaticus minor and major. १० Temporal. ११ Messeter.

# अथ ताल्वस्थिनी ।

ताल्वस्थिनी[१] द्वे (४१श चित्रम्) तनुपत्रकनिर्म्मिते नेत्र-नासास्य-कुहराणां पश्चिमस्थे खनित्राकारे[२]। ते च नेत्रकोटरभूमेर्नासाभूमिपार्श्वयोस्तालु-पटलस्य च निर्म्माणसहायभूते। तयोरेकैकस्य द्वौ भागौ प्रतनुपत्रकमयौ—दीर्घपत्रकं ह्रस्वपत्रकञ्चेति। तत्र—

## [ ४१श चित्रम्—ताल्वस्थि (वामम्) ]

(पश्चिमतोदृष्टम्)




(१) **दीर्घपत्रकं**[३] नेत्रकोटरान्तात्तालुमूलं यावदालम्बितम्।

तस्य पुरोधारा ऊर्द्ध्वहन्वस्थिपिण्डस्य पश्चात् सन्धेया, पश्चिमधारा तु द्विमुखी जतूकास्थ्नश्चरणफलकयोरन्तराले सन्धायिनी। तस्यान्तस्तलं मसृणं समुन्नताभ्यामालिकाभ्यां त्रिभागविभक्तञ्च। तत्र ऊर्द्ध्वतनी आलिका उत्तरालिका[४] नाम, तत्र सन्धीयते झर्झरास्थ्नोऽवयवो मध्यशुक्तिकाख्यः। अधस्तनी तु आलिका अधरालिका[५] नाम, तत्र शुक्तिकास्थ्नः सन्धानम्। अनयोश्च मध्यस्थः प्रदेशो नासापथस्य मध्यसुरङ्गयाऽनुषज्यते; तदूर्द्ध्वाधरौ तु प्रदेशौ ऊर्द्ध्वाधरसुरङ्गाभ्याम्।

---

१ Palate Bones. २ खनित्रं भूमिखननयन्त्रं (कोदाल वा कुदालि—इति भाषा), Spade Vertical Plate. ४ Superior Terbinated Crest. ५ Inferior Turbinated Crest.

बहिस्तलन्तु दीर्घपत्रकस्य पश्चिमतालुकाख्यया[1] सूक्ष्मपरिखयाङ्कितम् ऊर्द्ध्व-हन्वस्थ्न आन्तरतलेन सन्धेयञ्च।

अथास्य दीर्घपत्रकस्य चूड़ायां द्वे प्रवर्द्धनके पुरःपश्चिमप्रसृते। तयोः पुरोगं[2] नेत्रकोटरभूमिप्रवेशि. तस्य जतूका-झर्झरकोर्द्ध्वहन्वस्थ्नां नेत्रपीठफलकैः सन्धानम्। पश्चिमगं[3] जतूकास्थिसन्धायि। सन्धौ चानयोः खातं तालुजातूकं[4] नाम, तेन नाड़ी-धमनीनां नासाभ्यन्तरतः प्रवेशः।

(२) **ह्रस्वपत्रकं**[5] नाम दीर्घपत्रकस्य मूलादुद्गतमन्तर्मुखं पत्रकम्। तस्योर्द्ध्वतलं नासाभूमिः, अधस्तलञ्च तालुपटलस्य पश्चिमभागनिर्म्मापकम्। पुरोधारा ऊर्द्ध्वहन्वस्थ्नस्तालुफलकेन सन्धायिनी, पश्चिमधारा तु मुक्तैव, कोमलतालुधरा च, कण्टकञ्चात्र काकलकधरम्।

ह्रस्वदीर्घपत्रकयोः सन्धानकोणस्तु तालुकोणाख्यः।

स च इतरताल्वस्थ्नो ह्रस्वपत्रकेणान्तर्धारायां सन्धिमान्। सन्धौ चानयोरुपरिष्टात् परिखा सीरिकास्थ्नो दृढ़सन्धानाय।

**सन्धानञ्चैवं** षड्भिरस्थिभिस्ताल्वस्थ्नो विज्ञेयम्। एष च तत्संग्राहकः श्लोकः।

झर्झरञ्च जतूका च शुक्तिका चाथ सीरिका।
स्वसंज्ञञ्चोर्द्ध्वहन्वस्थि ताल्वस्थ्ना संहितानि षट्॥

**पेश्यः** पुनरत्र संयुज्यन्ते चतस्रः,—उत्तरा कण्ठसंकोचनी[7], अधरा हनुकूटकर्षणी[8], काकलकिनी[9], तालूत्तंसनी[10] चेति।

## अथ शुक्तिकास्थिनी।

शुक्तिकास्थिनी[11] द्वे—(४८श चित्रान्तर्द्रष्टव्ये) प्रतनुशुषिरपत्रमये क्षुद्रशुक्तिकाकारे, नासागुहायां निम्नमध्यसुरङ्गयोर्मध्यस्थे। ते च झर्झरकास्थ्नः शुक्तिकाफलकापेक्षया निम्नस्थे—इति तयोः क्वचित् अधःशुक्तिका-संज्ञापि।

---

१ Posterior Palatine Canel. २ Orbitel Process. ३ Sphenoidal Process. ४ Spheno-palatine Notch. ५ Horizontal Plate. ६ Uvula. ७ Superior Constrictor of Pharynx. ८ Internal Pterygoid. ९ Azygos Uvulœ. १० Tensor Palati. ११ Inferior Turbinated Bone.

एकैकयोश्च शुक्तिकयोः द्वे तले—अन्तस्तलं बहिस्तलञ्च। तत्राद्यं कोरोदरं नासापथस्य निम्नसुरङ्गानिर्म्मापकम्, द्वितीयं न्युब्जपृष्ठं नासामध्यप्राचीराभिमुखम्।

अस्याश्चोर्द्ध्वधारा पुरोभागे ऊर्द्ध्वहन्वस्थ्ना सन्धायिनी, पश्चिमभागे च तालवस्थ्ना। द्वे च तत्र प्रवर्द्धनके अश्रुकूटक-झर्झरकूटकसंज्ञे,[1]—तयोराद्यं सन्धीयते अश्रुधरास्थ्ना, द्वितीयन्तु झर्झरास्थ्ना। अधोधारा पुनरस्या विमुक्ताग्रा। एष चास्याः सन्धिस्मारकः श्लोकः।

> झर्झरेणोर्द्ध्वहन्वस्थ्ना तालवस्थ्ना चाश्रुधारिणा।
> चतुर्भिरूर्द्ध्वमेव स्यात् शुक्तिका दृढसंहिता॥

## अथ सीरिका।

**सीरिका[2] सीराग्रिका** वा नाम (४२श चित्रम्) नासाखातस्य पश्चिमभागे मध्यप्राचीरभूतमस्थिफलकं सीराग्रसदृशाकारं प्रतनुपत्रमयम्। अस्याश्चाग्रधारायां संयुज्यते झर्झरकास्थ्नो मध्यफलकं नासाग्रप्राचीरभूतं, त्रिकोणतरुणास्थि च। पश्चिमधारा त्वस्याः गलविवराभिमुखी विमुक्ताग्रैव[3]। अधोधारा चास्या ऊर्द्ध्वहन्वस्थ्नोस्तालवस्थ्नोश्च परस्परसन्धानरेखायां संहितेति, तत्रास्थिचतुष्टयेन सन्धिः। ऊर्द्ध्वधारा तु परिखाङ्किता तटद्वयोपलक्षिता च, तत्र जतूकास्थ्नो निम्नतलस्थया रसनिकाख्यरेखया सन्धिः।

[ ४२श चित्रम्—सीरिकास्थि ]।




१ Lachrymal & Ethmoidal Processes. २ Vomer. ३ न केनापि संहितेत्यर्थः।

पार्श्वयोश्च सीरिकास्थ्नः[1] सूक्ष्मे परिखे नासातालुकाख्यनाड्योर्धारणाय। अयञ्चास्य सन्धिस्मारकः श्लोकः।

ऊर्द्ध्वहन्वस्थियुगलं तालुयुग्मञ्च झर्झरम्।
जतूका चेति षट्केन संहिता सीरिका दृढ़म्॥

## अथ अधोहन्वस्थि।

**अधोहन्वस्थि**[2] ( ४३श चित्रम् ) तावदेकमधोदन्तपंक्तिधारणं मुखमण्डलास्थिषु वृहत्तमं दृढ़तमञ्च। तस्य द्वौ भागौ,—हनुमण्डलं नामाश्वखुराकारोभागः, हनुकूटद्वयञ्च तुङ्गोर्द्ध्वगं हनुसन्धिप्रविष्टमुभयतः। तत्र—

(१) **हनुमण्डलम्**[3] अधस्तनदन्तोदूखलधारकं मुखमण्डलाधःसीमसम्पादकम्। तच्च बाल्ये पृथगवस्थितयोर्वामदक्षिणार्द्धयोश्चिवुकदेशे संहितयोरैकोभावान्निष्पन्नमिति तत्त्वज्ञाः। तस्य च द्वे तले,—बाह्यतलमान्तरतलञ्चेति, द्वे च धारे—ऊर्द्ध्वधारा अधोधारा चेति।

तत्र बाह्यतले चिवुकदेशे उत्सेध श्चिवुकपिण्डं[4] नाम। तदुभयतः अधरोत्क्षेपण्योः[5] पेश्योर्निवेशः। ततश्च समुद्गता सन्धानाङ्कभूता रेखा चिवुकसन्धानिका[6] नाम।

---

१ Naso-palatine Grooves. २ Inferior Maxillary Bone. ३ Horizontal Portion or Body. ४ Mental Process. ५ Levator Labii Inferioris. ६ Symphysis menti.

[ ४३ अ चित्रम्—अधोहन्वस्थि । ]
( बाह्यदृश्यम् )



तदुभयतश्च पश्चाद् विवरे अनुचिवुकाख्ये[1] तदाख्यनाड़ी-सिरा-धमनीनां प्रवेशाय। तयोरेकैकस्य मूलतस्तिर्य्यक्-पश्चिमाभिमुखा रेखा बाह्यतिरश्चीना[2] नाम,—तदुपकण्ठे च निविशेते अधरावनमनी,[3] सृक्कणीनमनी[4] चेति पेश्यौ, तदधस्ताच्च अधोधारासमीपे गलपार्श्वच्छदा[5] नाम पेशी।

आन्तरतलं तावदीषत्कोरोदरं सर्व्वत्रैव, तत्र मध्यरेखामुभयतो द्वे द्वे कलायके—रसनाकलायके[6] नाम। तत्र पेशीचतुष्टयस्य संयोगः। तन्मूलतश्च तिर्य्यगूर्द्ध्वं पश्चादुगता रेखा आन्तरतिरश्चीना[7] नाम, सेयं मुखभूमिकण्ठिकाख्यपेश्याः[8] प्रभवभूता। अस्याश्चोपरिष्टात् पुरोभागे खातं जिह्वाधरिकाख्यग्रन्थिधारणाय।[9] अपरञ्चास्या अधस्तात् पश्चिमतः खातं हन्वधरीयं[10] नाम तदाख्यग्रन्थिधारणाय।

ऊर्द्ध्वधारा तावत् हनुमण्डलस्य दन्तोदूखलमण्डलधरा। दन्तोदूखलानि च बाल्ये पञ्च पञ्च एकैकार्द्धे, अष्टाष्टौ च यौवने। विलीयन्ते च तानि वार्द्धके। पश्चार्द्धयोश्च तत्र निविशेते कपोलिकाख्ये[11] पेश्यौ। दन्तास्तु समग्रकरोटिवर्णने वर्णनीयाः।

अधोधारा पुनः स्थूलाग्रा त्वङ्मात्रावरणा च। तस्याः पश्चिमप्रान्तयो र्नातिगभीरे परिखे वक्त्रधमनीपरिखे नाम वक्त्रधमन्यो[12] र्धारणाय।

(२) **हनुकूटद्वयं**[13] नाम हनुमण्डलस्य पश्चिमप्रान्ताभ्यामुद्गतं चतुरस्रप्रायं प्रवर्द्धनद्वयम्। तदेव हनुमूलवन्धनसंज्ञमिति प्राञ्चः[14]।

एकैकस्य च हनुकूटस्य द्वे शिखरे,—पुरस्तात् हनुकुन्तः, पश्चिमतो हनुमुण्डञ्चेति। द्वे च तले—बाह्यमाभ्यन्तरञ्चेति। चतस्रश्च धाराः—पूर्व्व-पश्चिमोत्तराधराः।

---

१ Mental Foramina. २ Ext. Oblique line. ३ Depressor Labii Inferioris. ४ Depressor Anguli Oris. ५ Platysma Myoides. ६ Genial Tubercles. ७ Internal Oblique line. ८ Mylo-hyoid. ९ Sublingual Gland. १० Submaxillary Gland. ११ Buccinator. १२ Facial Arteries. १३ Rami of Lower Jaw. १४ चरकसुश्रुतेयं संज्ञा।

तत्र **हनुमुण्डं**[१] नाम वर्त्तुलप्रायं पश्चिमशिखरं हनुसन्धिखातप्रवेशि । तन्मूलञ्च परितः सम्बध्यते स्नायुकोषः । अभ्यन्तरतले चास्य मूलतो निविशते हनुमूलकर्षणी उत्तरा[२] नाम पेशी ।

**हनुकुन्तो**[३] नाम त्रिकोणप्रायं कुन्ताग्रसदृशं पुरःशिखरं हनुकूटस्य । तत्र निविशते बाह्याभ्यन्तरतलयोः शङ्खच्छदाख्या पेशी ।

बहिस्तले पुनर्हनुकूटस्य निविशते हनुकूटकर्षणी[४] नाम पेशी । अन्तस्तले च हनुमूलकर्षणी अधरा[५] । मध्ये चान्तस्तलस्य स्फुटं विवरम् अधराया दन्तमूल-सुरङ्गाख्यायाः प्रणाल्या द्वारभूतम्[६], तेन अधरदन्तमूलिकाख्यानां सिरा-धमनी-नाड़ीनां[७] प्रवेशः ।

अथास्य हनुकूटस्य **ऊर्द्धधारा** अर्द्धचन्द्राकारा[८], तद्‌द्वारेण हनुकूट-कर्षण्याख्यपेशीमभितः प्रसरन्ति नाड्यः सिरा-धमन्यश्च । **अधोधारा** तावत् हनुमण्डलाधोधारया सानुबन्धा । कोणश्च तत्र पश्चिमतो हनुकोणो[९] नाम—तत्र हनुकोणिकाख्यस्नायोः संयोगः । **पुरोधारा** तन्वी पेशीनिगूढ़ा च । **पश्चिमधारा** पुनः स्थूला कर्णमूलिकाख्य[१०]ग्रन्थि-समाच्छन्ना च ।

**सन्धानं** पुनरधोहन्वस्थ्यः शङ्खास्थ्नोर्हनुसन्धिखाताभ्यां परिज्ञेयम् ।

**पेश्यस्त्विह** निविशन्ते पञ्चदश युग्माः यथोक्ताः ।

एतावांश्च अधोहन्वस्थ्नि लक्ष्यो विशेषः, यथा बाल्ये हनुकूटयोर्हनुमण्डलं प्रति तिर्य्यङ्निविष्टयोः क्रमाद् यौवने ऋजुभावः, वार्द्धके च पुनर्विशेषत-स्तिरश्चीनता दन्तोदूखलविलयश्चेति[११] ।

तान्येतानि मुखमण्डलास्थीनि व्याख्यातानि ।

## अथ कण्ठिकास्थि ।

**कण्ठिकं जिह्वामूलिकं**[१२] वा नाम (४४श चित्रम्) रसनामूलग-मश्वखुराकारमस्थिखण्डं नानापेशीनिवेशभूमिभूतं कण्ठे श्वासपथचूड़ाया-

---

१ Condyle of Lower Jaw. २ Ext. Pteryrygoid. ३ Coronoid Process. ४ Masseter. ५ Internal Pterygoid. ६ Opening of Internal Dental Canal. ७ Inferior Dental Vessels and Nerve. ८ Sigmoid Notch. ९ Angle of Lower Jaw. १० Parotid Gland. ११ अतएव वार्द्धके अधोहनौरयतःप्रसरी वक्रविकृतिविशेषश्च । १२ Hyoid Bone.

मवस्थितम्। तच्च शून्यलम्बितमिव वर्त्तते सुदीर्घस्नायुरज्जुभ्यां शङ्खास्थ्नोर्मूल-शिफाद्वयप्रतिबद्धम्। तस्य च त्रयो भागाः—कण्ठिकपिण्डं, महाशृङ्गद्वयं, लघु-शृङ्गद्वयञ्चेति। तत्र—

## (४४श चित्र—कण्ठिकास्थि)




चित्रव्याख्या—

१ कण्ठिकपिण्डम्। २, २, लघुशृङ्गद्वयम् ३, ३, महाशृङ्गद्वयम्। पेशीनिवेशास्तु—पे १ चिबुककण्ठिका। पे २, उरःकण्ठिका। पे ३, मुखभूमिकण्ठिका। पे ४, अंस-कण्ठिका। पे ५, शिफाकण्ठिका। पे ६, अवटुकण्ठिका। पे ७, चिबुकजिह्वाकण्ठिका। पे ८, जिह्वाकण्ठिका। पे ९, मध्यमा कण्ठसङ्कोचनी।

(१) कण्ठिकपिण्डं[१] नाम मध्यस्थं पिण्डं मध्यरेखाङ्कितम् (चित्रे १)। तत्र पुरस्तले निविशन्ते द्वादश पेश्यः (षट् एकैकतः)। ताः क्रमात् चिबुककण्ठिका[२], उरःकण्ठिका[३], चिबुकजिह्वाकण्ठिका[४], मुखभूमिककण्ठिका[५], शिफाकण्ठिका[६], अंसकण्ठिका[७] चेति नाम। पृष्ठतलन्त्वस्य मसृणं कलासम्बद्धञ्च गोजिह्विकया[८]।

(२) महाशृङ्गद्वयं[९] नाम मध्यपिण्ड-मुभयतः पश्चिमाभिमुखं स्वनामव्याख्या-तम्। तयोरग्रकोट्योः स्फुटे अर्व्वुदके स्नायुरज्जुसंयोगाय। तयोरेकैकस्मिन् निविशन्ते तिस्रः पेश्यः,—क्रमात् मध्यमा कण्ठसंकोचनी[१०], जिह्वाकण्ठिका[११], अवटु-कण्ठिका[१२] चेति।

(३) लघुशृङ्गद्वयं[१३] महाशृङ्गयोः क्रोड़स्थम्। तदग्रकोट्योरपि स्नायुरज्ज्वोः शङ्खास्थिशिफाद्वयसङ्गतयोः संयोगः।

तान्येतानि शिरोग्रीवास्थीनि पृथग् व्याख्याताानि।

---

१ Body or Basihyal. २ Genio-hyoid. ३ Sterno-hyoid. ४ Genio-hyo-glossus. ५ Mylo-hyoid. ६ Stylo-hyoid. ७ Omo hyoid. ८ गोजिह्विका नाम जिह्वामूलस्थं श्वासपथ-च्छादनशीलं तरुणास्थिपत्रकमग्रे व क्ष्यमाणम्। चरकतन्त्रेऽस्य संज्ञा (Epigtottis). ९ Greater Cornua. १० Middle Constrictor of Pharynx. ११ Hyo-glossus. १२ Thyro-hyoid. १३ Lesser Cornua.

## अथ समग्रकरोटिदृश्या विशेषाः ।

करोटि[1]र्नाम सकलशिरोऽस्थ्नां सङ्घातः । शिरोस्थीनि च सर्व्वाणि अधोहनुवर्ज्जं स्थिरसन्धिसंहितानि । विशेषाश्चात्र सङ्घातदृश्या बहवः, तेषु केचित् सूचितपूर्व्वाः । तानेवेदानीमपरांश्च विशेषान् करोटौ यथावस्थितान् प्रतिपादयामः शिष्यबुद्धिवैशद्याय शिरोगतविशेषावबोधार्थं[2] च ।

आदौ तावत् करोटेः पञ्च प्रदेशाः पृथग् बोद्धव्याः । तद्यथा—ऊर्द्ध्वप्रदेशः करोटिपटलं नाम, अधःप्रदेशः करोटिभूमिर्नाम, पार्श्वप्रदेशौ करोटिपक्षौ नाम, पुरःप्रदेशश्च मुखमण्डलं नामेति ।

अपरे च नेत्रनासागुहाद्या विशेषाः शेषतः प्रतिपाद्याः ।

## अथ करोटिपटलम् ।

**करोटिपटलं**[3] नाम ( ४५ चित्रम् ) शिरःसम्पुटस्यच्छदिभूतो भागः । तस्य निर्म्माणमग्रतः पुरःकपालस्य ललाटफलकेन, पार्श्वयोः पार्श्वकपालाभ्यां, पश्चिमतश्च पश्चिमकपालस्य ऊर्द्ध्वाङ्गेन ।

तस्य च द्वे तले—बाह्यमाभ्यन्तरञ्च । तत्र—

**बाह्यतलं** कूर्म्मपृष्ठाकारम् । तत्र लक्षणीयाः पञ्च सीमन्ताः,—पुरःसीमन्तो, मध्यसीमन्तः, पश्चिमसीमन्तः, पार्श्वसीमन्तौ च द्वाविति । तेषु—

**पुरःसीमन्तो**[4] नाम पुरःकपालस्य पार्श्वकपालाभ्यां सन्धानरेखा पुरोदृश्या ।

**मध्यसीमन्तो**[5] नाम पार्श्वकपालयोः परस्परसन्धिरेखा मध्यस्था ।

---

१ Skull. २ सन्ति खल्वं वंविधा बहवो विशेषाः सीमन्तादयो ये समग्रकरोटावेव सम्यग्दृश्याः इति ।
३ Roof of the Skull. ४ Coronal Suture. ५ Sagittal Suture.

## [ ४५श चित्रम्—करोटिपटलम् (स्तनन्धयशिशोः) । ]



**पश्चिमसीमन्तो**[1] नाम पश्चिमकपालस्य पार्श्वकपालाभ्यां सन्धानरेखा पश्चाद्दृश्या।

**पार्श्वसीमन्तौ**[2] नाम करोटिपटलस्य पार्श्वस्थे सन्धानरेखे। तयोरेकैका अस्थिषट्कस्य सन्धानाङ्गभूता। तथाह्यत्र उपरिस्थानि त्रीणि पुर:-पार्श्व-पश्चिमाख्यानि कपालानि अध:स्थैस्त्रिभि: गण्ड-जतूका-शङ्खास्थिभि: संहितानि। ( सन्धिप्रकारस्तु २७श चित्रे द्रष्टव्य: )।

बाल्ये तु **गूढ़सीमन्तिका**[3] नाम पुर:कपालमध्यस्था दृश्यते सूक्ष्मा सीमन्तरेखा। सा क्वचित् प्रौढ़करोटावपि दृश्या।

अथात्र द्वौ सीमन्तसन्धी विशेषतो लक्ष्यौ पुर:पश्चिमस्थौ। तत्र पुरोमध्यसीमन्तयो: सन्धिस्थलं **ब्रह्मरन्ध्रं ब्रह्मतालुकं**[4] वा नाम। पश्चिममध्यसीमन्तयोस्तु सन्धिस्थलं **शिवरन्ध्रं अधिपतिरन्ध्रं**[5] वा नाम, तदाख्यमर्म्माधारणात्। अनयोश्च दृश्यते विशेषत: कोमलता, ब्रह्मरन्ध्रे चतुरस्रप्रायता, शिवरन्ध्रे च त्रिकोणता, स्तनन्धयशिशो: करोटौ स्वभावत:।

पञ्च चात्र उत्सेधा:—

पुर:कुम्भद्वयं[6], पार्श्वकुम्भद्वयं[7], पश्चिमार्व्वुदञ्चेति[8]। ते व्याख्यातपूर्वा:।

**आन्तरतलं** तावत् करोटिपटलस्य खातोदरमुच्चावचञ्च मस्तिष्कच्छादनाय। तत्र सर्व्वतो दृश्या: कलापोषणीनां धमनीनां प्रतानाङ्का:, खातानि[9] च कलाग्रन्थिधारणाय। मध्यरेखायान्तु **दीर्घिकाख्या सिरापरिखा**[10] मध्यसीमन्तानुपूर्व्वग्राऽभ्यन्तरत:।

---

१ Lambdoid Suture. २ Temporal Suture. ३ Metopic Sutre. ४ Anterior Fontanelle. ५ Posterior Fontanelle. तथाहि सुश्रुत :—"मस्तकाभ्यन्तरोपरिष्टात् सिरासन्धिसन्निपातो रोमावर्त्तोऽधिपति स्तत्र सद्योमरणम्" ( सु० शा० ६अ० )। ६ Frontal Eminences. ७ Parietal Eminences. ८ Ext. Occipital Protuberence. ९ Depressions for Pacchionian Bodies. १० Longitudinal Sinus.

# अथ करोटिभूमिः ।

**करोटिभूमि**[1]र्नाम करोटेरधःप्रदेशो नानास्थिसङ्घातमयः सर्व्वत उच्चावचः। तस्या द्वे तले,—ऊर्द्ध्वतलं[2] शिरोगुहान्तर्निगूढ़ं **करोटिपीठं मस्तिष्कपीठं** वा नाम, अधस्तलं मुखकण्ठविवरच्छदिभूतं शिरोगुहाबाह्यञ्च **करोटिभूमितलं करोटितलं** वा नामेति ।

निर्म्माणं पुनः करोटिभूमेर्दशभिरस्थिभिर्द्रष्टव्यम् । तद्‌यथा—पुरोभागे ऊर्द्ध्वहन्वस्थिभ्यां ताल्वस्थिभ्याञ्च। पश्चिमभागे पश्चिमकपालेन। मध्यभागे झर्झरक-जतूका-सीरिकास्थिभिः। पार्श्वयोस्तु शङ्खास्थिभ्यामिति। सन्धानाद्वाचात्र तत्तदस्थ्नामन्तर्बहिस्तलयोः संलक्ष्या विशेषेण। तत्र—

## [ करोटिपीठम् ]

**करोटिपीठं मस्तिष्कपीठं** वा नाम ( ४६श चित्रम् ) करोटिभूमेरूर्द्ध्वतलं मस्तिष्कादिधारणाय खातोदरम् ! तच्च करोटिपटलापसारणेन[3] दृश्यम् । खातानि चात्र त्रीणि महाखातानि[4] नाम । तेषां पुरोगं मस्तिष्कस्य पुरःपिण्डधारणाय। मध्यगं मध्यपिण्डधारणाय। पश्चिमगं पश्चिमपिण्डधारणाय। तत्र—

**पुरोगं महाखातं**[5] पुरःकपालस्य नेत्रच्छदिफलकाभ्यां झर्झरास्थ्नश्चालनीपटलेन च तन्मध्यसंहितेन निर्म्मितं विशेषादुच्चावचम्। तस्य पश्चिमसीम्नि दृश्यते जतूकास्थ्नो लघुपक्षतिद्वयं, तन्मध्यस्थं त्रिकोणकण्टकञ्च ।

तत्रैते विशेषा लक्षणीयाः—

(१) **दौर्विकाख्य-सिरापरिखाया** अग्रभागः समुन्नतरेखारूपः। तत्र दात्रिकाख्य[6]कलाभागसंयोगः।

---

१ Base of Skull. २ Internal surface of the Base of the Skull. ३ भ्रुवोरनुक्रमेण पूर्व्वापरच्छेदात् करोटिच्छदिभागस्य अपसारणम्। ४ Large Fossæ. ५ Anterior Fossa. ६ दात्रिका नाम मस्तिष्कावरण्या महाकलाया दात्राकारो भागो मस्तिष्कस्य वामदक्षिणांशविभाजक—इति मस्तिष्कवर्णनावसरे वक्ष्यते। ( दात्रिका = Falx Cerebri ).

[ ४६श चित्रम्—करोटि-




चित्रद्वयस्य संयोगात् विज्ञेया पूर्णता बुधैः ।




**एकैकार्द्धे यथा यत् स्यादन्यार्द्धेऽपि तथैव तत् ॥**

(२) **शिखरकण्टकं**[१] नाम झर्झरास्थिचूड़ास्थितं प्रवर्द्धनं वर्णितपूर्वम्।

(३) **चालनीपटलं**[२] बहुच्छिद्रमयं गन्धग्राहिण्योः प्रथमाख्यनाड्योर्धारणाय, छिद्राणि च तत्र तत्प्रताननिर्गमाय।

(४) **धमनीप्रतानाङ्काः**[३]—पुरोगाया मस्तिष्ककलापोषण्या धमन्या धारणाय।

**मध्यमं महाखातमुभयतो**[४] गभीरं मध्यतश्च समुन्नतम्। तस्य पुरःसीम्नि जतूकास्थ्नो लघुपक्षतिद्वयं त्रिकोणकण्टकसहितम्। पश्चिमसीम्नि तु तस्यैव सुषुम्नापीठं मध्यतः, उभयतश्च शङ्खास्थ्नोरश्मतटिके। निर्म्मीयते च तत् मध्यभागे जतूकास्थ्नः शरीरेण, पार्श्वयोस्तु तस्यैव बृहत्पक्षतिभ्यां शङ्खास्थिभ्याञ्च। तत्र चैते विशेषाः संलक्ष्याः—

(१) **दृष्टिनाड़ीपरिखा**[५] मध्यतस्तदुभयतश्च दृष्टिनाड़ीरन्ध्रे[६] दृष्टिग्राहिणो द्वितीयाख्यनाड़ीद्वयस्य[७] चाक्षुषधमनीभ्यां[८] सहितस्य धारणनिर्गमार्थम्।

(२) **पक्षान्तरालाख्यं**[९] त्रिकोणविवरद्वयं व्याख्यातपूर्व्वम्। तेन तृतीय-चतुर्थ-षष्ठनाड़ीयुगलानां, पञ्चमनाड़ीयुगलस्य नेत्रगाख्यशाखयोः, सिराधमनीनाञ्च नेत्रगानामक्षिगुहयोः प्रवेशः।

(३) **पोषणिकाखातं**[१०] पोषणिकाख्यग्रन्थिधारणम्।

(४) **वृत्तविवरद्वयं**[११] **जाम्बवविवरद्वयञ्च**[१२] क्रमात् पञ्चमाख्यनाड्या मध्यमशाखाद्वयस्य पश्चिमशाखाद्वयस्य च निर्गमार्थम्।

(५) **मातृकापरिखे**[१३] मातृकाधमन्योर्नेत्रकूटगनाड़ीसहितयोर्धारणाय।

(६) पञ्चमनाड्योर्ग्रन्थिधारणार्थं खातद्वयं **त्रिधारग्रन्थिखातसंज्ञं**[१४] शङ्खास्थ्नोरश्मकूटाग्रयोर्दृश्यम्।

---

१ Crista Galli. २ Cribriform Plate for the First or Olfactory Nerves. ३ Markings of Anterior Meningeal Arteries. ४ Middle Fossa. ५ Sella Turcica. ६ Optic Foramina. ७ द्वितीयाख्यनाड्यौ दृष्टिनाड्यौ = Optic Nerves. ८ Ophthalmic Arteries. ९ Foramen Lacerum Anticus. १० Pituitary Fossa. ११ Foramina Rotunda. १२ Foramina Ovale. १३ Carotid Canals. १४ त्रिधारग्रन्थिर्नाम पञ्चमनाड्या धारात्रयस्य मूलस्थो ग्रन्थिर्यथास्थानं वर्णनीयः (= Gasserian Ganglion), तद्धारणार्थमिदं खातमिति तथा संज्ञा।

(७) **धमनीप्रतानाङ्कास्व** मध्यमायाः[१] कलापोषण्याख्यधमन्या धारणाय ।

**पश्चिममहाखातं**[२] पुनरतिगभीरं बृहत्तमञ्च । तत्राधीयन्ते मस्तिष्कस्य पश्चिमं पिण्डमनुमस्तिष्कं सुषुम्नाशीर्षकञ्च । निर्म्मीयते च तत् स्तोकमात्रेण जतूकाशरीरेणाग्रतः, पश्चिमकपालेन मध्यतः, पार्श्वयोः शङ्खास्थिभ्यां पार्श्व-कपालयोः पश्चिमाधरकोणाभ्याञ्च । विभागश्चास्य मध्यममहाखातादश्म-तटिकाभ्याम्[३] । अश्मतटिकयोस्तु जवनिकाख्यस्य[४] मस्तिष्कविभाजककलाभागस्य संयोगः ।

एते च पश्चिममहाखाते द्रष्टव्या विशेषाः—

(१) **सुषुम्नापीठं**[५] वर्णितपूर्व्वं मध्यतः ।

(२) **कर्णान्तर्द्वारम्**[६] (एकैकतः) श्रुतिवक्त्राख्यनाडीद्वयप्रवेशाय ।

(३) **महाविवरं**[७] मध्यस्थं सशीर्षकसुषुम्नानिर्गमाय ।

(४) **मूलकोटिपुरोगं**[८] विवरम् (एकैकतः) द्वादशनाड्याः प्रवेशाय ।

(५) **मन्याविवरम्**[९] (एकैकतः), तच्च पश्चिमकपालपार्श्वस्थमन्याखात-मेव शङ्खास्थिसन्धानेन विवरभूतम् । तेन मन्याख्यस्थूलसिराया नवम-दशमैका-दशाख्यनाड़ीनाञ्च निर्गमः, प्रवेशश्च धमनीद्वयस्य शिरोऽन्तः ।

(६) **पार्श्विकाख्या सिरापरिखा**,[१०] तत्प्रान्तस्था चापरा तदनु-षङ्गिणी **अर्द्धचन्द्रिकाख्या**[११] मन्याविवरान्ता । तत्र च द्रष्टव्यं **गोस्तन-च्छिद्रम्**[१२] तत्परिखाप्रवेशि-सिराधारणाय ।

(७) **दीर्घिकाख्य-सिरापरिखायाः**[१३] पश्चिमप्रान्तः, **महावर्त्तस्य**[१४] ।

---

१ Grooves for the Branches of Middle Meningeal Arteries. २ Posterior Fossa. ३ Superior Borders of the Petrous portion of the Temporal Bones. ४ Tentorium Cerebelli. जवनिकावत् मस्तिष्कानुमस्तिष्कयोरन्तरालेऽवस्थानादियं संज्ञा । ५ Dorsum Epiphii. ६ Internal Auditory Meatus. ७ Foramun Magnum. ८ Anterior Condyloid Foramen. ९ Jugular Fossa. १० Lateral Sinus. ११ Sigmoid groove. १२ Mastoid Foramen. १३ Longitudinal Sinus. १४ Torcular Herophili.

## [ करोटितलम् ]

**करोटितलं[1] करोटिभूमितलं** वा नाम (४७श चित्रम्) करोटिभूमेरधस्तलमतिमात्रमुच्चावचं मुखगलादिविवरच्छिद्रभूतम्। तस्य त्रयो भागाः—पुरोभागः ऊर्द्ध्वहनुमण्डलप्रधानस्तालुपटलधरः, मध्यभागः तालुमहाविवरयोरन्तरालस्थः कण्ठबिलच्छिद्रभूतः, पश्चिमभागः महाविवराद्युत्तरतोरणिकान्तः। तत्र—

(क) पुरोभागे लक्षणीये द्वे—दन्तोदूखलमण्डलं, तालुपटलञ्चेति। तयोः—

**दन्तोदूखलमण्डलं[2]** दन्तोदूखलानां षोड़शानां धारणम्। दन्ता ह्यत्र एकैकार्द्धे अष्टौ, तद् यथा—कर्त्तनकाख्यौ[3] द्वौ मध्यरेखापार्श्वतः, तदन्वेको रदनकाख्यः[4], तदनु द्वौ अग्रचर्व्वणकाख्यौ[5], चरमतश्च त्रयः पश्चिमचर्व्वणकाख्याः[6]। अष्टमस्य च चर्व्वणकस्य प्रसिद्धा **ज्ञानदशनसंज्ञा**[7], तस्य यौवनान्ते प्रौढ़ौ वा समुद्गमः।

"राजदन्तौ"[8] इति तु—ऊर्द्ध्वहनुमण्डले मध्यरेखामुभयतः स्थितयोः कर्त्तनकदन्तयोः संज्ञा प्राचीना।

तदेतत् प्रौढ़स्योर्द्ध्वहनुमण्डलस्थं दन्तमण्डलं व्याख्यातम्। अधोहनुमण्डलेऽप्येवम्। एवञ्च साकल्येनोभयोर्हनुमण्डलयोः प्रौढ़स्य दन्ताः द्वात्रिंशत्।

बाल्ये तु एकैकस्मिन् हनुमण्डले दशैव दन्ताः—एकैकार्द्धे पञ्च पञ्चेति[9], पश्चिमचर्व्वणकानामभावात्। एवञ्च साकल्येन बाल्यैविनश्वरा दशना विंशतिरेव।

---

१ Base of the Skull. २ दन्तोदूखलानां धारणादूर्द्ध्वहन्वोर्मिलितयोर्दन्तोदूखलसमष्टेरियं संज्ञा ( Alveolar Arch ). ३ Incisors एकमूलौ चैतौ। ४ Canine. संयुक्तद्विमूलश्चायम्। ५ Bicuspids. द्विमूलौ चामू। ६ Molars. त्रिमूलाश्चैते। ७ Wisdom Tooth. लोकेऽपि "अक्कल दांत"—इत्येवमादिसंज्ञा। ८ "राजदन्तौ तु मध्यस्थावुपरिश्रेणिकौ क्वचित्"—इति हेमचन्द्रः। ९ द्वौ कर्त्तनकौ, एको रदनकः, द्वावेव च चर्व्वणकौ—इति पञ्चेति भावः।

**तालुपटलं**[1] नाम मुखविवरच्छदिभाग ऊर्द्ध्वहन्वस्थ्नोस्तालुफलकाभ्यां ताल्वस्थ्नोश्च ह्रस्वपत्रकाभ्यां निर्म्मितः। तस्य च मध्यभागे परस्परसन्धानरेखा अनुलम्बा इतरया हनुतालुसन्धानाङ्करेखया अनुप्रस्थया लक्षिता। अनयोश्च मिलितयोः **स्वस्तिकसीमन्तिके**[2]ति संज्ञा। तत्र मध्यरेखायामग्रतः खातं चतुश्छिद्रम् **अग्रतालुखातं**[3] नाम। तस्य पूर्व्वापर[4]च्छिद्राभ्यां नासातालुकाख्यनाड्योः, पार्श्व[5]च्छिद्राभ्याञ्च धमन्योः क्रमान्नासाभूमौ तालुपटले च प्रवेशः। अनुप्रस्थरेखायास्तु प्रान्तयोरेकैकतश्छिद्रे **पश्चिमतालुविवरे**[6] नाम, ताभ्यां तालुनाड्योस्तालुपटलप्रवेशः।

पश्चिमप्रान्ते च मध्यरेखायां कण्टकं—**तालुपृष्ठकण्टकं**[7] काकलकण्टकं वा नाम, तत्र काकलक[8]स्य संयोगः।

(ख) मध्यभागे पुनः करोटितलस्य लक्षणीयानि—

**कण्ठपटलं**[9] **गलविलपटलं** वा नाम कण्ठविलच्छदिभूतो भागः जतूकाशरीरस्य पश्चात्कपालमूलपिण्डेन सन्धानान्निष्पन्नः। तत्सन्धानरेखा चात्र स्फुटा **मूलजातुका**[10] नाम, तस्याः पुरोभागे पश्चिमं नासागुहाद्वारं सौरिकाख्या द्विधा विभक्तम्, तस्य चैकैकतः जतूकाचरणद्वयं तत्पार्श्वसीमभूतम्।

**मन्याविवरञ्च** मन्याख्यसिराधारणम्। **मातृकासुरङ्गाद्वारञ्च** तद्बहिःस्थं मातृकाधमनीप्रवेशार्थम्।

(ग) पश्चिमभागे पुनः करोटिपटलस्य मध्यतः प्रधानतो लक्षणीयान्येतानि—

**महाविवरं** सुषुम्नाधारणं, **मूलकोटि**द्वयञ्च तदुभयतः चूड़ावलयाख्यकशेरुकया सन्धेयम्। प्रतिमूलकोटि च द्वे द्वे **विवरे पुरःपश्चिमस्थे** नाड़ीनिर्गमाय। **पश्चिमालिका, पश्चिमार्व्वुदञ्च** ग्रीवाधराख्यस्नायुरज्जुसंयोगाय। तदुभयतश्च द्वे द्वे रेखे **उत्तरतोरणिके** नाम वर्णितपूर्व्वे।

---

१ Vault of the Palate. २ स्वस्तिकाकारेण रेखयोः परस्परसंयोगादियं संज्ञा, Crucial Suture. ३ Anteior Palatine Fossa. ४ Foramina of Scarpa. ५ Foramina of Stenson. ६ Posterior Palatine Foramina. ७ Spine of the Palate. ८ Uvula. ९ Roof the Throat. १० Basilar Suture.

( वामार्द्धम् ) [ ४७श चित्रम्—




चित्रद्वयस्य संयोगात् विज्ञेया पूर्णता बुधैः ।

करोटितलम् ।] (दक्षिणार्द्धम्)




एकैकार्द्धे यथा यत् स्यात् अन्यार्द्धेऽपि तथैव तत् ॥

एकैकस्मिंश्च पार्श्वे करोटितलस्य लक्षणीयान्येतानि—

गण्डोत्तरकूटं, गण्डास्थि, गण्डप्रवर्द्धनकञ्चेति त्रयं **गण्डचक्रं**[1] नाम गण्डोत्तरखातस्य बहिःपरिधिभूतम्।

हनुसन्धिस्थालकं हनुमुण्डधारणार्थम्।

कर्णकुहरं कर्णबहिर्द्वारभूतम्।

गोस्तनप्रवर्द्धनकं शिफाप्रवर्द्धनकञ्च।

**सन्धानाङ्कास्तत्र** ऊर्द्ध्वहन्वस्थ्नो गण्डास्थ्ना जतूकाग्रहत्पक्षत्या च, गण्डास्थ्न ऊर्द्ध्वहनुशङ्खजतूकाभिः, शङ्खास्थ्नश्च जतूकागण्डपश्चिमकपालैर्विशेषात् संलक्ष्याः।

**छिद्राः** पुनरिह करोटितलस्य एकैकार्द्धे संयुज्यन्ते बहवः। तासां नामसंख्यादीनि ४७श चित्रे द्रष्टव्यानि स्मर्त्तव्यानि च पूर्व्ववर्णनतः।

सैषा करोटिभूमिरुभयोस्तलयोर्व्याख्याता।

## अथ करोटिपक्षौ।

**करोटिपक्षौ**[2] नाम करोटिपार्श्वप्रदेशौ त्रिकोणप्रायौ आकृष्टधनुराकारौ वा (४८श चित्रम्)। तयोरेकैकस्योर्द्ध्वसीमा शङ्खतोरणिकानुगाधनुर्वक्रा रेखा अपाङ्गतः पश्चिमसीमन्तावधि प्रसृता। अधःसीमा त्वधोहनोः कोण एव। ऊर्द्ध्वसीमगायाश्च रेखायाः प्रान्तद्वयं चेत् संयोज्यते हनुकोणेन, तदा करोटिपक्षस्य पूर्व्वापरसीम्नोर्निर्द्देशः।

एकैकस्य च करोटिपक्षस्य द्वौ भागौ,—पुरोभागः हनुसन्धिस्थालकस्य पुरःस्थः, पश्चिमभागस्तत्पश्चिमस्थश्चेति। तत्र—

पुरोभागे दृश्यानि त्रीणि खातानि—शङ्खखातं, गण्डोत्तरखातं, हनुजातूकखातञ्चेति। तेषु—

१ तदेतत्त्रयं चक्रार्द्धाकारं गण्डबहिःस्थम्। (Zygomatic Arch). २ Side of the Skull (Norma Lateralis).

[ ४७श (क) चित्रम्—करोटिपच्चः (वामः)। ]




( क ) शङ्खखातं[1] नामार्द्धचन्द्राकारं खातं गण्डचक्रादूर्द्धतनम्। तस्य च निर्म्माणमस्थिपञ्चकांशैर्द्रष्टव्यम्। तद्‌यथा—

गण्डं पुरःकपालञ्च जतूकापचतिस्तथा।
शङ्खं पार्श्वकपालञ्च पञ्चकं शङ्खखातकृत्॥

पूर्य्यते च तत् शङ्खच्छदाख्यपेश्या च्छाद्यते च शङ्खावरण्या कलया।

( ख ) गण्डोत्तरखातं[2] नाम गण्डचक्रादधस्तनं खातं हनुकुन्तधारणम्। तच्चापूर्य्यते शङ्खच्छदाख्यपेश्या अधोभागेन, पेशीभ्याञ्च हनुकूटकर्षणीभ्यां। धार्य्यन्ते च तत्र आन्तरहानव्यः[3] सिराधमन्यः, पञ्चमनाड्याश्च हानव्याः शाखाः।

अनयोश्च खातयोरेकत्वेऽपि ऊर्द्ध्वाधरांशभेदात् संज्ञाद्वयम्।

१ Temporal Fossa. २ Zygomatic Fossa. ३ Internal Maxillary Vessels.

(ग) हनुजातूकखातं[1] नाम ऊर्द्ध्वहनुजतूकयोः सन्धाने स्थितं त्रिकोणप्रायं लघुतरं खातं नेत्रगुहायाः पश्चिमस्थम्। अस्य पूर्व्वसीम्नि ऊर्द्ध्वहनोः पश्चिमार्ब्बुदं, पश्चिमसीम्नि तु जतूकास्थ्युरणफलकद्वयम्। केन्द्रञ्चेदं तिसृणां परिखाणां क्रमात् हनुजातूका-हनुचरणिका-पक्षान्तरालाख्यानाम्[2]। सम्बन्धश्चास्य नेत्र-नासा-मुख-मस्तिष्क-गुहाभिर्गण्डोत्तरखातेन च। धार्य्यन्ते चात्र ऊर्द्ध्वहानव्या नाड़ी सग्रन्थिका[3], धमनी चान्तरहानव्या नाम।

## अथ करोटिपुरोभागः—मुखमण्डलम्।

करोटीपुरोभाग[4]स्तावत् मुखमण्डलनिर्म्मापको वृत्तप्रायः। (४८श चित्रम्)। तस्य चोर्द्ध्वसीम्नि भ्रूमध्यं भ्रूतोरणिके च, अधःसीम्नि अधोहनुमण्डलम्, पार्श्वसीम्नि चैकैकतो गण्डास्थि, अधोहनुकूटञ्चेति—चतुःसीमनिर्द्देशः।

अत्र चैतानि मध्यरेखायां लक्षणीयानि अधोऽधः—

(१) कूर्च्चकं[5] भ्रूमध्यं वा नाम स्थपन्याख्यमर्म्मस्थानं वर्णितपूर्व्वम्। तदुभयतश्च भ्रूतोरणिके[6]।

(२) नासास्थिनी परस्परसन्धानरेखासहिते। अनयोश्च पुरःकपालसन्धान-स्थानं नासामूलं[7] नाम। नासास्थ्नोश्च संहितयोर्नासासेतु[8]रिति संज्ञा।

(३) नासापुरोद्वारं[9] त्रिकोणप्रायम्। तस्य च परिधिः पार्श्वयो र्नासापार्श्विकाभ्यां[10], मध्ये च नासाग्रप्राचीराख्येन तरुणास्थ्ना सन्धायी। अधःसीम्नि चास्य मध्यतो नासाग्रकण्टकम्[11]। दन्तमूलविलञ्च तदधस्तादेकैकतः।

(४) कर्त्तनकदन्ता[12] अष्टौ,—चत्वारः ऊर्द्ध्वहनुमण्डले, चत्वारश्चाधोहनाविति।

(५) चिबुकसन्धानिका रेखा, चिबुकपिण्डश्च।

अथापराणि चैतानि एकैकस्मिन् पार्श्वे लक्षणीयानि—

---

१ Spheno-maxillary Fossa. २ Spheno-maxillary, Pterygo-maxillary and Spenoidal Fissures. ३ Superior Maxillary Nerve with Meckel's ganglion. ४ Anterior Region of the Skull (Norma Facialis). ५ Glabella. ६ Superciliary Ridges. ७ Nasion. ८ Bridge of the Nose. ९ Anterior Nares. १० तरुणास्थिभ्यामिति योज्यम् ११ Subnasal Point. १२ Incisor Teeth.

## [ ४८श चित्रम्—मुखमण्डलस्य दक्षिणार्द्धम् (अधोहनुवर्ज्जम्) ]




**नेत्रगुहाङ्गानां व्याख्या**—१, अश्रुपीठम्। २, झर्झरकांश। :३, ४, जतुकास्थि, मध्ये चानयोर्द्दृष्टिनाड़ीरन्ध्रं पचान्तरालञ्च। ५, पुरःकपालांशः। ६, गण्डास्थ्यंशः। ७, ऊर्द्ध्वहन्वंशः। ८, तालव्यंशः।

(१) नेत्रगुहा[1] अक्षिगोलकधरा। छिद्रञ्च तदूर्द्ध्वम् अधिभ्रुवाख्यम्[2]। तदधश्च नेत्राधरीयं[3] नाम वर्णितपूर्व्वम्।

(२) पार्श्वतश्च गण्डास्थ्नि छिद्रं छिद्रद्वयं वा गण्डच्छिद्रं[4] नाम वर्णितपूर्व्वम्, गण्डकूटं[5] हनुगण्डसन्धानरेखा च।

(३) दन्ताश्च द्वादश, षट् ऊर्द्ध्वं षट् चाधः—एको रदनकः[6], पञ्च चर्वणकाः[7]-श्चेति।

(४) अनुचिबुकविवरं[8], बाह्यतिरश्चीना रेखा, वक्त्राधमनीपरिखा[9] च ( ४३श चित्रम् )।

पेश्यः पुनरत्र संयुज्यन्ते मुखमण्डलस्य एकैकार्द्धे षोड़श। तदयथा—भ्रूमध्यपार्श्वतो भ्रूसङ्कोचनी[10] नेत्रनिमीलनी[11] च ; नेत्रान्तःकोणे नेत्रकण्डरिका[12], तदधश्च नासौष्ठकर्षणी[13]; नेत्राधरीयविवरोपरिष्टात् ओष्ठसमुत्कर्षणी[14], तदधश्च सृक्कणीसमुन्नमनी[15] ; गण्डकूटे सृक्कणीकर्षण्यौ[16] लघ्वी गुर्व्वी च ; गण्ड-कूटाधोधारायां हनुकूटे च हनुकूटकर्षणी[17] ; दन्तोदूखलमण्डलस्य पूर्व्वार्द्ध-मुखमुद्रणी, पश्चार्द्धे च कपोलिका[18] ; दन्तमूलविले नासासङ्कोचनी[19] नासानमनी[20] च ; चिबुकपिण्डपार्श्वतः चिबुकोत्क्षेपणी[21]; बाह्यतिरश्चीनरेखामभितश्च तिस्रः—अधरावनमनी[22], सृक्कणीनमनी[23], गलपार्श्वच्छदा[24] चेति।

---

१ Orbit. नेत्रगुहाविशेषास्तु अनुपदं पृथग् वर्णनीयाः। २ Supra-orbital Foramen. ३ Infra-orbital Foramen. ४ Malar Foramen. ५ Malar Prominence. ६ Canine tooth. ७ Bicuspid & Molar teeth. ८ Mental Foramen. ९ Groove for Facial Artery. १० Corrugator Superciilii. ११ Orbucularis Palpabrerum. १२ Tendo Oculi. १३ Levator Labii Superioris et. alequæ nasi. १४ Levator Labii Superioris. १५ Levator Anguli Oris. १६ Zygomaticus major & minor. १७ Masseter. १८ Orbiculors Oris & Buccinator. १९ Compressor Nares २० Depressor alæ nasi. २१ Lavator menti. २२ Depressor Labii Inferioris. २३ Depressor Anguli Oris. २४ Platysma myoides.

# अथ नेत्रगुहे।

नेत्रगुहे नेत्रकोटरे[१] वा नाम (४८श चित्रम्) धुस्तूरपुष्पसदृशायतने[२] कोटरे नासामुभयतः स्थिते नेत्रगोलकधरे। तयो रेकैका सप्तास्थिनिर्म्मितप्राचीरा। अस्थीनि चात्र चत्वारि गुहाद्वारपरिधिनिष्पादकानि, त्रीणि च गुहामूलमभितः स्थितानि तद्यथा--

(१) अश्रुपीठम् अश्रुवाहिकाधारणम् अन्तःपरिधिस्थम्।

(२) अग्रकपालस्य नेत्रच्छदिफलकमूर्द्ध्वपरिधिस्थम्।

(३) ऊर्द्ध्वहन्वस्थ्नो नेत्रपीठफलकं नेत्रभूमिनिष्पादकमधःपरिधिस्थम्।

(४) गण्डास्थ्नः अक्षिफलकं वहिःपरिधिस्थम्।

(५) जतूकास्थ्नः पक्षतिद्वयम्,
(६) ताल्वस्थ्नश्चूड़ास्थं प्रवर्द्धनम्,
(७) झर्झरकस्य नेत्रान्तःपीठञ्चेति
} त्रयं नेत्रगुहामूलमभितः प्रततम्।

एष चैषां संग्रहश्लोकः—

अश्रूर्द्ध्वहनुगण्डाग्रकपालैर्द्वारि वेष्टिता।
मूले नेत्रगुहा नद्धा जतूका-तालु-झर्झरैः॥

तथापि जतूका-झर्झराग्रकपालानामुभयो र्नेत्रगुहयोः प्रवेशात् नेत्रगुहाद्वये एकादशैवास्थीनीति विशेषः।

एकैकस्याश्च नेत्रगुहायाः षड् भागाः। तद्यथा—

(क) नेत्रगुहाद्वारं[५] वृत्तप्रायं यथोक्तपरिधिकम्।

(ख) नेत्रगुहामूलं[६] धुस्तूरपुष्पवृन्तवत् सङ्कुचितप्रायं यथोक्तैनास्थित्रयेण संवेष्टितम्। अत्र च दृश्यं दृष्टिनाड़ीरन्ध्रं पक्षान्तरालञ्च वर्णितपूर्व्वं नेत्रगुहान्तःप्रवेशिनीनां दृष्टिनाड़ी-सिरा-धमनीनां प्रवेशाय।

---

१ Orbits. २ साङ्ग्रयञ्च पुरःप्रान्ते सुविस्तृततया पश्चिमप्रान्ते चातिसङ्कुचिततया। ३ सम्बद्धा वेष्टितेति यावत्। ४ तेषां मध्यस्थत्वादिति भावः। ५ Anterior Opening of the Orbit. ६ Posterior Opening of the Orbit.

(ग) **नेत्रगुहाच्छदिः**[१] गुहापटलभूतः शङ्खकपालस्य नेत्रच्छदिफलकेन जतूकास्थ्नो लघुपक्षत्या च निर्म्मितः। दृश्यते चात्र बहिःकोणे अश्रुग्रन्थिखातम्, अन्तःकोणे च वक्रोर्द्ध्वदर्शिन्याख्यनेत्रपेश्याः आकर्षभूमिः[२]।

(घ) **नेत्रगुहाभूमिः**[३] प्रधानतः ऊर्द्ध्वहनो र्नेत्रपीठफलकेन, स्तोकमात्राभ्याञ्च गण्डतालव्यशाभ्यां निर्म्मिता समतलप्राया।

(ङ) **अन्तःप्राचीरं**[४] स्वनामव्याख्यातम् ऊर्द्ध्वहनोर्नासाकूटपार्श्वेनाश्रुपीठेन, झर्झरास्थ्नो नेत्रान्तःफलकेन, स्तोकमात्रेण जतूकाशरीरपार्श्वेन च निर्म्मितम्। अत्र च विशेषतो दृश्या अश्रुवाहिका नासाभिमुखी[५]।

(च) **बहिःप्राचीरं**[६] पूर्व्वार्द्धे गण्डास्थ्नोऽक्षिफलकेन, पश्चार्द्धे जतूकास्थ्नो बृहत्पक्षत्या च निर्म्मितम्। दृश्यञ्चात्र शङ्खगण्डकरन्ध्रमार्गस्य[७] विवरं विवरद्वयं वा।

**सन्धानाङ्काश्चात्र तत्तदस्थ्नामालक्ष्या विशेषेण।**

**विवराणि** चात्र नव दृश्यानि। तद्यथा—मूले दृष्टिनाडीरन्ध्रम्[८], तद्बहिः पश्चात्सरालं[९] (तेन तृतीय-चतुर्थ-षष्ठनाडीनां पञ्चमनाड्याः नेत्रगशाखायाः नेत्रगानाञ्च सिरा-धमनीनां नेत्रगुहाप्रवेशः), हनुजातूकखातञ्च[१०]। तदन्तः झर्झरकविवरद्वयं[११] सूक्ष्मम्। अन्तःकोणे अश्रुवाहिका[१२]। ऊर्द्ध्वपरिधौ अधिभ्रुवं[१३]म्, अधःपरिधौ च नेत्राधरीयं[१४] विवरम्। बहिःकोणे शङ्खगण्डकाख्यो[१५] रन्ध्रमार्गश्चेति।

**पेश्यस्तु** नेत्रगुहाप्राचीरेषु संयुज्यन्ते सप्त,—क्रमात् ऊर्द्ध्वदर्शिनी[१६], अधोदर्शिनी[१७], अन्तर्द्दर्शिनी[१८], बहिर्द्दर्शिनी[१९], वक्रोर्द्ध्वदर्शिनी[२०], वक्राधोदर्शिनी[२१]

---

१ Roof of the Orbit. २ सेयं नेत्रपेशी अङ्कुशाकारेण तरुणास्थिमयेनाकर्षेण धृता तदाश्रित्य विवर्त्तते। स चाकर्ष इह संलग्न इति। तदेतत् पेश्यध्याये वर्णयिष्यते। ३ Floor of the Orbit. ४ Inner wall. ५ अतिस्रुतमश्रुजलमश्रुवाहिकापथेन नासाभ्यन्तरे प्रविशति। ६ Outer wall. ७ Malar Canal. ८ Optic Foramen. ९ Foramen Lacerum Anticus. १० Spheno-maxillary Fissure. ११ Ethmoidal canals. १२ Lachrymal canal. १३ Supra-orbital Foramen. १४ Infra-orbital Foramen. १५ Tempero-malar Canal. १६ Superior Rectus. १७ Inferior Rectus. १८ Internal Rectus. १९ External Rectus. २० Superior Oblique. २१ Inferior Oblique.

चेति—षट् नेत्रगोलके सम्बद्धाः, सप्तमो च अश्रु विसर्ज्जनो[1] नाम अश्रुवाहिका-पश्चिमत इति।

सेयं नेत्रगुहा नातिविस्तरं व्याख्याता।

## अथ नासागुहे।

**नासागुहे[2]** द्वे घ्राणेन्द्रियाधिष्ठाने श्वासवायुग्रहणद्वारभूते च। तयोर्मध्यतः प्राचीरकं प्रतन्वस्थिमयम्। तयोः प्रधानतो गलविलेन[3] सम्बन्धः। निर्म्माणञ्च तयोश्चतुर्द्दशभिरस्थिभिः[4],—झर्झरक-जतूकाग्रकपालाख्यैस्त्रिभिः शिरोऽस्थिभिः, अधोहनु-गण्डास्थिद्वय-वर्ज्जं सर्व्वैश्च मुखमण्डलास्थिभिरिति।

एकैकस्याश्च नासागुहायाः षड्भागाः—

**गुहाच्छदिः, गुहाभूमिः, अन्तःप्राचीरम्, बहिःप्राचीरम्, नासापुरोद्वारम्, नासापश्चिमद्वारञ्चेति।**

तिस्रश्च एकैकस्यां नासागुहायां सुरङ्गाः—**ऊर्द्ध्वसुरङ्गा, मध्यसुरङ्गा, अधःसुरङ्गा चेति।** ताः बहिःप्राचीरवर्णनायामन्तर्भूताः। तत्र—

**नासागुहाच्छदि[5]**र्नाम नासागुहापटलम्। तस्य निर्म्माणमग्रतो नासास्थिभ्यां, समूलेन च पुरःकपालस्याग्रकण्टकेन; मध्ये झर्झरास्थ्नश्चालनीपटलेन, पश्चिमतो जतूकास्थ्नः कायपिण्डेन च। तत्र नासास्थितले नासानाड्योः, चालनीपटलस्थैश्छिद्रैश्च घ्राणनाडीप्रतानानां प्रवेशः।

**नासागुहाभूमिः[6] नासाभूमि**र्वा नाम स्वनामव्याख्याता ईषत्कोरोदरा। तस्या निर्म्माणं पूर्व्वार्द्धे ऊर्द्ध्वहन्वोस्तालुफलकाभ्यां, पश्चार्द्धे च तात्वस्थ्नोः ह्रस्वपत्रकाभ्याम्। दृश्यानि चात्र—नासाग्रकण्टकम्, अग्रतालुकखातविवराणि, [7]स्वस्तिकसन्धानिका चेति सर्व्वाणि वर्णितपूर्व्वाणि। मध्ये च नासागुहायाः सन्धीयते सीरिकास्थि मध्यप्राचीरभूतम्।

---

१ Tensor Tarsi. २ Nasal fossae. ३ गलविलं नाम गलविवरं नासास्यकुहरपश्चिमम्। ४ एकादशभिरिति फलितार्थः। ५ Roof. ६ Floor. ७ सेयम् ऊर्द्ध्वहनुतालुफलकयोः तात्वस्थि-ह्रस्वफलकयोश्च परस्परसन्धानरेखा वर्णितपूर्व्वा।

## [ ४८श चित्रम्—नासागुहा (वामा) ]

( बहि:प्राचीरदृश्या विशेषा: )



**अन्तःप्राचीरं**[1] तावदुभयोर्नासाभूम्योरेकमेव मध्यप्राचीरापरपर्य्यायम्। तस्य निर्म्माणं तिर्य्यक्संहिताभ्यां झर्झरमध्यफलक-सीरिकास्थिभ्याम्। अस्थ्नोश्च तयोः सन्धानमग्रतस्त्रिकोणतरुणास्थ्ना, पश्चिमतश्च जतूकास्थ्नो रसनिकया[2]। दृश्यश्चास्य नासामध्यप्राचीरस्य तलद्वयं वामदक्षिणभेदात्। तलद्वये च सीरिकानुपूर्व्वगा नासातालुकाख्यनाड़ीद्वयधारिण्यौ परिखे, अनल्पानि च सूक्ष्मच्छिद्राणि नाड़ीधमनीप्रतानधारणाय। इदञ्च मध्यप्राचीरं प्रायेण दक्षिणतो वामतो वाऽनतं[3] दृश्यते करोटौ स्वभावात्।

**बहिःप्राचीरं**[4] पुनर्नासागुहाया एकैकस्याः पृथगेव। तस्य निर्म्माणमग्रत ऊर्द्ध्वहनो र्नासाकूटेनाश्रुपीठेन च, मध्ये झर्झरकपार्श्वपिण्डेनोर्द्ध्वहनुपिण्डेन शुक्तिकास्थ्ना च, पश्चिमतस्तात्वस्थ्नो दीर्घपत्रकेण जतूकास्थ्नश्चरणफलकेन चान्तरेण। अत्र तिस्रः सुरङ्गाः—ऊर्द्ध्वमध्याधःसंज्ञैः शुक्तिकापत्रकैर्विभक्ताः, क्रमात्—ऊर्द्ध्वसुरङ्गा, मध्यसुरङ्गा, अधःसुरङ्गा चेति। तत्र—

(१) **ऊर्द्ध्वसुरङ्गा**[5] नाम ऊर्द्ध्वतनो नासागुहामार्गो ह्रस्वतमः[6], नासागुहायाः पश्चार्द्धमात्रे[7] वर्त्तमानो झर्झरास्थ्नः ऊर्द्ध्व-मध्यशुक्तिकाभागयोरन्तरालस्थः। त्रीणि चात्र प्रकाशन्ते विवराणि, तद्यथा—पश्चात् तालुजातूकं नाम तदाख्यनाड़ी-धमनीनां प्रवेशाय, अग्रतो झर्झरकोटरद्वारं नाम झर्झरास्थिपश्चिमकोटरानुबन्धि, चूड़ायाञ्च जतूकाद्वारं जतूकाकारपिण्डान्तरीयेण कोटरेण सानुबन्धमिति।

(२) **मध्यसुरङ्गा**[8] नाम मध्याधःशुक्तिकयोरन्तरालस्थो मार्गो मध्यमाकारः। तत्रैकं विवरं झर्झरकोटरमार्गेण ललाटकोटरानुबन्धि। अपरमूर्द्ध्वहनुपिण्डमध्यस्थस्य हनुगर्भकोटरस्य द्वारभूतम् (दृश्यतां ७८ पृष्ठे हनुगर्भकोटरवर्णनम्)।

(३) **अधःसुरङ्गा**[9] तावत् अधःशुक्तिकास्थ्नोऽधस्तात् वर्त्तमानो दीर्घतमो मार्गः समग्रस्य नासाबहिःप्राचीरस्यानुवृत्त्या वर्त्तमानः। अस्य पूर्व्वार्द्धे अश्रुवाहिकाया द्वारमतिप्रवृत्तस्याश्रुजलस्य नासागुहाप्रवेशाय।

**नासापुरोद्वारं**[10] नाम नासागुहायाः पुरोभागस्थं द्वारं बाह्याभिमुखं ताम्बूलपत्राकारम्। तच्च समांसशरीरे तरुणास्थिसंयोगात् सङ्कुचिततरं

---

१ Inner wall. २ सेयम् जतूकास्थ्नः पुरस्तलस्था समुन्नता रेखा वर्णितपूर्व्वा। ३ वक्रालम्बितमिव। ४ Outer wall. ५ Superior Meatus. ६ ऊर्द्ध्वभागे नासागुहायाः सङ्कुचितप्रायत्वात्। ७ नासागुहायाः शिखरोपान्ते। ८ Middle Meatus. ९ Inferior Meatus. १० Anterior Nares.

द्विभागविभक्तञ्च दृश्यते नासाग्रत्रिकोणतरुणास्थिसहितेन नासामध्यप्राचीरेण वर्णितपूर्व्वेण। अस्योर्द्ध्वसीम्नि नासास्थिनो, पार्श्वयोरधःसीम्नि चोर्द्ध्वहन्वस्थिनो परस्परसंहिति।

**नासापश्चिमद्वारं**[1] तावत् वृत्तप्रायं नासागुहायाः पश्चिमं द्वारं गलबिलाभिमुखम्। तस्य पश्चिमतो गलबिलच्छदिभूतं पश्चिमकपालस्य मूलपिण्डम्। ऊर्द्ध्वसीम्नि जतूकाशरीरम्। अधःसीम्नि ताल्वस्थ्नो ह्रस्वपत्रकद्वयम्। पार्श्वयोस्तु जतूकाचरणद्वयमान्तराख्यम्। द्विभागविभक्तञ्च तत् मौरिकाख्या यथोक्तसन्धानेन।

सेयं नासागुहा नातिविस्तरं व्याख्याता। तद्विस्तरस्तु घ्राणेन्द्रियवर्णनावसरे वक्तव्यः।

## अथ समग्रकरोटिदृश्याः त्वाचभागाः।

**त्वाचभागा**[2]स्तावत् त्वङ्मात्रावरणा अस्थिभागाः करोटिस्था विशेषतो लक्षणीयाः। तैर्हि परिज्ञातैः साधु समुन्नीयन्ते[3] शिरोगुहान्तरीया मस्तिष्कादिविशेषा यथास्थानं वक्ष्यमाणा इति।

ते च सप्तविंशतिसंख्या वर्णितपूर्व्वाः। तद्यथा—द्वे भ्रूतोरणिके, द्वे गण्डचक्रे, द्वे गण्डकूटे, द्वे गोस्तनप्रवर्द्धने, एकं पश्चिमार्व्बुदम्, द्वे उत्तरतोरणिके (तदुभयतः पश्चिमकपालस्थे), द्वौ पार्श्वकुम्भौ, द्वे शङ्खतोरणिके, द्वौ पुरःकुम्भौ, द्वे नासास्थिनो, द्वौ नेत्रगुहापरिधी, द्वौ हनुकोणौ, एका हन्वधस्तनो धारा, एकं चिबुकपिण्डञ्चेति।

तदेतदस्थिखण्डं समाप्तम्। शिक्षणीयञ्चेदमतियत्नादीक्षणोन्मेषाय।

कीकसे[4] यदि कार्कश्यं तथाप्यादीयतामिदम्।
ज्ञानगङ्गाम्बुसङ्गत्या दिव्या तनुरतो यतः[5]॥

## इति चतुर्थोऽध्यायः।

## इत्यस्थिखण्डम्।

---

१ Posterior Nares. २ एतदर्थे त्वक्शब्दात् शैषिकोऽण् प्रत्ययः। (Sub cutaneus parts.) ३ रेखापातादिभिः सम्यग् ज्ञायन्ते च प्रमाणादिना। ४ अस्मिन् अस्थिखण्डे। ५ यतो हेतोः अस्मिन् ज्ञानरूपगङ्गाजलसम्पर्कात् दिव्यतनुलाभो (तनुविषयकपूर्णज्ञानलाभ इति यावत्) भविता। अत्र श्लिष्टोऽर्थोऽप्यनुसन्धेयः।

# अथ सन्धिस्नायुखण्डम् ।

## प्रथमोऽध्यायः ।

अथातः सन्धिस्नायुसामान्य[1]विज्ञानीयमध्यायं व्याख्यास्यामः ।

इह खलु सन्धय इत्यस्थ्नामेव[2] सन्धयो वर्णनीयाः, इतरसन्धीनामसङ्ख्येयत्वाद-प्रयोजनत्वाच्च । आहुश्च—

"अस्थ्नान्तु सन्धयो ह्येते केवलाः परिकीर्त्तिताः ।
पेशी-स्नायु-सिराणान्तु सन्धिसङ्ख्या न विद्यते ॥" इति—
(सु० शा० ५ अ०) ।

ते च सन्धयो द्विविधाः—"चेष्टावन्तः स्थिराश्च ।

"शाखासु हन्वोः कट्यां च चेष्टावन्तस्तु सन्धयः ।
शेषास्तु सन्धयः सर्व्वे विज्ञेया हि स्थिरा बुधैः ॥" इति—

अन्ये तु मन्यन्ते—चेष्टावन्तः सन्धयो द्विविधाः, बहुचेष्टाः अल्पचेष्टाश्चेति कृत्वा, त्रिविधाः सन्धयः—बहुचेष्टाः[3], अल्पचेष्टाः[4], अचेष्टाश्चेति[5] । तत्र शाखासु अधोहनुकट्योश्च बहुचेष्टाः, पृष्ठवंशादिष्वल्पचेष्टाः, अन्यत्र पुनरचेष्टाः ।

अथात्र चेष्टावत्सु सन्धिषु अस्थिद्वयम् अस्थित्रयं वा सम्बध्यते सान्द्रमसृण-शणगुच्छसमाकाराभिः प्रतानवतीभिः स्नायुरज्जुभिः स्नायुकोषैश्च[6] । सन्धेयभागाश्च तत्रास्थ्नां तरुणास्थिसमावृताः सुसंश्लिष्टाश्च श्लेषधरकला[7]पुटव्यवधानेन सम्यग्-वर्त्तनाय । तदाहुः—

"स्नेहाभ्यक्ते यथा ह्यक्षे चक्रं साधु प्रवर्त्तते ।
सन्धयः साधु वर्त्तन्ते संश्लिष्टाः श्लेष्मणा[8] तथा ॥"
(सु० शा० ५ अ०)

---

१ सामान्यतः सन्धिस्नायुवर्णनार्थोऽयमध्याय इत्यभिसन्धिः । २ इहापि तरुणास्थिवर्जमिति बोध्यम् । सन्धयः = Joints or Articulations. ३ Diarthroses or Movable Joints. ४ Amphiarthroses or Mixed Articulations. ५ Synarthroses or Immovable Joints. ६ काश्चित् स्नायवो रज्ज्वाकाराः, काश्चिच्च कोषाकाराः इति द्विधा निर्द्देशः । स्नायुरज्जवः = Ligaments. स्नायुकोषाः = Articular Capsules. ७ Synovial Membrane. ८ श्लेष्मा चेह श्लेषको नाम = Synovia.

अचेष्टाः पुनः सन्धयः प्रतनुस्नायुजालसंहता दन्तुरधारादिभिर्निरन्तरं[1] संश्लिष्टाश्च, तेषु हि प्रयोजनाभावात् श्लेष्मधरकलायाः अभावः।

आकृतितः पुनरष्टविधाः सन्धयः प्राचाम्—"कोरोदूखलसामुद्गप्रतरतुन्नसेवनीवायसतुण्डमण्डलशङ्खावर्त्ताः। तेषामङ्गुलिमणिबन्धगुल्फजानुकूर्परेषु कोराः सन्धयः। कक्षावङ्क्षणदशनेषूदूखलाः। अंसकूट[2]गुदभगनितम्बेषु सामुद्गाः। ग्रीवापृष्ठवंशयोः प्रतराः। शिरःकटिकपालेषु तुन्नसेवनी। हन्वोरुभयतस्तु वायसतुण्डः। कण्ठनाड्य[3]ादिषु मण्डला[4]ः। श्रोत्रशृङ्गाटकेषु शङ्खावर्त्ता[5]ः।"

(सु॰ शा॰ ५ अ॰)

विस्तरोऽत ऊर्द्ध्वम्।

तत्र **कोरा** नाम सन्धयो बहुचेष्टाः, उत्तानकोरगर्भेष्वस्थिप्रान्तेषु उत्सेधवतामस्थिभागानां सन्धानरूपाः। ते चतुर्विधाः—खल्लकोरः, परस्परकोरः, चक्रकोरः, सन्दंशकोरश्चेति। तेषु—

(१) खल्लको[6]रः मणिबन्धे गुल्फसन्धौ च स्वनामव्याख्यातः।

(२) परस्परको[7]रः पर्य्याणकाकारस्यालकयोः परस्परसन्धानरूपः, यथा—अङ्गुष्ठमूले[8]।

(३) चक्रको[9]रः मध्यकीलमाश्रित्य चक्रस्येव विवर्त्तनप्रदः सन्धिः, यथा—चूड़ावलयासहितस्य शिरसो दन्तचूड़ाख्यकशेरुकयाः[10]।

(४) सन्दंशको[11]रः सन्दंशाकारस्यास्थिभागस्य सन्धाने यथा—कूर्परसन्धौ[12]।

---

१ निरन्तरमव्यवधानेन। २ अंसपीठेति क्वचित् पाठ प्रामादिक एव, कक्षायां पृथगेव कोरसन्धेरभिधानात् अंसपीठस्य च तत्रैव सम्भवात्। अंसकूटेति पाठे तु अंसकूटाक्षकयोः सन्धिरुच्यते, तेन चांसचक्रनिर्म्माणात् सामुद्गसन्धिता युज्यत एव। ३ कण्ठनाड्यां श्वासपथे। इहापि केषुचित् मुद्रितपुस्तकेषु कण्ठहृदयनेत्र्यादि-पाठः प्रामादिक एव प्रतिभाति, हृदयादौ अस्थ्नामदर्शनात्। ४ मण्डलाकाराणां तरुणास्थ्नामुपर्य्युपरि निवेशादियं संज्ञा। इश्यतां फुस्फुसवर्णने श्वासपथः। ५ कर्णशष्कुलीषु तरुणास्थ्नां शङ्खावर्त्ताकारतो निवेशादियं संज्ञा। ६ Condyloid Articulations. ७ Reciprocal Reception (Saddle-Joints.) ८ पर्य्याणकाख्यस्य कूर्चास्थ्नः अङ्गुष्ठमूलशलाकया सन्धाने इति भावः। ९ Trachoides ( Pivot Joint.) १० तत्र हि दन्तचूड़ाख्यप्रवर्द्धनमाश्रित्य विवर्त्तते चूड़ावलया। ११ Ginglymus. १२ अन्तःप्रकोष्ठास्थ्नः प्रगण्डास्थ्ना सन्धाने।

उदूखला[1]: नाम सन्धयोऽपि बहुचेष्टाः उदूखलवद्गभीरप्रायेष्वस्थिभागेषु इतरास्थिमुण्डसन्धानरूपाः। तेषु हि स्वोदूखलान्याश्रित्य अभितो[2] विवर्त्तन्ते तानि तान्यस्थीनि, यथा—कक्षावङ्क्षणसन्धिषु।

दशनोदूखला[3]स्तु स्थिराः सन्धयः पृथगेव मन्तव्याः।

सामुद्गाः नाम समुद्ग[4]निर्म्मापका इव सन्धयः अल्पचेष्टाः। ते च श्रोणिचक्रांसचक्रादिषु दृश्याः।

प्रतरा[5] नाम प्रतरणशीलैरिव ईषच्चलैः परस्परसंहितैरस्थिखण्डैर्निर्म्मिताः सन्धयः। ते त्रिविधाः सन्धानप्रकारवैशेष्यात्—चलप्रतरो युक्तप्रतरो दृढप्रतरश्चेति। तत्र—श्लेष्मधरकलाव्यवधानेन चलत्वबाहुल्ये सति चलप्रतराख्यः सन्धिः, यथा—करचरणकूर्च्चास्थ्नां परस्परसंयोगे। अन्तरालस्थया स्नायुरज्ज्वा दृढकलया वा संयोगे युक्तप्रतरः, यथा—प्रकोष्ठास्थ्नोर्जङ्घास्थ्नोश्च परस्परसन्धाने। अन्तरालस्थेन तरुणास्थिचक्रेण सजातीयानां दृढसन्धाने दृढप्रतरः यथा—पृष्ठवंशे कशेरुकाणाम्।

तुन्नसेवन्यो[6] नाम परस्परापीडनैर्दन्तुरधारादिभिर्निर्म्मिताः कपालान्तरालाः सन्धयः। ते शिरःकपालेषु दृश्याः, कटिकपालेषु च प्राग् यौवनात्। ताश्च द्विविधाः—सीमन्तसेवनी ग्रस्तसेवनी चेति। तत्र शिरःकपालेषु सीमन्तसेवन्यः सीमन्ता वा। सीरिकास्थ्ना जतूकास्थ्ना सन्धाने तु ग्रस्तसेवनी[7]।

वायसतुण्डाख्यस्तु सन्धिः अधोहनुमुण्डयोः शङ्खास्थिगताभ्यां हनुसन्धिस्थालकाभ्यां सन्धानाच्च, खाद्यादानादिसम्पादकः स तु कोरसन्धेरेव खल्लकोराख्यो भेदो युग्मरूपः, तस्य कोरग्रहणेनैव ग्रहणमिति सूक्ष्मदृशः।

मण्डलशङ्खावर्त्ताः पुनः क्रमात् श्वासपथकर्णशष्कुलीगताः तरुणास्थिसन्धयः, तेषां नेह ग्रहणम्।

एते च सन्धिसंग्रहस्मारकाः श्लोकाः—

अचेष्टास्तुन्नसेवन्यः सीमन्त-ग्रस्तभेदतः।
शिरोऽस्थिषु समादिष्टा दशनोदूखलास्तथा॥
अल्पचेष्टास्तु सामुद्गाः श्रोणिचक्रांसचक्रयोः।
प्रतरास्त्रिविधाश्चैव पृष्ठवंशादिषु स्थिताः॥

---

१ Enarthosis (Ball-and Socket Joints). २ ऊर्द्ध्वमधःपार्श्वयोश्चेति भावः। ३ Gomphosis. ४ समुद्गाः सम्पुटाः। ५ Arthrodia. ६ Sutures. ७ Schindylesis.

अथात्र बहुचेष्टाः स्युः कोराश्चोदूखलास्तथा।
आद्यास्तुर्धा गुल्फादिष्वन्ये कक्षादिगोचराः॥
प्राचां वायसतुण्डो यः स युग्मः कोर एव हि।
शङ्खावर्त्ता मण्डलाश्च तरुणास्थिगताः स्मृताः॥

अथात्र चेष्टावत्सु सन्धिषु स्नायुसन्ततिनिबद्धेषु चत्वारो विशेषाः पृथग्द्रष्टव्याः—अस्थ्नां सन्धेयांशाः, सन्ध्यन्तरीयतरुणास्थीनि, स्नायवः, श्लेष्मधरा कला चेति। तत्र—

(१) अस्थ्नां सन्धेयांशाः दृढ़चिक्कणास्थिमयाः। ते चाच्छाद्यन्ते तरुणास्थिपत्रकैः सुमसृणैः सन्धानकाले।

(२) तरुणास्थीनि तावत् द्विविधानि सन्ध्यन्तःस्थितानि—सन्धिवेष्टनानि, सन्ध्यन्तरालानि चेति। तत्र सन्धिवेष्टनानि सन्धेयानामस्थ्यंशानां छादकानि, इतराणि तेषामन्तरालेषु स्थितानि चक्रत्रिकोणाद्याकाराणि। तत्र चक्राकाराणि कशेरुकान्तरालेषु, त्रिकोणाकाराणि मणिबन्धादौ। तेषु च कानिचित् स्थितिस्थापकानि स्नायुसूत्रभूयिष्ठानि च।

(३) स्नायवस्तावत् सन्धिबन्धनकारिण्यः शणसूत्राभदृढ़तन्तुनिर्म्मिताः द्विविधाः—रज्जुरूपाः, कोषरूपाः, कलारूपाश्चेति। तत्र रज्जुरूपाः[1] सन्धिमभितः पृथगवस्थिताः; कोषरूपाः[2] कोषवत् सन्धिवेष्टनकारिण्यः—ता एता द्विविधा अपि जानुवङ्क्षणादिसन्धिषु दृश्याः। कलारूपास्तु[3] स्नायवः सुदृढ़कलामय्यो वर्णितपूर्व्वाः जङ्घान्तरालाद्या अस्थिसंयोजन्यः।

प्राञ्चस्त्वाचक्षते—

"स्नायूश्चतुर्व्विधा विद्यात्तास्तु सर्व्वा निबोध मे।
प्रतानवत्यो वृत्ताश्च पृथ्व्यश्च शुषिरास्तथा॥
प्रतानवत्यः शाखासु सर्व्वसन्धिषु चाप्यथ।
वृत्तास्तु कण्डराः सर्व्वाः विज्ञेयाः कुशलैरिह॥
आमपक्वाशयान्तेषु वस्तौ च शुषिराः[4] खलु।
पार्श्वोरसि तथा पृष्ठे पृथुलाश्च[5] शिरस्यथ[6]॥" (सु० शा० ५ अ०)

---

१ Ligamentous bands. २ Capsular ligaments. ३. Inter-osseus membranes.
४ आमाशयादिप्रान्तेषु स्नायुसूत्रमयानामङ्गुरीयकसदृशभागानां दर्शनादिति भावः। ५ पृथुलाः प्रच्छदवदायताः, ताश्च प्रच्छदाकारपेशीनां प्रान्तेषु दृश्याः (=Apponeurosis) ६ दृश्यतां ५म पृष्ठे "नीथ्येव"त्यादि पाठोऽपि।

तत्र प्रतानवत्यः इह गृह्यन्ते सन्ध्यध्याये। तदन्यास्तु पेशीवर्णने आशय-वर्णनावसरे च वर्णनीयाः।

वर्णतश्च द्विविधाः स्नायवः—शुभ्राः पीताश्च। तत्र शुभ्राः सर्वत्र दृश्यन्ते अन्यत्र ग्रीवाधरायाः स्नायुरज्ज्वाः, कशेरुचक्रान्तरालाभ्यश्च स्नायुभ्यः। कशेरु-चक्रान्तराला हि स्नायवः पीताभाः स्थितिस्थापकगुणबहुलाश्च[1]।

**श्लेष्मधराः कलास्तु**[2] चेष्टावतां सन्धीनामन्तरावरण्यः कोषरूपाः सम-न्तात् सन्धेयांशेषु संसक्ताः। तदन्तश्च स्रवति श्लेषकः श्लेष्मा[3] नियतं, येन न चीयन्ते सन्धेयभागाः, सम्यक् प्रवर्त्तन्ते च सन्धिमाश्रिता विविधाश्चेष्टाः। आहुश्च—

"स्नेहाभ्यक्ते यथा ह्यक्षे चक्रं साधु प्रवर्त्तते।

सन्धयः साधु वर्त्तन्ते संश्लिष्टाः श्लेष्मणा तथा॥" (सु० शा० ४ अ०)

एताश्च द्विविधाः सन्ध्यन्तरीयाः, कण्डरानुगास्त्वाचाश्च। तत्र सन्ध्यन्तरीयाः सन्ध्यन्तःस्थितिष्वस्थिभागेषु संसक्ताः स्नायुकोषसमावृताः। कण्डरानुगाः[4] गता-गतशीलानां कण्डराणां वेष्टनभूताः। त्वाचाः[5] पुनः त्वङ्मात्रावरणानामस्थि-भागानामुपरिस्थाः त्वगस्थ्नोरन्तरालस्थाः। तासु सन्ध्यन्तरीया एवेह सन्ध्यध्याये-ऽधिकृताः।

अचेष्टेषु पुनः सन्धिषु प्रयोजनाभावात् श्लेष्मधरकलाया अभावः इत्युक्त-पूर्व्वम्।

तदेतत् सन्धिसामान्यविज्ञानं व्याख्यातम्। विशेषोऽत ऊर्द्ध्वम्।

# अथ द्वितीयोऽध्यायः।

अथातः सन्धिविशेषविज्ञानीयमध्यायं व्याख्यास्यामः।

इह खलु सामान्यतो विज्ञातेष्वपि सन्धिषु विशेषाः अवश्यं ज्ञातव्याः भवन्ति, सन्धीनां स्थानसंस्थानचेष्टादिविज्ञानार्थं सन्धिमुक्तादि[6]प्रतीकारार्थञ्च। तानेवेदानीं विशेषान् प्रविभज्य समासतो वक्ष्यामः।

वर्णनासौकर्य्याय चात्र शिरःपूर्व्वं वर्ण्यन्ते सन्धयः। शिरःसन्धिषु च अधो-हनुसन्धानं शिरोग्रीवसन्धानञ्चेति द्वाविव चेष्टावन्तौ सन्धी व्याख्येयौ, इतरे

---

१ Yellow Elastic fibrous tissue. २ Synovial membrane. ३ Synovia. ४ Tendon sheaths. ५ Bursae. ६ सन्धिमुक्तं सन्धिच्युतिः ( Dislocation.)

तु शिरःसन्धयः सीमन्ताद्याः समग्रकरोटिवर्णने वर्णितपूर्व्वा इति नेह पुनरुच्यन्ते।

शिरोऽनन्तरञ्चात्र व्याकरणीयाः पृष्ठवंशोरःकटिशाखागताः सन्धयः—इति क्रमोद्देशः।

## अथ शिरः-सन्धिषु

### अधोहनुसन्धानम्।

अधोहनुस्तावत् सन्धीयते शङ्खास्थिगतयोः स्थालकयोः, स्वमुण्डाभ्याम्। सन्धिश्चायं युग्मकोराख्यो[1] बहुचेष्टः प्राचां वायसतुण्डाख्यः। आश्रित्य चामुमधोहनोः सम्पद्यते ऊर्द्धाधश्चलनं भूयसा, स्तोकेन च पुरःपश्चिमतः पार्श्वयोश्च चलनम्। पुरश्च एकैकस्य हनुमुण्डस्य शङ्खास्थि-गण्डप्रवर्द्धनमूलस्थं सन्ध्यर्व्वुदम्, पश्चात् कर्णकुहरस्य पूर्व्वपरिधिः, उपरिष्टाच्च शङ्खालिकाख्या धारा, संयम्यते च हनुमुण्डमेकैकतः स्वकीये स्थालके तैरेव।

[ ५०श चित्रम्—अधोहनुसन्धानम्। ]




[ दृश्यश्चेह वामार्द्धस्य अभ्यन्तरतलमेव ]

---

१ Double Condyloid.

एकैकतश्च हनुमुण्डसन्धेर्लक्षणीया इमे विशेषाः—

(१) हनुमुण्डवेष्टनः स्नायुकोषः[1]। तदन्तश्च तरुणास्थिचक्रं स्थालकहनुमुण्डयोरन्तरालस्थम्, तदुभयतश्च श्लेष्मधरकलापुटकद्वयम्। सन्धेयभागाश्च तरुणास्थिसमावृताः।

(२) हनुमुण्डबाह्या स्नायुः[2], शङ्खास्थ्नः सन्ध्यर्ब्बुदात् हनुमुण्डमूलावधि तिर्य्यक्सम्बद्धा।

(३) हन्वन्तःपार्श्वगा स्नायुः[3], जतूकाबुद्बुदत्प्रवर्त्तः कोणतः हनुकूटान्तरतले दन्तमूलविवरोपकण्ठं सङ्गता तिरश्चीना।

(४) शिफाहनुकोणिका स्नायुः[4], शङ्खास्थ्नः शिफाप्रवर्द्धनात् हनुकोणं सङ्गता। ता एताः पेशीसमन्विता अधोहनुसन्धेः सन्धारण्य एकैकतः।

## अथ शिरोग्रीव-सन्धिः।

**शिरोग्रीव-सन्धिर्**[5]नाम शिरसः सन्धिः पृष्ठवंशेन। तत्र च पश्चिमकपालं सन्धीयते चूड़ावलयया, सा च पश्चिमकपालञ्च दन्तचूड़येति त्रिधा व्याख्येयोऽयं सन्धिः। तत्र—

(क) **पश्चिमकपाल-चूड़ावलययोः सन्धिः**[6] पश्चिमकपालमूलकोट्योः सन्धानि कोराख्यः, अवशिष्टांशे तु प्रतराख्यः। स्नायवश्चात्र षट् कपालमूलचूड़िकाख्याः। तद्यथा—

कपालमूलचूड़िका अग्रिमा[7]। सेयं पश्चिमकपालास्थ्नो मूलभागस्य महाविवरपूर्व्वपरिधिभूतस्य चूड़ावलयापूर्व्वार्द्धेन संयोजनी।

कपालमूलचूड़िका पश्चिमा[8]। सेयं पश्चिमकपालांशस्य महाविवरपश्चिमपरिधिभूतस्य चूड़ावलयापरार्द्धेन संयोजनी।

ताश्चोभयतो भित्त्वा सनाड्योर्मस्तिष्कमातृकाख्ययोर्धमन्योर्महाविवरं प्रवेशः।

कपालमूलचूड़िके पार्श्वगे[9]। तयोरेकैका पश्चिमकपालस्य मन्याप्रवर्द्धनं योजयति चूड़ावलयाया बाहुप्रवर्द्धनेनैकैकतः।

कपालमूलचूड़िकौ स्नायुकोषौ[10]। तौ च धारयतः पश्चिमकपालमूलकोटी तत्स्थालकयोश्चूड़ावलयास्थितयोः परितः, सम्वेष्ट्य। तदन्तश्च द्वाश्चेति श्लेष्मधरौ कलापुटकौ।

१ Capsular Ligament of the Temporo-madibular Articulations. २ External Lateral (do). ३ Internal Lateral (do). ४ Stylo mandibular Lig. ५ Granio-vertebral Articulations. ६ Occipito-atlantal Articulation. ७ Anterior Occipito-atlantal Lig. ८ Posterior (do). ९ Lateral (do). १० Capsular (do).

# [ ५१ चित्रम्—शिरोग्रीवसन्धिः ( पुरस्तलम् ) ]




[ + एतच्चिह्नं स्नायुबोधकम् ]

## [ ५२ चित्रम्—शिरोग्रीवसन्धिः ( पृष्ठतलम् ) ]

( तच्चेह पश्चिमकपालपूर्व्वांशस्य ग्रीवाकशेरुचक्राणाञ्चापसारणेन दर्शितम् )




[ † एतच्चिह्नं स्नायुबोधकम् ]

(ख) **चूड़ावलया-दन्तचूड़्योः सन्धिस्तु**[1] पुरोभागे चक्रकोराख्यः, दन्तचूड़ाया हि दन्तप्रवर्द्धनं मध्यकीलभूतमाश्रित्य विवर्त्तते चूड़ावलया शिरःसहितेति ; अवशिष्टांशे तु प्रतरसंज्ञः। स्नायवश्चात्र पञ्च। तद्यथा—

वलयदन्तिका पुरोगा[2],—कशेरुपिण्डयोः पुरःसन्धानकरी।

वलयदन्तिका पश्चिमा[3],—कशेरुचक्रयोः पश्चिमतः सन्धानकरी।

वलयदन्तिकौ स्नायुकोषौ[4].—सन्धिप्रवर्द्धनकयोः सन्धिप्रवर्द्धनकाभ्यां सन्धानकरौ, अभ्यन्तरतः श्लेषधरकलापुटकसहितौ।

स्वस्तिकरज्जुकाख्या[5] स्नायुः उभयतः चूड़ावलयान्तःकलायकयोः सम्बद्धा दन्तप्रवर्द्धनधारणी, ऊर्द्ध्वाधःसंसक्ता च क्रमात् पश्चात्कपालमूलेन दन्तचूड़ापिण्डेन च। सेयं दन्तचूड़ाया दन्तप्रवर्द्धनस्य संयमनी[6] पुरस्तात्। श्लेषधरौ चात्र कलापुटकौ दन्तप्रवर्द्धनस्य पुरःपश्चिमस्थौ।

---

१ Atlanto-axial Articulation. २ Anterior Atlanto-axial Lig. ३ Posterior ( do ). ४ Capsular ( do ). ५ Transverse Lig. ६ संयमनञ्च यथास्थानधारणरूपम्। यदि हि दन्तप्रवर्द्धनं स्थानच्युतं स्यात् तदा सुषुम्नाशीर्षकसम्पीडनात् सद्य एव मृत्युरिति निश्चयो विशेषविदाम्।

(ग) पश्चिमकपाल-दन्तचूड़योः सन्धौ[१] तु परस्परस्पर्शाभावेऽपि सम्बन्धः स्नायवस्त्रयस्तत्र द्रष्टव्याः सुषुम्नाविवरान्तर्निगूढ़ाः। तद्यथा—

कपालदन्तचूड़िका[२]—पश्चिमकपालमूलस्य दन्तचूड़ापिण्डेन संयोजनी। सेयं दन्तप्रवर्द्धनस्य मध्यरज्जुकासंयतस्य च्छादनी पश्चिमतः, सुषुम्नाकाण्डस्य च पुरोगता तद्विवरान्तः।

दन्तशिखरिका[३]—दन्तचूड़ाया दन्तप्रवर्द्धनस्य शिखरसम्बद्धा ऊर्द्ध्वं पश्चिमकपालमूले संलग्ना।

दन्तपक्षिके मध्यरज्जुके[४] वा नाम द्वे दन्तप्रवर्द्धनमुभयतः पक्षवत् सम्बद्धे तत्संयमनार्थं पश्चिमकपालमूलकोष्ठोर्मूलतश्च संसक्ते—इति।

ता एताः शिरोग्रीवसन्धायिन्यः स्नायवः। अपरा चास्ति ग्रीवाधराख्या[५] महती स्नायुरज्जुः पश्चिमकपालस्य पश्चिमार्व्वुदतः पश्चिमाग्निकातश्च सप्तम्याः ग्रीवाकशेरुकायाः पृष्ठकण्टकान्तं संलग्ना। सा च स्थितिस्थापकगुणा धारयति प्रयत्नमन्तरेणैव ग्रीवामृजुभावेन।

## अथ पृष्ठवंशसन्धयः[६]।

पृष्ठवंशः खलु कशेरुकाभिरुपर्य्युपरिसंहिताभिर्निर्म्मीयते। सन्धिश्च तासां परस्परं पञ्चस्ववयवेषु सजातीयेषु—

(१) कशेरुपिण्डेषु
(२) कशेरुचक्रेषु
(३) सन्धिप्रवर्द्धनेषु
(४) पृष्ठकण्टकेषु
(५) बाहुप्रवर्द्धनेषु चेति।

तत्र कशेरुपिण्डानां परस्परसन्धयः अचेष्टप्रायाः। कशेरुचक्रादीनां परस्परसन्धयस्तु युक्तप्रतराख्या अल्पचेष्टाः, तेष्वपि चेष्टाधिक्यं ग्रीवा-कटि-कशेरुकासन्धिषु। चेष्टाश्च पृष्ठवंशे अन्तरायमनं[७] बहिरायमनं[८] पार्श्वविवर्त्तनञ्चे[९]ति—त्रिविधा एव प्राधान्येन[१०] द्रष्टव्याः। तत्र—

---

१ Occipito-axial Articulation. २ Appartus Ligamentous Colli. ३ Suspensory Ligament. ४ Check Ligaments. ५ Ligamentum Nuchæ. ६ Vertebral Articulations. ७ अन्तरायमनं नाम पुरस्तादवनमनम्। ८ बहिरायमनं पृष्ठतोऽवनमनम्। अपतानकरोगोक्तयोरन्तरायाम-बहिरायामसंज्ञयोर्दर्शनात् पदद्वयस्येहशार्थे प्रयोगः। ९ वामतो दक्षिणतो वा विवर्त्तनमित्यर्थः। १० अपरासां मध्यचेष्टानां विविधेष्वेवान्तर्भावात्।

(१) कशेरुपिण्डानां परस्परसन्धानकारिण्यः स्नायवस्त्रिधा विभज्यन्ते—

(क) कशेरुपुरस्था साधारणी[1], सेयं सर्व्वासां कशेरुकाणां पुरोवर्त्तिनी दृढ़-स्थूलदीर्घपट्टिकाकारा समग्रपृष्ठवंशधारिणी।

(ख) कशेरुपश्चिमा साधारणी[2], सेयं सर्व्वासां कशेरुकाणां पृष्ठवर्त्तिनी पूर्व्ववदेव। दृश्यते चासौ कशेरुचक्राणामपसारणेन सुषुम्नाविवरस्यान्तः पुरःसीमभूता।

(ग) कशेरुपिण्डान्तरालाश्च[3], ताः कशेरुपिण्डानां संयोजन्यः, मध्यतः कोमलस्थितिस्थापकैस्तरुणास्थिप्रायैश्चक्रकैरुपलक्षिताश्च।

(२) कशेरुचक्राणां परस्परसन्धानकारिण्यस्तु स्नायवः स्थितिस्थापकगुणाः पीताभाश्च। ताः कशेरुचक्रान्तराला[4] नाम।

(३) सन्धिप्रवर्द्धनानां परस्परसन्धानानि तु कोरप्रायाणि स्नायुकोषा[5]न्तःस्थानि। तत्र एकैकस्याः कशेरुकायाश्चत्वारि सन्धिप्रवर्द्धनानि—द्वे ऊर्द्ध्वं द्वे चाधः। तत्रोर्द्ध्व-गयोरुपरिस्थकशेरुकयोरधोगसन्धिप्रवर्द्धनाभ्याम्, अधोगयोस्त्वधःस्थकशेरुकायाः ऊर्द्ध्वगसन्धिप्रवर्द्धनाभ्यां सन्धिः स्नायुमयकोषैः। प्रतिस्नायुकोषञ्च एकैकं श्लेष्म-धरकलापुटकम्।

(४) पृष्ठकण्टकसन्धायिन्यस्तु स्नायवो द्विविधाः—पृष्ठकण्टकधरा साधारणी, कण्टकान्तरालाश्चेति। तत्र—

(क) पृष्ठकण्टकधरा साधारणी[6] दृढ़रज्जुप्राया सर्व्वासां कशेरुकाणां पृष्ठ-कण्टकसन्धायिनी, पश्चिमकपालपृष्ठस्थादर्ब्बुदात् त्रिकास्थिपृष्ठकण्टकान्तं सन्नद्धा। तस्याश्चोर्द्ध्वभागस्य ग्रीवाधरा स्नायुरज्जुरिति संज्ञा उक्तपूर्व्वा।

(ख) कण्टकान्तरालास्तु[7] स्नायवः पृष्ठकण्टकानामन्तरालप्ररूढ़ाः प्रतनु-कलानिर्म्मिताः पृष्ठकटिकशेरुकास्वेव विशेषतो दृश्याः।

(५) बाहुप्रवर्द्धनानां परस्परसन्धायिन्यः पुनः स्नायवो बाहुप्रवर्द्धनान्तराला[8] नाम। ता ग्रीवाकटिकशेरुकासु प्रतनुकलामय्यः, पृष्ठकशेरुकासु तु रज्जुप्रायाः।

---

१ Anterior Common Ligament. २ Po-terior Common Lig. ३ Inter-vertebral Ligaments & Discs. ४ Ligamenta Sub-flava. ५ Articular Capsules. ६ Supra-spinous Ligaments. ७ Inter-spinous Ligaments. ८ Inter-transverse Ligaments.

# अथ पर्शुकापृष्ठसन्धयः।

पर्शुकापृष्ठसन्धयो नाम पर्शुकानां सन्धयः पृष्ठकशेरुकाभिः (५१ चित्रम्)।[१] ते द्विविधाः—पर्शुकामुण्डानां कशेरुपिण्डैः सन्धयः, पर्शुकार्व्वुदानां बाहुप्रवर्द्धनकैः सन्धयश्चेति। तत्र—

(१) पर्शुकामुण्डानां कशेरुपिण्डैः सन्धयश्चलप्रतराख्याः। तत्र प्रथमदशमैकादशद्वादशीनां पर्शुकानामेकैकेन कशेरुपिण्डस्थालकेन सन्धानम्, अन्यासान्तु कशेरुद्वयपिण्डस्थाभ्यां स्थालकार्द्धाभ्याम्। सन्धायिन्यश्चात्र स्नायवस्त्रिविधाः। तद्यथा—

(क) पुरस्त्या त्रिशूलाकारा[२] ऊर्द्धाधरीययोः कशेरुपिण्डयोस्तदन्तरालस्थे तरुणास्थिचक्रे च संसक्ता।

(ख) कोषाकारा[३] पर्शुकामुण्डवेष्टनभूता स्थालकपरिधिमभितः संसक्ता श्लेषधरकलासहिता।

(ग) सन्ध्यन्तरीया[४] ह्रस्वरज्जुप्राया पर्शुकामुण्ड एव संयुक्ता।

(२) पर्शुकार्व्वुदानां बाहुप्रवर्द्धनैः सन्धयस्तु[५] युक्तप्रतराख्याः। तत्र सन्धायिन्यः स्नायवश्चतुर्व्विधाः। तद्यथा—

(क) पर्शुकाबाहुका अग्रिमाः[६]। ताः पर्शुकाग्रीवाणां कशेरुबाहुप्रवर्द्धनैः संयोजन्यः। तन्मध्यतश्च पर्शुकानुगानां सिरा-धमनी-नाड़ीनां प्रसरः।

(ख) पर्शुकाबाहुकाः मध्यमाः[७]। ताः पर्शुकाकोणानां कशेरुबाहुप्रवर्द्धनाग्रैः संयोजन्यः।

(ग) पर्शुकाबाहुकाः पश्चिमाः[८]। ताः कशेरुबाहुप्रवर्द्धनाग्रतः पर्शुकार्व्वुदपुरस्तात् संसक्ताः।

(घ) अर्व्वुदकोषिकाः[९]। ताः पर्शुकार्व्वुदानां कशेरुबाहुप्रवर्द्धनस्थैः स्थालकैः सन्धानकारिण्यः समन्ताद्वेष्टनभूताः श्लेषधरकलासहिताः।

---

१ Costo-vertebral Articulations. २ Anterior Costo-vertebral or Stellate Lig. ३ Capsular Lig ४ Inter-articular Lig. ५ Costo-Transverse Articulations. ६ Anterior Costo-Transverse Lig. ७ Middle (do). ८ Posterior (do). ९ Capsular.

## [ ५३ चित्रम्—पर्शुकापृष्ठसन्धयः। ]




[ † एतच्चिह्नं स्नायुबोधकम् ]

## अथ पर्शुक पूर्व्वसन्धयः।

पर्शुकापूर्व्वसन्धयः उरःपर्शुकासन्धयो वा नाम पर्शुकापपर्शुकोरःफलकानां सन्धयः। ते चतुर्व्विधाः, तद्यथा—

(१) पर्शुकानामुपपर्शुकाभिः सन्धयः,

(२) उपपर्शुकानामुरःफलकेनोभयतः,

(३) उपपर्शुकानां परस्परम्,

(४) उरःफलकखण्डानां परस्परञ्चेति,

तत्र—

(१) द्वादशसंख्यानां पर्शुकानां तत्संख्याभिरुपपर्शुकाभिः सन्धानानि स्थिराणि, पर्शुकाग्रस्थालकेषु उपपर्शुकामूलानां दृढ़सन्धानात्। तत्रास्थिधराख्य-कलामात्रेण संयोगः।

(२) उपपर्शुकानामुरःफलकेन सन्धयस्तु सप्तसंख्या एकैकतः, प्रथमादि-सप्तानामेव उपपर्शुकानामुरःफलकेन सन्धानात्। ते च युक्तप्रतराः अन्यत्र प्रथमोपपर्शुकासन्धेः, स हि सर्व्वथा निश्चल एव। एवञ्च प्रथमसन्धिवर्ज्जमपरेषु षट्सु दृश्यन्ते तत्संख्यानि श्लेषधरकलापुटकानि।

१ Articulations of the Cartilages of the Ribs with the Sternum etc.

स्नायवः पुनरेकैकस्मिन् सन्धौ दृश्यन्ते चतस्रः उपपर्शुकोरःसन्धायिन्यः, क्रमात्—अग्रिमा, पश्चिमा, कोषाकारा, सन्ध्यन्तरीया चेति स्वनामव्याख्याताः ।

[ ५४ चित्रम्—पर्शुकोरःसन्धयः ]




[ * उरःफलकान्तराला स्नायुः । ]

(३) उपपर्शुकानां परस्परसन्धयस्तु सम्पद्यन्ते कतिचित्स्नायुसूत्रैरुप-पर्शुकान्तरालाख्यैः। ते च दृष्टाः पञ्चम्यादिदशम्यन्तासु उपपर्शुकास्वग्रतः। तत्र पञ्चमी संयुज्यते षष्ठ्या स्तोकमात्रेण, षष्ठ्याद्यास्तु दशम्यन्ताः दृढ़सम्बद्धाः परस्परम्, श्लेषधरकलासहिताश्च केषुचित् सन्धिस्थानेषु।

एकादशी द्वादशी चेति द्वे पर्शुके अग्रतः उपपर्शुकासंहिते अपि न केनापि सम्बद्धे पुरस्तात्, अतएव तयोः विमुक्ताग्रसंज्ञेति प्रागवोचाम।

(४) उरःफलकान्तरीयसन्धयस्तु ग्रैवेयकमध्यफलकाग्रपत्राख्यानां खण्डानां परस्परसन्धानात् सम्पन्नाः। तत्र स्नायवश्चतस्रः—पुरस्त्या उरःफलक-संयोजनी, पश्चिमा उरःफलकसंयोजनी चेति द्वे पूर्व्वापरे, एका उरःफल-कान्तराला ग्रैवेयकमध्यफलकयोरन्तरालस्था तरुणास्थिप्राया, अपरा अग्रपत्र-संयोजनी चेति।

## अथ अक्षकोरःसन्धानम्।

**अक्षकोरःसन्धानन्तु**[1] अक्षकास्थ्नः उरःफलकेन सन्धानमेकैकतः स्नायु-कोषप्रतिबद्धं श्लेषधरकलासहितञ्च। तद्दृढ़ीकरणाय चात्र स्नायुः प्रथमपर्शुकया तत्संयोजनी, अक्षकयोरन्तरालस्था चापरा परस्परसंयोजनी।

**अक्षकांससन्धानन्तु** अंससन्धिव्याख्याने व्याख्येयम्।

## अथ श्रोणिचक्रसन्धयः।

श्रोणिचक्रसन्धयस्तावद् द्विधा वर्ण्यन्ते—श्रोणिचक्रास्थ्नां पृष्ठवंशेन, परस्परञ्च सन्धानात्। तत्र—

**श्रोणिचक्रस्य पृष्ठवंशेन सन्धिः** दृढ़प्रतराख्यः। स च सम्पद्यते पञ्चम्या कटिकशेरुकया त्रिकास्थ्नः सन्धिमुखेन। तयोः सन्धायिन्यश्च स्नायवः पृष्ठवंश-स्नायुवत्, काश्चित् तदनुबन्धिन्यश्च[2]। द्वे द्वे चात्राधिके स्नायू एकैकतः—कटि-जवनिका कटित्रिकान्तिका च नाम। तयोः—

---

१ Sterno-clavicular Articulation. २ यथा हि पृष्ठवंशसन्धिवर्णने वर्णिताः पञ्चजातीयाः स्नायवः तद्वदिहापि। इहत्यास्तु साधारणाख्यानां पृष्ठवंशस्नायूनामनुबन्धिन्य इति विशेषः।

कटिजघनिका[1] चतुर्थ्याः पञ्चम्याश्च कटिकशेरुकायाः बाहुप्रवर्द्धनतो जघन-धारान्तं सङ्गता, कटिनाडीप्रवेशाय मध्ये विवरान्विता रज्जुगुच्छरूपा च ।

कटित्रिकान्तिका[2] दृढत्रिकोणपट्टिकाप्राया पञ्चम्या कटिकशेरुकया त्रिकास्थ्नः, त्रिकस्थालकपरिधेश्च संयोजनी ।

**श्रोणिचक्रास्थ्नां परस्परसन्धयः** पुनश्चतुर्विधाभिः सम्पद्यन्ते स्नायुभिः—

(१) त्रिकास्थ्नो जघनकपालेन, (२) त्रिकास्थ्नः कुकुन्दरास्थ्ना, (३) त्रिका-नुत्रिकयोः, (४)भगास्थ्नोश्च परस्परमिति चतुर्द्धा सन्धानात् । तत्र—

(१) त्रिकजघनयोः सन्धानं[3] दृढप्रतराख्यम्, त्रिकमुभयतो जघनकपालयोः सन्धानात् । तत्र हि सन्धीयते त्रिकास्थि जघनकपालस्य त्रिकस्थालकेन तरुणास्थिपत्रकावृतेन, न च तत्र प्रायो दृश्यते श्लेष्मधरा कला । गर्भिण्यास्तु त्रिकस्थालकयोः सम्भवतः श्लेष्मधरौ कलापुटकौ गर्भाभिवृद्ध्या श्रोणिफलकयो-श्चलत्वात् । स्नायवश्चात्र त्रिकजघनसंयोजन्यश्चतस्रस्त्रिकजघनिकाः नाम द्वे द्वे एकैकतः, क्रमात्—अग्रिमा पश्चिमा चेति । ताश्च दृढपट्टिकाकाराः ।

(२) त्रिककुकुन्दरास्थिसंयोजन्यश्च[4] स्नायवश्चतस्र एव,—द्वे द्वे एकैकतः क्रमात् लघ्वी गुर्वी च नामेति । ताभ्याञ्च यथादेशसंयुक्ताभ्यां परिणम्यते क्रमात्—गृध्रसीद्वारं कुकुन्दरद्वारञ्च तत्तद्विवराख्यम् । तत्र गृध्रसीविवरेण गृध्रस्याख्यनाड्याः तदनुवर्त्तिनीनां सिराधमन्यादीनां शुण्डिकाख्यपेश्याश्च निर्गमः । कुकुन्दरविवरेण पुनरन्तःस्थायाः श्रोणिगवाक्षिण्याः पेश्याः तदनु-चरीणां सिराधमनीनाडीनाञ्च वस्तिगुहायां प्रवेशः । तत्र—

लघ्वी त्रिककुकुन्दरसंयोजनी[5] स्नायुः पुरःस्था तन्वी त्रिकोणप्राया च । सेयं त्रिकानुत्रिकयोः पार्श्वधारातः कुकुन्दरकण्टकान्तं सङ्गता ।

गुर्वी त्रिककुकुन्दरसंयोजनी[6] तु स्नायुः पश्चिमस्था स्थूला त्रिकोणप्राया च । सेयं मूलतः सम्बध्यते जघनकपालस्य पश्चिमाधस्तनकूटेन त्रिकास्थ्नोऽधरार्द्ध-पार्श्वेनानुत्रिकास्थ्ना च, अग्रतस्तु कुकुन्दरपिण्डेन श्रोणिगवाक्षपुरःपरिधिना च ।

---

१ Ilio-lumbar Lig. २ Lumbo-Sacral Lig. ३ Sacro-iliac Articulation. ४ Sacro-ischiatic Ligaments. ५ Lesser Sacro-Sciatic Ligament. ६ Great Sacro-Sciatic Ligament

(३) त्रिकानुत्रिकसन्धायिन्यश्च[1] स्नायवश्चतस्रः,—अग्रिमा, पश्चिमा, पार्श्वगे द्वे चेति। सन्ध्यन्तराले चात्र दृश्यं तरुणास्थिचक्रम्।

[ ५५ चित्रम्—श्रोणिचक्रसन्धयः। ]




श्रो णि फ ल क म्

[ † एतच्चिह्नं स्नायुबोधकम्। १, २, कटिनाडीनिर्गमाय विवरद्वयम्। अत्र च वामार्द्धे याः स्नायवो यथा दर्शिताः दक्षिणार्द्धेऽपि तास्तथा ज्ञेयाः ]

अनुत्रिकञ्च क्षुद्रकशेरुकाचतुष्टयसङ्घातमयमित्युक्तपूर्व्वम्। एतत्कशेरुखण्डानाञ्चात्र पार्थक्यं दृश्यते नारीषु प्रायः, प्रसवकाले श्रोणिद्वारस्य विकसनसौकर्य्यार्थम्।

(४) भगास्थ्नोः परस्परसन्धानं[2] तावत् स्वसुखण्डाभ्यां मध्यरेखायाम्। संहितयोश्च तयोरेका भगास्थिसंज्ञेति प्राञ्चः, अत्र तु कश्चिद्भगपीठं लिङ्गपीठमिति वा। सन्धानञ्चेदं दृढ़प्रतरमपि गर्भिण्याः किञ्चिद्विकसनक्षममिति परीक्षकाः।

---

१ Sacro coccygeal Ligaments. २ Symphysis Pubes.

सन्धायिन्यश्चात्र स्नायवश्चतस्त्र एव भगसंयोजन्यो नाम क्रमात्—उत्तरा, अधरा, अग्रिमा, पश्चिमा चेति। सन्धानान्तराले चात्र तरुणास्थिचक्रम्, सर्व्वथा श्लेष्मधरकलाभावश्च।

**अंसचक्रसन्धयस्तु** अंससन्धिवर्णने वर्णनीयाः।

## अथ शाखासन्धयः।

शाखाश्चतस्त्रः—द्वौ बाहू द्वे च सक्थिनी। तत्र प्रतिबाहु समस्तु देशेषु सन्निविष्टाः सन्धयः। तद्यथा—अंसे च, कूर्परे च, प्रकोष्ठान्तराले च, मणिबन्धे च, करकूर्च्चान्तश्च करतले च, कराङ्गुलिषु चेति। प्रतिसक्थि च तथैव क्रमात्—वंक्षणे च, जानुनि च, जङ्घान्तराले च, पादसन्धौ च, पादकूर्च्चान्तश्च, पादतले च, पादाङ्गुलिषु चेति। तत्रादौ व्याख्येया :—

## ऊर्द्ध्वशाखासन्धयः।

## अथ अंससन्धयः।

**अंससन्धयस्तावत्** सम्पद्यन्ते अक्षकांसफलकप्रगण्डास्थ्नां सन्धानात्। तत्र अक्षकांसयोः सन्धानमंसचक्रसन्धानं नाम, प्रगण्डांसयोः सन्धानन्तु अंसोदूखलसन्धानं कक्षासन्धानं वा नाम। बद्दवश्चानयोः सन्धानयोः संयोजन्यः स्नायवः, द्वे चापरे अंसकान्तरीये नाम अंसफलकावयवानां परस्परसंयोजन्यः। तत्र—

**अंसचक्रसन्धानम्**[1] अक्षकास्थिबहिःप्रान्तस्य अंसकूटाग्रेण संयोगात्। सन्धिश्चायं चलप्रतराख्यः, क्वचित् सम्यन्तःस्थितेन तरुणास्थिचक्रेणोपलक्षितश्च। तत्सम्बन्धन्यश्च स्नायवश्चतस्त्रः—द्वे अंसाक्षकबन्धन्यौ[2]—उत्तरा अधरा चेति, द्वे च तुण्डाक्षकबन्धन्यौ[3]—त्रिकोणिका चतुरस्त्रिका चेति। तासामाद्ये अंसचक्रसन्धायिन्यौ क्रमादूर्द्ध्वाधःस्थे, अन्त्ये अंसतुण्डपश्चार्द्धात् अक्षकास्थ्नो बहिरूर्द्ध्वाधस्तलं यावत् सन्नद्धे स्वनामख्याते।

अंसफलकान्तरीये[4] तु स्नायू क्रमात् तुण्डमूलिका तुण्डकूटिका च नाम। तत्राद्या अंसतुण्डमूले अंसशिरःकोटरोपरि संलग्ना, अन्त्या अंसतुण्डबाह्यार्द्धात् अंसकूटाग्रं यावत् सन्नद्धा।

---

१ Acromio-Clavicular Articulations. २ Superior and Inferior Acromio-clavicular Ligaments. ३ Coroco-clavicular Ligaments (Conoid and Trapezoid). ४ Proper Ligaments of the Scapula. ५ Transverse. ६ Coraco-Acromial.

[ ५६ चित्रम्—अंससन्धयः ]




[ † एतच्चिह्नं स्नायुबोधकम् ]

**अंसोदूखलसन्धानं कक्षासन्धानं**[1] वा नाम सम्पद्यते प्रगण्डास्थ्नो मुण्डस्योदूखलाकारे अंसपीठस्थे स्थालके सन्धानात् । स्थालकञ्च तत् तरुणास्थि-भूयिष्ठेन स्नायुचक्रेण[2] निष्पाद्यते गभीरम् । अस्थिसम्बन्धन्यौ चात्र स्नायू द्वे एव—अंसोदूखलिकः स्नायुकोषः, तुण्डप्रगण्डिका चेति । तयोः—

अंसोदूखलिको[3] नाम दीर्घशिथिलः स्नायुकोषः ऊर्द्ध्वमंसोदूखलमभितः, अधः प्रगण्डास्थ्नो मुण्डं परितश्च सम्बद्धः । तत्र च त्रीणि विवराणि सन्ध्यन्तरीयस्य श्लेष्मधरकलापुटस्य शाखानां तिसृणां कण्डरानुगानां निर्गमाय । कण्डराश्च ताः—अंसान्तरिका[4], अधरा अंसपृष्ठिका[5] चेति पेश्योः प्रान्तभूते द्वे, द्विशिर-स्काख्यपेश्या दीर्घशिखा[6] चेति । तासां चरमा सन्ध्यन्तःप्रविष्टा ।

---

१ उदूखलाख्यः सन्धिः कक्षावंक्षणयोरिति व्याख्यातपूर्व्वम् । अंससन्धिश्च प्रधानतः कक्षासन्धिरेव । (Shoulder-Joint). २ Glenoid Ligament. ३ Capsular Ligament of Shoulder. ४ Sub-Scapularis. ५ Infraspinatus. ६ Long Tendon of Biceps.

तुण्डप्रगण्डिका नाम स्नायुरंसतुण्डात् प्रगण्डास्थ्नो महापिण्डकान्तमागता स्नायुकोश[१]कदेशेन प्रतिबद्धा ।

परितश्च कक्षासन्धानं सन्निविष्टा इमाः पेश्यः—ऊर्द्ध्वम् अंसपृष्ठिका उत्तरा । अधस्तात् त्रिशिरस्काया दीर्घशिखा । अन्तःपार्श्वे अंसान्तरिका । बहिःपार्श्वे अंसपृष्ठिका अधरा, अंसाधरिका लघ्वी च । स्नायुकोषाभ्यन्तरे द्विशिरस्काया दीर्घशिखा । समग्रमंससन्धिमंसचक्रञ्च सञ्छाद्य अंसच्छदा ।

चेष्टाः पुनरमुं सन्धिमाश्रित्य प्रवर्त्तन्ते नानाविधाः पुरःपश्चादन्तर्बहिः-कर्षणाद्याः, विवर्त्तते चात्र प्रगण्डास्थिमुण्डं यथेष्टमिति चेष्टावतां सन्धीनां प्रधानमाचक्षते कक्षासन्धिं सन्धिविदः ।

## अथ कूर्परसन्धिः ।

कूर्परसन्धिः[२] कफोणिसन्धिर्वा नाम प्रगण्डास्थ्नः प्रकोष्ठास्थिभ्यां सन्धानं सामान्यतः । स च सन्दंशकोराख्यः, अन्तःप्रकोष्ठास्थ्नः सन्दंशाकारस्य कूटद्वयस्यान्तः प्रगण्डास्थ्नो डमरुकाख्यभागस्य सन्धानात् । सन्धीयते च तत्रैव बहिःप्रकोष्ठास्थ्नः कोरमध्यं मुण्डं प्रगण्डास्थ्नः कन्दलीभागेन । बहिःप्रकोष्ठा-स्थिनी चात्र परस्परसंहिते कूर्परसन्ध्यन्तःप्रविष्टे ।

[ ५७ चित्रम्—कूर्परसन्धिः ( आन्तरतलम् ) ]




[ † एतच्चिह्नं स्नायुबोधकम् । ]

---

१ Coraco-humeral Lig. २ Elbow-joint

अथेह कूर्परसन्धिबन्धन्यः स्नायवश्चतस्रः—अग्रिमा, पश्चिमा, बहिःपार्श्विका, अन्तःपार्श्विका चेति। प्रकोष्ठास्थ्नोरूर्द्ध्वप्रान्तसन्धायिनी तु स्नायुर्मुण्डवेष्टनिका नामाग्रे वक्ष्यते, तया प्रथमत्रयस्य सम्बन्धो घनिष्ठः। तत्र—

अग्रिमा कूर्परसन्धिबन्धनी प्रगण्डास्थ्न आन्तरार्ब्बुदात् पुरस्तलाच्च सम्भूय अन्तःप्रकोष्ठास्थ्नश्चञ्चुप्रवर्द्धनपरिधौ सङ्गता मुण्डवेष्टनिकाख्यस्नायुसम्बद्धा च।

पश्चिमा कूर्परसन्धिबन्धनी प्रगण्डास्थ्नः कूर्परखातोपकण्ठादुद्भूय अन्तःप्रकोष्ठास्थ्नः कूर्परकूटपरिधौ संसक्ता।

बहिःपार्श्विका प्रगण्डस्य बाह्यार्ब्बुदात् सम्भूय मुण्डवेष्टनिकाख्यस्नायौ सम्बद्धा।

अन्तःपार्श्विका प्रगण्डास्थ्न आन्तरार्ब्बुदादन्तःप्रकोष्ठास्थ्नः कूटद्वयान्तःपरिधौ संसक्ता।

सर्व्वासाञ्चासां स्नायूनां परस्परसंयुक्तानामेकीभावात् स्नायुकोषवद्भावः अन्यत्र कूर्परकूटपृष्ठात्। तद्धि त्वङ्मात्रावरणमिति प्रागवोचाम।

**चेष्टा**स्तावदिह कूर्परसन्धौ संकोचः, प्रसारः, अन्तर्विवर्त्तनं, बहिर्विवर्त्तनञ्चेति चतुर्व्विधाः; तासां प्रसारस्तावद्बाहोर्दण्डीभावमात्रपर्य्यवसायीति विशेषः।[1]

**श्लेष्मधरा** चात्र कला सन्ध्यन्तरीया प्रकोष्ठास्थ्नोरूर्द्ध्वसन्धानान्तःप्रसृतया शाखया सनाथा।

## अथ प्रकोष्ठान्तरीयसन्धयः।[2]

**प्रकोष्ठास्थ्नोः परस्परसन्धानं** तावदल्पचेष्टम् ऊर्द्ध्वाधःप्रान्तयोः कोरं, मध्ये प्रतराख्यञ्च। तद्धि त्रिषु देशेषु द्रष्टव्यम्—ऊर्द्ध्वमधो मध्ये चेति। तत्र **ऊर्द्ध्वसन्धाने** सन्धीयते बहिःप्रकोष्ठमुण्डमन्तःप्रकोष्ठास्थ्नश्चक्रनेमिखातेन, तत्संवेष्टनी चात्र स्नायुर्मुण्डवेष्टनिका नाम बहिःप्रकोष्ठमुण्डस्य विवर्त्तनप्रदा। अपरा चात्रैवाधस्तात् तिरश्चीना स्नायुः प्रकोष्ठतिरश्चीना नाम। **अधःसन्धाने** तु सन्धीयते अन्तःप्रकोष्ठास्थ्नो मणिमुण्डं बहिःप्रकोष्ठाधःप्रान्तपार्श्वतः। बन्धनञ्चानयोः प्रकोष्ठाधस्तन्याख्यपूर्व्वापरस्नायुद्वयेन त्रिकोणतरुणास्थ्ना च मणिबन्धसन्धिप्रविष्टेन। **मध्यसन्धानं** पुनः प्रकोष्ठास्थ्नोरादूरवर्त्तिनोः प्रकोष्ठान्तरालाख्यया दृढ़कलया, नत्वत्र तयोः साक्षात् परस्परस्पर्शः।

---

१ प्रसारितो हि बाहुर्दण्डवद्भवति न तु वैपरीत्यं नावनम्यते। २ Radio-ulnar Articulations.

## अथ मणिबन्धसन्धिः।

**मणिबन्धसन्धि**[१]स्तावत् खल्लकीराख्यः, बहिःप्रकोष्ठास्थ्नोऽधःप्रान्तस्थे खल्लकोरभागे अर्द्धचन्द्रनौनिभाख्ययोः कूर्चास्थ्नोः सन्धानात्। अन्तःप्रकोष्ठाधःप्रान्तस्तु नात्र सन्धीयते साक्षात्, तत्संहितत्रिकोणतरुणास्थ्नैव उपलकाख्यकूर्चास्थ्नः सन्धानात्[२]।

### [ ५८ चित्रम्—मणिबन्धसन्धिः ( पुरस्तलम् ) ]




[ † एतच्चिह्नं स्नायुबोधकम् ]

---

१ Wrist-Joint. २ एवञ्च अर्द्धचन्द्रनौनिभोपलकाख्यस्य कूर्चास्थित्रयस्य मणिबन्धसन्धौ प्रवेशः। प्रकोष्ठास्थ्नोस्तु बाह्यमेव तत्सन्धिनिर्म्मापकम्।

मणिबन्धबन्धन्यस्त्विह स्नायवश्चतस्रः—बहिःपार्श्विका, अन्तःपार्श्विका, अग्रिमा, पश्चिमा चेति। तत्र—

बहिःपार्श्विका बहिःप्रकोष्ठास्थ्नो बहिर्मणिकाख्यप्रवर्द्धनात् नौनिभपर्य्याण-काख्ययोः कूर्चास्थ्नोः कङ्कणिकाख्यस्नायोश्च पार्श्वान्तं सङ्गता।

अन्तःपार्श्विका रज्ज्वाकारा अन्तःप्रकोष्ठास्थ्नः अन्तर्मणिकाख्यप्रवर्द्धनात् सम्भूय उपलकवर्त्तुलकाख्ययोः कूर्चास्थ्नोः कङ्कणिकाख्यस्नायोश्च पार्श्वान्तं सङ्गता।

अग्रिमा तु प्रततपट्टिकाकारा प्रकोष्ठास्थ्नोरधःप्रान्तयोः पुरस्तलात् सम्भूय नौनिभार्द्धचन्द्रोपलकाख्यानां कूर्चास्थ्नां पुरस्तले सन्नद्धा।

पश्चिमा च तादृश्येव। सा केवलं बहिःप्रकोष्ठाधःप्रान्तस्य पश्चिमतलात् सम्भूय पूर्व्वोक्तकूर्चास्थित्रयपृष्ठतः सन्नद्धा।

**श्लेष्मधरा कला** तावत् मणिबन्धसन्धौ विशेषतः शिथिला पुष्कल-श्लेष्मवती च, मणिबन्धसन्धेः शैथिल्यात्।

**चेष्टा**श्चात्र सन्धौ प्रवर्त्तन्ते नानाविधाः पुरःपश्चादन्तर्बहिश्च विवर्त्तन-रूपाः। सन्धेश्चास्य शैथिल्यं स्थितिस्थापकता च भारधारणसौकर्य्याय।

## अथ करकूर्च्चान्तरीयसन्धयः।

करकूर्चास्थीन्यष्टौ श्रेणीद्वयविन्यस्तानि,—एकैकस्यां श्रेण्यां चत्वारि चत्वा-रीति। तत्रोर्द्ध्वश्रेणीस्थानां चतुर्णां मध्ये नौनिभार्द्धचन्द्रोपलकाख्यानि त्रीणि मणिबन्धसन्धौ प्रविष्टानि, वर्त्तुलकाख्यन्तु बहिःसन्धितः, तद्धि काण्डरान्तरीयं चणकास्थीति केचिदित्युक्तपूर्व्वम्।

अथैषां कूर्चास्थ्नां परस्परसन्धानं तावत् प्रतराख्यम्, त्रेधा व्याख्येयञ्च—ऊर्द्ध्वश्रेणीस्थानां परस्परम्, अधःश्रेणीस्थानां परस्परम्, ऊर्द्ध्वाधःश्रेण्योश्च परस्परमिति। तत्र—

**ऊर्द्ध्वश्रेण्यां** नौनिभार्द्धचन्द्रोपलकानां परस्परसम्बन्धन्यः स्नायवश्चतस्रः—

१ Annular Ligament of the Wrist. सेयं काण्डराधारिणी स्नायुः पेशीखण्डे वर्णनीया।
२ Carpal Articulations.

पुरोगा, पृष्ठगा, कूर्च्चान्तरीये द्वे चेति। वर्त्तुलकस्य तु बन्धनाय पृथगेव स्नायुकोषः, द्वे च तत्पुरोगे स्नायू अङ्गुष्ठक-कनिष्ठमूलशलाकयोर्मूलतः संसक्ते।

**अधःश्रेणीस्थं** पुनः कूर्च्चास्थिचतुष्टयं पञ्चभिः स्नायुभिः परस्परसम्बद्धम्—द्वाभ्यां पूर्व्वापराभ्यां, तिसृभिश्च कूर्च्चान्तरीयाभिरिति।

**ऊर्द्ध्वाधःश्रेण्योश्च** परस्परसन्धाने न्यश्चतस्रः स्नायवः—अग्रिमा, पश्चिमा, अन्तःपार्श्विका, बहिःपार्श्विका चेति।

सर्व्वासाञ्चासां परस्परानुप्रवेशात् स्नायुजालगवाक्षितः संहतस्वरूप इव च दृश्यते कूर्च्चास्थिसमुदायः। तथाच प्रतिकरमेकैकं कूर्च्चास्थीति केचित्।

## अथ करतलसन्धयः।

**करतलसन्धयस्तावत्** प्रधानतः करतलनिर्म्मापिकाणां मूलशलाकानां सन्धयः कोराख्याः। सन्धानञ्च तासां त्रेधा द्रष्टव्यम्—ऊर्द्ध्वं[1] पर्य्याणक-कूटक-मध्यकूट-फणधर-संज्ञैश्चतुर्भिः कूर्च्चास्थिभिः, अधस्तात् अङ्गुलीपश्चिमनलकैः[2], मूलतः परस्परञ्चेति[3]। तत्सन्धानप्रकारास्तु अस्थिखण्डे वर्णितपूर्व्वाः।

अथैमाः करतले सन्धिबन्धन्यः स्नायवः[4]—

एका पर्य्याणकाङ्गुष्ठमूलशलाकयोर्मूलतः पृथक् श्लेष्मधरकलावती—कोषरूपा (सन्धिश्चायं परस्परकोर इति वर्णितपूर्व्वम्)। अन्याः अपरासां मूलशलाकानां तत्तत्कूर्च्चास्थिभिर्बन्धनाय—षट् पृष्ठगाः, अष्टौ पुरोगाः, द्वे च सन्ध्यन्तरीये—इति षोड़श स्नायवः।

एकैव चात्र श्लेष्मधरा कला कनिष्ठादिमूलशलाकाचतुष्टयस्य मूलतः कूर्च्चास्थ्नामन्तरालेषु च परिव्याप्ता अन्यत्र वर्त्तुलकसन्धेः। तत्र तु पृथगेव श्लेष्मधरकलापुटकम्।

अङ्गुलिपश्चिमनलकानां सन्धयस्तु अङ्गुलिसन्धिवत्।

मूलशलाकानां परस्परसन्धयः पुनरङ्गुष्ठवर्ज्जमपरासामेव मूलतः[5]। तत्र त्रिविधाः

---

१ Carpo-Metacarpal Articulations. २ Metacarpo-phaiangeal Articulations. ३ Inter-Metacarpal Articulations. ४ विस्तरस्तासां स्तबके द्रष्टव्यः। ५ सन्धिप्रकारस्मरणार्थं श्रीकाः २८ पृष्ठान्ते द्रष्टव्याः।

सन्धायिन्यः स्नायवः—पूर्व्वगाश्च पृष्ठगाश्च शलाकान्तरीयाश्चेति। अग्रतस्तु मूलशलाकानामन्तरालस्थाः दृढ़स्नायवः शलाकान्तरीया नाम। शलाकानां परस्परस्पर्शाभावेऽपि हि ताभिः परस्परसम्बद्धानि दृश्यन्ते मूलशलाकाग्राणि।

## अथ कराङ्गुलिसन्धयः।

**कराङ्गुलिसन्धयस्तु**[१] अङ्गुलिनलकानां चतुर्द्दशानां चतुर्द्दश—एकैकस्यामङ्गुल्यां त्रयस्त्रयो द्वावङ्गुष्ठे चेति। ते च कोराख्याः।

एकैकस्मिंश्चाङ्गुलिसन्धौ स्नायवस्त्रिस्र एव—पुरोगा, अन्तःपार्श्विका, बहिःपार्श्विका चेति। पृष्ठगा तु स्नायुरत्र पृथग् न दृश्यते, प्रसारण्याख्यपेशीनां कण्डराभिरेव तत्प्रयोजनसाधनात्।

**चेष्टाः** पुनः कराङ्गुलीनां सङ्कोचप्रसारान्तःकर्षणबहिःकर्षणरूपाः, जपनञ्चाङ्गुष्ठस्य[२]।

## अथ अधःशाखासन्धयः।

अधःशाखासन्धयस्तावत् प्रायेणोर्द्ध्वशाखासन्धिवदेव, विशेषास्तु तत्रावस्थानभेदकृताः। तत्रादौ—

### वंक्षणसन्धिः।

**वंक्षणसन्धिर्वंक्षणोदूखलसन्धिर्वा** नाम श्रोणिफलकस्थस्य वंक्षणोदूखलस्य तरुणास्थिवलयवेष्टितस्य ऊर्व्वस्थिमुण्डेन सन्धानमुदूखलाख्यम्। तत्र च महती श्लेष्मधरा कला महास्नायुकोषान्तर्व्यापिनी। सन्धिबन्धनश्चात्र एक एव महान् स्नायुकोषः प्रधानभूतः—स च वंक्षणोदूखलपरितः सम्भूय ऊर्व्वस्थिग्रीवामभितः शिखरान्तरालाख्ययोश्च रेखयोः सम्बद्धः। स्नायुकोषश्चायं तिसृभिर्दृढ़स्नायुरज्जुभिः श्रोणिफलकावयवभूतादस्थित्रितयात् समुद्गताभिर्दृढ़ीकृतः—इत्यत्र विशेषः।

---

१ Phalangeal Articulations. २ जपनं जपकर्म्मणि व्यापृतस्याङ्गुष्ठस्य चेष्टाविशेषः, स च कराङ्गुष्ठस्यैव सम्भवति।

## [ ५८ चित्रम्—वङ्क्षणसन्धिः । ]

( स्नायुकोषच्छेदेन दर्शितः )




( * एक एव स्नायुकोषोऽयं वङ्क्षणसन्धिच्छादनः )

स्नायुकोषान्तश्चात्र विशेषतो द्रष्टव्या वंक्षणसन्ध्यन्तरीया[1] नाम दृढ़ा स्नायुरज्जुः—सा वंक्षणोदूखलमध्यस्थाद्‌गभीरकोटरादुद्भूय ऊर्व्वस्थिमुण्डस्थे गर्त्ते सम्बद्धा सन्धिदार्ढ्यकरी ।

## अथ जानुसन्धिः ।

**जानुसन्धि**[2]र्नाम ऊरु-जानु-जङ्घास्थ्नां सन्धिर्बहुधासम्बद्धोऽपि चेष्टावान् । तत्र जानुकपालस्य ऊरुजङ्घास्थिभ्यां सन्धिः प्रतराख्यः, ऊरुजङ्घास्थ्नोः सन्धिः पुनः कोराख्यः । अनुजङ्घास्थ्नस्तु जानुसन्धौ न प्रवेशः ।

---

१ Ligamentum Teres. २ Knee-Joint.

## [ ९० चित्रम्—जानुसन्धिः।

( सन्धिरयमूर्द्ध्वाधरच्छेदेन दर्शितः )




[ † एतच्चिह्नं स्नायुबोधकम् ]

तत्र ऊरुजानुजङ्घास्थ्नां त्रयाणामपि संवेष्टनः प्रतनुरपि दृढ़प्रायः स्नायुकोषः एक एव। तद्दृढ़ीकरणार्थं चतस्रः स्नायवः सन्धिवाह्याः। तद्यथा—

( १ ) पुरोगा—जानुकपालबन्धनी[1] नाम, सेयं जानुकपालपरिधिः सम्भूता । तस्या अधरार्द्धं जङ्घास्थ्नः ऊर्द्ध्वप्रान्तपुरस्तलस्थेऽर्ब्बुदे सम्बद्धम् उत्तरार्द्धं पुनरूर्द्ध्वंगतया ऊरुप्रसारण्याख्यपेशीचतुष्टयस्य सम्मिलितकण्डरयाऽऽभिन्नं स्नायुकोषगात्रप्रतिबद्धम् ।

( २ ) पश्चिमगा—जानुपृष्ठिका नाम ऊर्व्वस्थ्नो महार्ब्बुदद्वयस्य पृष्ठतः जङ्घास्थ्न ऊर्द्ध्वप्रान्तपृष्ठान्तं सन्नद्धा कलाकल्पाख्यपेश्याः कण्डरान्तेन दृढ़सम्बद्धा ।

( ३ ) अन्तःपार्श्विका नाम—ऊर्व्वस्थ्न आन्तरमहार्ब्बुदपार्श्वात् जङ्घास्थ्न आन्तरोत्सेधपार्श्वान्तं सन्नद्धा ।

( ४ ) बहिःपार्श्विका—नाम स्नायुरूर्व्वस्थ्नो बाह्यमहार्ब्बुदपार्श्वादनुजङ्घास्थ्न ऊर्द्ध्वप्रान्ते संसक्ता । सा युग्मा—दीर्घा ह्रस्वा चेति ।

अपराश्चात्र दृश्यन्ते जानुसन्ध्यन्तः स्नायवः पञ्च, द्वे च तरुणास्थिनी[2] अर्द्धचन्द्राकारे योजकरज्जुसम्बद्धे । तत्र तरुणास्थिनी जङ्घास्थिशिरःस्थितेन द्विमुखेन कण्टकेन सम्बद्धप्रान्ते । स्नायुपञ्चकन्तु यथा—

[ ६१ चित्रम्—जानुसन्धेरभ्यन्तरं पूर्व्वापरच्छेदेन दर्शितम् ]




१ Ligamentum Patellae. २ Semilunar Cartilages.

द्वे जानुस्वस्तिकाख्ये—अग्रिमा पश्चिमा चेति ; ते जङ्घास्थिशीर्षस्थद्विमुखकण्टकोपकण्ठात् समुत्थाय क्रमाद् ऊर्व्वस्थिवाह्यान्तःकन्दयोः सम्बद्धे।

तिस्रः श्लेष्मधरकलाबन्धन्यश्च—एका त्रिकोणाकारा पुरोगा, द्वे पश्चात्प्राये पृष्ठतः अर्द्धचन्द्राकारतरुणास्थिप्रान्तेषु संसक्ते।

**श्लेष्मधरा कला** तु जानुसन्धौ द्विविधा—एका सन्ध्यन्तरीया महोर्द्धशाखावती विशाला च उक्तस्नायुत्रयनिबद्धा, द्वे च सन्धिवाह्ये कलापुटके इति। तत्र सन्धिवाह्यमेकं कलापुटकं त्वग्जानुकपालयोरन्तरालस्थं त्वाचम्, अपरं जानुकपालबन्धन्याः स्नायुरज्ज्वाः पश्चिमस्थं कण्डरानुगमिति। सन्ध्यन्तस्यात्र पुरस्तात् पृष्ठतश्च श्लेष्मधरकलाच्छन्नं मेदःपिण्डद्वयं द्रष्टव्यम्।

**चेष्टा** तु जानुसन्धौ द्विविधैव, सङ्कोचः प्रसारश्चेति। तत्र सङ्कोचः पुष्कलः, प्रसारस्तु दण्डीभावान्त इति विशेषः।

## अथ जङ्घान्तरीयसन्धयः।

**जङ्घानुजङ्घास्थ्नोः परस्परसन्धानं** तावत् त्रिषु प्रदेशेषु—ऊर्द्ध्वमधो मध्ये चेति। तत्र **ऊर्द्ध्वसन्धाने** सन्धीयते अनुजङ्घास्थ्न ऊर्द्ध्वप्रान्तः जङ्घास्थ्न ऊर्द्ध्वप्रान्तस्थेन वाह्योत्सेधेन पश्चिमतः। सन्धिश्चायं प्रतराख्यः सर्व्वथा जानुसन्धिबहिर्भूतश्च तदेतदस्य वैसादृश्यं कूर्परसन्धानात्। तथाप्यत्र स्नायुद्वयं दीर्घं ह्रस्वञ्च जानुसन्धेर्बहिःपार्श्विकाख्यम् ऊर्व्वस्थिसंसक्तं तत्सन्धिदार्ढ्यायेति विशेषः। तत्सन्धायिन्यश्चापराः स्नायवस्तिस्रः—अग्रिमा पश्चिमा कोषाकारा चेति। **अधःसन्धानं** तावत् कोराख्यं—तद्धि जङ्घास्थ्नः अधःप्रान्तबहिःसीमस्थे कोरत्रिकोणप्रदेशे सन्धीयते अनुजङ्घास्थ्नोऽधःप्रान्तो बहिर्गुल्फनिष्पादकः ; तत्र च सन्धायिन्यः स्नायवश्चतस्रः—अग्रिमा, पश्चिमा, वलयिका, सन्ध्यन्तरीया चेति। एवंसंहिताभ्याञ्च जङ्घानुजङ्घास्थिभ्यां सन्धीयते कूर्चशिरः—सोऽयं गुल्फसन्धिः पादसन्धिर्वा अनुपदं व्याख्येयः। जङ्घानुजङ्घास्थ्नोरधःसन्धिबन्धन्यः स्नायवश्च तिस्र एव। अग्रिमा पश्चिमा सन्ध्यन्तरीया चेति—स्वनामव्याख्याता। **मध्यसन्धानन्तु** जङ्घानुजङ्घास्थ्नोर्दृढकलयैव।

---

१ Crucial Ligaments. २ Superior, Inferior and Middle Tibio-fibular Articulations.

[ ६२ चित्रम्— जङ्घास्थिनी )




## अथ गुल्फसन्धिः।

**गुल्फसन्धिः[१] पादसन्धिर्वा** नाम जङ्घास्थ्नोरधःप्रान्तयोः कूर्चशिरसा सन्धिः खल्लकोराख्यः। तत्र हि जङ्घास्थिद्वयाधःप्रान्तस्थं खल्लवत्कोरं स्थालकमाश्रित्य विवर्त्तते समग्रः पादः पुरःपश्चादन्तर्बहिश्च कूर्चशिरोऽव्यवधानेन। अत एवास्य पादसन्धिरित्यपि संज्ञा।

---

१ Ankle-Joint.

गुल्फसन्धिसम्बन्धिन्यः स्नायवस्तु चतस्रः, तद्यथा—

अग्रिमा—जङ्घाधःप्रान्तस्य कूर्च्चशिरसश्च पुरःपरिध्योः सम्बद्धा।

पश्चिमा—प्रतनुगुच्छमयी तयोरेव पश्चिमपरिध्योः सम्बद्धा।

अन्तःपार्श्विका गुल्फत्रिकोणिका वा नाम। सेयं जङ्घाधःप्रान्तीयादन्तर्गुल्फाग्रभागात् सम्भूय नौनिभकूर्च्चशिरःपार्ष्णिसंज्ञस्य कूर्च्चास्थित्रयस्य अन्तःसीम्नि सन्नद्धा।

बहिःपार्श्विका—अनुजङ्घाधःप्रान्ताद्बहिर्गुल्फाग्रात् सम्भूय कूर्च्चशिरःपार्ष्णिसंज्ञस्य कूर्च्चास्थिद्वयस्य बहिःसीम्नि सन्नद्धा।

## अथ पादकूर्च्चान्तरीयसन्धयः।[1]

पादकूर्च्चास्थ्नां सन्धानप्रकारास्तावत् वर्णितपूर्व्वाः। तत्सन्धायिन्यः स्नायवः पुनर्बह्वः, तासां परस्परानुप्रवेशात् स्नायुजालगवाक्षितो दृढसन्धानादेकीभूत इव च दृश्यते पादकूर्च्चास्थिसमुदायः करकूर्च्चास्थिवत्। तथाच प्रतिपादमेकैकं कूर्च्चास्थ्योल्येके।

तासाञ्च स्नायूनां मध्ये इमास्तावत् विशेषतो लक्षणीयाः—

(१) पार्ष्णिकूर्च्चशिरसोः सन्धायिन्यस्तिस्रः—अन्तःपार्श्विका, बहिःपार्श्विका, पश्चिमा चेति।

(२) घनपार्ष्ण्योः सम्बन्धिन्यश्चतस्रः—द्वे पादतलिके—दीर्घा ह्रस्वा चेति, द्वे च पादपृष्ठिके इति। तत्र दीर्घा पादतलिका संसज्यते दीर्घायाः पादविवर्त्तन्याग्रपेश्याः कण्डरान्तेन।

(३) नौनिभपार्ष्ण्योः सन्धायिन्यौ द्वे—उत्तरा अधरा चेति।

---

१ Tarsal Articulations.

## [ ६३ चित्रम्—पादतलस्थाः स्नायवः ]




[ † एतच्चिह्नं स्नायुबोधकम् ]

[ १ कूर्चशिरसोऽधस्तलस्था सीता दीर्घाङ्गुष्ठसङ्कोचन्याख्यपेश्याः कण्डरान्तधारणाय। २, २, दीर्घायाः पादविवर्तन्याख्यपेश्याः कण्डरान्तः ]।

( ४ ) नौनिभकूर्चशिरसोः सम्बन्धन्यस्तिस्रः—पादतलगा, पादपृष्ठगा, सन्ध्यन्तरीया चेति ।

( ५ ) कोणकाख्यानां त्रयाणां परस्परसम्बन्धन्यश्च तिस्रस्तथैव ।

( ६ ) घनबहिःकोणकयोः सन्धायिन्यश्च तिस्रस्तथैवेति ।

# अथ पादतलसन्धयः।

पादतलस्य तावत् पश्चार्द्धमाश्रित्य स्थिताः सन्धयः कूर्च्चान्तरीयसन्धिवर्णनेन वर्णितपूर्व्वाः। तत्पूर्व्वार्द्धसन्धयस्तु पादमूलशलाकासन्धयः[१] कोराखराः। सन्धानञ्च तासां त्रेधा द्रष्टव्यम्—पुरस्तात् पादाङ्गुलिपश्चिमनलकैः, पश्चात् कोणकत्रयेण घनाखेरन च कूर्च्चास्थ्ना, मूलपार्श्वतः परस्परञ्चेति। तत्सन्धानप्रकारास्तु वर्णितपूर्व्वाः।

तत्र पुरस्तात् पादाङ्गुलिपश्चिमनलकैः सन्धयस्तु अङ्गुलिसन्धिवत्, पश्चात् कूर्च्चास्थिभिः सन्धयस्तु त्रिविधाभिः स्नायुभिः प्रतिबद्धाः—पादतलगाभिश्च पादपृष्ठगाभिश्च सन्ध्यन्तरीयाभिश्चेति।

मूलशलाकानां परस्परसन्धयस्तु अङ्गुष्ठवर्ज्जमपरासामेव मूलतः। तत्रापि त्रिविधाः स्नायवः पूर्व्ववत्, अग्रतस्तु मूलशलाकानामन्तरालस्थाः दृढ़स्नायवः शलाकान्तरीयाः नाम। तत्र शलाकानां परस्परस्पर्शाभावेऽपि ताभिः परस्परसम्बद्धानि दृश्यन्ते मूलशलाकाग्राणि।

# अथ पादाङ्गुलिसन्धयः।

**पादाङ्गुलिसन्धयश्च**[२] कराङ्गुलिसन्धिवत् पादाङ्गुलिनलकानां चतुर्द्दशानां चतुर्द्दश,—एकैकस्यामङ्गुल्यां त्रयस्त्रयो द्वावङ्गुष्ठे चेति। ते च कोराखराः।

स्नायवश्च तत्र कराङ्गुलिसन्धिवत्।

**चेष्टास्तु** पादाङ्गुलिषु स्वल्पतराः सङ्कोचप्रसारान्तःकर्षणबहिःकर्षणरूपाश्चतस्रः। पादाङ्गुष्ठस्य पुनः कराङ्गुष्ठवत् नास्ति जपादिसामर्थ्यमिति विशेषः।

तदेतत् सन्धिस्नायुखण्डं समाप्तम्।

---

१ Metatarsal Articulations. २ Phalangeal Articulations.

इति

श्रीमन्नारायणकरुणावतारश्रीकृष्णचैतन्यतनयीकृत-

धन्यजनिश्रीमद्रघुनन्दनवंशावतंसस्य

निखिलराढाभूमिसौरभप्रभवश्रीखण्डपुरादिवास्तव्यस्य

विद्याकल्पद्रुमेत्यन्वर्थनाम-सर्व्वतन्त्रस्वतन्त्र-

विश्वनाथोपमविश्वनाथकविराजात्मजस्य

समस्तभारतभिषक्सम्मेलनलब्ध-

'वैद्यावतंस'पदवीकस्य

विद्यानिधिकविभूषणकविराजादि-

नानोपाधिकस्य

श्रीमद्गणनाथसेनभिषजःकृतौ

प्रत्यक्षशारीरे

## अस्थिसन्धिस्नायुवर्णनीयो नाम

## प्रथमो भागः

समाप्तः ।

॥ श्रीकृष्णचरणार्पणमस्तु ॥

# शुद्धिपत्रम् ( प्रथमभागस्य )।

| [पृष्ठे] | [पंक्तौ] | [अशुद्धम्] | [शुद्धम्] |
|---|---|---|---|
| १ | ४ | भासदनु | भासमनु |
| १ | १४ | हन्त भिषजन्मन्या | हन्त नु भिषङ्मन्या |
| १ | १६ | प्रकाशमानम् | प्रकाशमनु |
| ५ | ३ | विस्तारो | विस्तरो |
| ६ | २८ | मस्तिकतयं ष्टा | मस्तिष्कतयं ष्टा। |
| ७ | १० | स्नायुशब्देश्चैष | स्नायुशब्दश्चैष |
| ७ | १३ | व्यक्तिरुप | व्यक्तिरूप |
| ७ | १६ | स्नायु | स्नायू |
| ८ | २१ | उपोद्घाते | उपोद्घाते |
| ८ | २२ | फुस्फस | फुस्फुस |
| ८ | २५ | विद्यद्दह | विद्युद्दह |
| ११ | २ | रूढ्म् | रूर्ढ्म् |
| १२ | २ | पश्च | पश्च |
| १५ | २१ | उपोद्घात प्रकरणे | परिशिष्ट प्रकरणे |
| १७ | १५ | सन्निकृष्ट: | सन्निकृष्टा |
| १७ | १५ | विप्रकृष्टश्च | विप्रकृष्टा च |
| २० | २ | अथ कूर्चास्थीनि | अथ पादकूर्चास्थीनि |
| २० | २२ | खातोदर: | स्फीतोदर: |
| २१ | २४ | चरमोक्ताणां | चरमोक्तानां |
| २१ | २६ | द्रष्टव्य: | द्रष्टव्या: |
| २२ | १०।११ | उत्सेधाभ्याभ्याम् | उत्सेधाभ्याम् |
| २२ | चित्राध: | पादाङ्गली | पादाङ्गुली |
| २२ | २८ | चतुष्टयेणेति | चतुष्टयेनेति |
| २३ | २५ | निष्पादकम् | निष्पादक: |
| २४ | २ | बहि:पार्श्वेण | बहि:पार्श्वेन |
| २५ | १८ | वय:परिणामेण | वय:परिणामेन |
| २५ | २७ | महाशिखरागस्थं | महाशिखराऽग्रस्थं |

# शुद्धिपत्रम् ( प्रथमभागस्य )।

| [पृष्ठे] | [पंक्तौ] | [अशुद्धम्] | [शुद्धम्] |
|---|---|---|---|
| १ | ४ | भासदनु | भासमनु |
| १ | १४ | हन्त भिषजन्मन्या | हन्त नु भिषङ्मन्या |
| १ | १६ | प्रकाशमानम् | प्रकाशमनु |
| ५ | ३ | विस्तारो | विस्तरो |
| ६ | २८ | मस्तिकतर्थ ष्टा | मस्तिष्कतर्थ ष्टा। |
| ७ | १० | स्नायुशब्देस्यैष | स्नायुशब्दस्यैष |
| ७ | १३ | व्यक्तिरुप | व्यक्तिरूप |
| ७ | १६ | स्नायु | स्नायू |
| ८ | २१ | उपोद्घाते | उपोद्‌घाते |
| ८ | २२ | फुस्फस | फुस्फुस |
| ८ | २५ | विद्यद्दह | विद्युद्दह |
| ११ | २ | रूड्वम् | रूढ्वम् |
| १२ | २ | पश्च | पश्च्व |
| १५ | २१ | उपोद्घात प्रकरणे | परिशिष्ट प्रकरणे |
| १७ | १५ | सन्निकृष्टः | सन्निकृष्टा |
| १७ | १५ | विप्रकृष्टस्य | विप्रकृष्टा च |
| २० | २ | अथ कूर्चास्थीनि | अथ पादकूर्चास्थीनि |
| २० | २२ | खातोदरः | स्फोतोदरः |
| २१ | २४ | चरमोक्ताणां | चरमोक्तानां |
| २१ | २६ | द्रष्टव्यः | द्रष्टव्याः |
| २२ | १०।११ | उत्सेधाभ्याभ्याम् | उत्सेधाभ्याम् |
| २२ | चित्राधः | पादाङ्गलौ | पादाङ्गुलौ |
| २२ | २८ | चतुष्टयेणेति | चतुष्टयेनेति |
| २३ | २५ | निष्पादकम् | निष्पादकः |
| २४ | २ | बहिःपार्श्वेण | बहिःपार्श्वेन |
| २५ | १८ | वयःपरिणामिणा | वयःपरिणामिना |
| २५ | २७ | महशिखराग्रस्थं | महाशिखराऽग्रस्थं |

# निवेदनम् ।

प्रत्यक्ष-शारीराख्योऽयं महाग्रन्थो भागत्रयेण समाप्यः। तस्य प्रथमे भागे—शारीरपरिभाषासहितमस्थि-सन्धि-स्नायुवर्णनं सविस्तरं प्रतिपादितम्। द्वितीयो भागः—साम्प्रतं मुद्रायन्त्रस्थो वर्त्तते। स च यथाशक्ति सत्वरं प्रकाशयिष्यते। तत्र पेश्यः, सिरा, धमन्यो, रसायन्य, आशयाश्च सविस्तरं प्रतिपादिता भिषग्जनोपकाराय, चित्राणि च तत्र द्वित्रवर्णरञ्जितानि रमणीयतराणि। अनन्तर प्रकाश्ये तृतीयभागे तु—नाड़ीचक्राणि, मस्तुलुङ्गादयः, पञ्चेन्द्रियविशेषाः, प्राचीन-पाठोद्धार-समन्वयादिपरं परिशिष्टञ्चेति विषयाः सम्यक् प्रतिपादिताः, चित्राणि च तत्र तादृशान्येव।

उपोद्घातस्त्वस्य ग्रन्थस्य समग्रवैद्यकपुरावृत्तसमन्वितचरक-सुश्रुतादि-भावमिश्रान्तानामाचार्य्याणां कालनिर्णयपरो विविध-शारीर-मीमांसापरायणश्चेदानीं पृथगेव ग्रन्थः संवृत्तः प्रकाशितश्च। सोऽयं सं० १९७०-वसन्तपञ्चमीं यावत्प्रथमभागग्राहकेभ्यो विनैव पृथङ्मूल्यं दास्यते। वसन्तपञ्चमीतः परस्तात्तन्मूल्यं ग्राहकेभ्यो रूप्यकमात्रम् (१) रु०), इतरेभ्यस्तु सार्द्धरूप्यकम् (१॥) रु०) आदेयम्।

एवञ्चास्य ग्रन्थस्य मूल्यं खण्डशः—प्रथमभागस्य मनोरमपट्टनिबद्धस्योपोद्घातसहितस्य रूप्यकपञ्चकम् (५) रु०), वसन्तपञ्चमीं यावत्तु रूप्यकचतुष्टयम् (रु०४))। द्वितीयभागस्य पट्टबद्धस्य रूप्यकपञ्चकम् (५) रु०)। तृतीयभागस्यापि तादृशस्य तदेव (५) रु०)। समग्रग्रन्थस्य मूल्यमग्रिमप्रेषितञ्चेत्, सार्द्धत्रयोदशमुद्राः (१३॥) रु०)। प्रापणव्ययस्तु पृथग् देयः। केवलपत्रबद्धस्य तु प्रथमभागस्योपोद्घातरहितस्य मूल्यन्तु सार्द्धरूप्यकत्रयमेव (३॥) रु०) यथापूर्व्वम्।

ईदृशो ग्रन्थचित्रादिनिर्म्माणविधौ यद् बहुसहस्रमुद्रामितं व्ययबाहुल्यमपेक्षते, तद्विचारेणास्य मूल्यं यथाशक्ति स्वल्पमेव व्ययनिर्व्वाहकमात्रं कल्पितमिति सुवेदं सूक्ष्मवेदिभिः।

प्रत्यक्षशारीरोक्तानि वस्तूनि प्रत्यक्षीकर्त्तुमुत्साहवतां भिषजामुत्साहवर्द्धनाय, एतद्ग्रन्थकारैरस्मद्गुरुचरणैर्महता व्ययेन संगृहीतः शारीरसम्भारः, स्थापिता च खण्टहेषु पाठशाला, यत्र नियमेनाध्याप्यन्ते बहवः शिष्या भिषजश्च नानादिगदेशागताः। स्वागतं तत्त्वजिज्ञासुभ्यः।

पत्रव्यवहारस्तावदधोलिखितनाम्ना करणीयः—

पं० नाथूराम शर्म्मा,

६५ नं बिडन ष्ट्रीट, कलकत्ता।

[ मूल्यादिकं तु ग्रन्थकर्त्तृणामेव नामतः प्रेष्यम् ]

WELLCOME LIBRARY INSTITUTE